# व्यासश्रीः
# VYĀSAŚRĪḤ

**Impact Factor 7.747**
**(A Peer Reviewed Research Journal of Indology)**
**January-June 2025**
**Date of Publication: 30.06.2025**

**: Chief Editor:**

Dr. Buddheswar Sarangi

**: Associate Editors:**

Prof. Prasanta Kumar Mahala
Dr. Jagamohan Acharya
Dr. Gyanaranjan Panda
Dr. Swetapadma Satapathy
Dr. Dibakar Dash
Dr. Santosh Majhi
Dr. Priyavrat Mishra
Dr. J. Bali Chakravarthi
Dr. Runima Sharma

*Publisher*

**Padmashree Ramaranjan Mukherjee Chair of**
Maharshi Vyasadev National Research Institute
A Unit of Vyasayanam, Regd. No. 1635-IV-477/04
Vedavyas, Rourkela-4, Odisha
Contact No.: 7003415810, 7044016153
Email: vyasasri12@gmail.com
Website: www.vyasasri.com

**Scholar Members for Scrutiny:**

Prof. Sarita Sharma
Dr. Saroj Kumar Padhi
Dr. Somanath Dash
Dr. Bharat Bhushan Rath
Dr. Preeti Pujara
Dr. Sunil Joshi
Dr. Harapriya Behera
Dr. Prakash Gogikar
Dr. Pradeep Kumar Bag

**Board of Advisors:**

Prof. Abhiraj Rejendra Mishra
Prof. Radhaballava Tripathy
Prof. Harekrishna Satapathy
Prof. Shrinivasa Varakhedi
Prof. Prafulla Kumar Mishra
Prof. Somesh Kumar Mishra
Prof. Chandrakant Shukla
Prof. Arun Ranjan Mishra
Prof. Sukanta Kumar Senapati
Prof. Meera Dwivedi

**Hon'ble Referees:**

**Prof. Kishor Chandra Padhi,**
Ex-Professor, S. J. S. V. Puri
**Prof. Tapan Shankar Bhattacharya,**
Professor in Sanskrit, Jadavpur University, Kolkata
**Prof. Satyanarayana Acharya,**
Professor in Sahitya, National Sanskrit University, Tirupati
**Prof. Dharmananda Rout,**
Professor in Sahitya, LBS National Sanskrit University, New Delhi

**Co-Ordinators:**

Prof. Sarita Sharma (Academic)
Dr. Umakanta Panda (Finance)
Sri Chandradhwoja Majhi (Finance)
Smt. Laxmipriya Pahadi (Publicity)
Dr. Koushik Malakar (Printing)
Dr. Asha Singh Rawat (Printing)
Biswanath Mahata (Printing)

# A BRIEF NOTE ON THE PHOTOGRAPH OF COVER PAGE



**Operation Sindoor: Symbol of India's Self-respect**

## Operation Sindoor: A Tactical and Symbolic Milestone in India's Defence Strategy

Operation Sindoor, executed on the night of 6–7 May 2025, stands as a hallmark of India's strategic response to terrorism and its evolving military ethos. The operation, juxtaposed against the harrowing Pahalgam attack of 22 April, was executed with remarkable precision: within approximately 25 minutes, Indian forces neutralised nine terror camps across Pakistan and Pakistan-occupied Kashmir, using stand-off munitions such as HAMMER bombs, SCALP missiles, and loitering munitions.

At the forefront of the briefing, embodying both tactical excellence and symbolic unity, were Colonel Sofiya Qureshi of the Indian Army's Corps of Signals and Wing Commander Vyomika Singh, a seasoned helicopter pilot of the Indian Air Force. Colonel Qureshi's leadership mirrored her trailblazing career, including becoming the first Indian woman to command a multinational military team during Exercise Force 18, while Wing Commander Singh brought to bear her extensive aerial expertise, with over 2,500 flying hours across challenging terrains.

Through Operation Sindoor, India demonstrated a decisive blend of calibrated military action and measured restraint—reinforcing its deterrence doctrine while affirming the increasing prominence of women in key defence roles.

# प्रास्ताविकम्

**तत्कर्म यन्न बन्धाय सा विद्या या विमुक्तये।**
**आयासायापरं कर्म विद्यान्या शिल्पनैपुणम्।।**
**(विष्णुपुराणे-१/१९/४१)**

व्यासमहर्षेः तृतीयोनेत्रोद्भासितमिदं श्लोकरत्नं कर्माकर्मविवेचनाय सहृदयान् प्रचोदयति यत् , प्रकृष्टं कर्म तदेव भवति येन कर्मणा भवबन्धने मानवो न पतति। विद्या सा एव भवति या तु जन्ममरणचक्रादुर्द्धं नयति, तद्भिन्नं सर्वाणि कर्माणि भौतिकसुखाय आयासमात्रम्। विद्या च कर्मणः कुशलताबृद्धये भवति। व्यङ्ग्येन अत्र ईशोपनिषदः **कुर्वन्नेवह कर्माणि** इति मन्त्रस्य तथा **विद्यां चाविद्यां च यस्तदेवेदोभयं सह ,अविद्यया मृत्युं तीर्त्त्वा विद्ययामृतमश्नुते** इति मन्त्रस्य च प्रचोदना महर्षिणा अभाणि। कौशलबृद्धये ज्ञानाहरणं नितरामपेक्षते किन्तु सर्वतो भावेन स्वार्थसिद्धये तत्र प्रवृत्तिः लोकहिताय न भवति। अतः परमार्थलाभाय यत्नः करणीयः। अपि च संसारबन्धनमुक्तये यस्या विद्याया अपेक्षाऽस्ति सा विद्या भवति तल्लीनतया परमे ब्रह्मणि चित्तदानम्। यानि कर्माणि अस्माभिराद्रियन्ते तानि पार्थिवशरीरपोषणाय मा सन्तु, न वा तेषु स्वामित्वचिन्तनमस्तु। अस्य जगतः कर्त्ता यो भगवान् परमेश्वर स एव सर्वेषां कर्मणां स्वामी, वयं मानवाः तस्यैव सेवका अतः कर्मणि अस्माकं प्रवृत्तिरिति चिन्तनमेव मानवहृदयात् काम-क्रोध-लोभ-मोह-मद-मात्सर्यादीन् षडरिपून् निहन्ति। तेषां विनाशे रजतमसोर्विनाशो भवति। तेन आनन्दकोषस्य आवरणभङ्गो जायते। मानवः चिदानन्दब्रह्मणः कृपाकटाक्षपात्रं भवतीति सारः।

अस्माकं काव्यमार्गे यथा ४९ भावाः रसस्य अभिव्यक्तये यतन्ते तथा अस्माकं सर्वाणि कर्माणि भगवदानन्दाप्राप्तये प्रसरेयुः। भवबन्धनमुक्तये अयमेव मार्गः प्रशस्तः।

व्यासश्रीरिति विद्याविद्याविवेकचतुरी गवेषणात्मिकाज्ञानभारती अद्य विद्वद्रङ्गमञ्चे २८ तमं दृश्यं प्रदर्शयितुं सज्जीभूता। विद्वद्धौरेयाणां सम्यञ्चि शास्त्रालोडनमतानि गर्भीकृत्य

स्वनवीनरूपं दर्शयति। प्रवृद्धविदुषां ज्ञाननेत्रोद्भासितया भारत्या सह युवविदुषां लोकोपकारिण्या भारत्या समृद्धेयं वेद-व्याकरण-काव्य-दर्शनादिशास्त्रविततिं प्रदर्शयिष्यतीति निश्चप्रचं वचः। आचार्यकिशोरचन्द्रपाढी-आचार्यतपनशङ्करभट्टाचार्य-आचार्यसत्यनारायणाचार्य-आचार्यधर्मानन्दराउतप्रमुखानां प्रयासेन परिशीलिताः शोधनिबन्धाः अस्मिन् अष्टाविंशतितमखण्डे प्रकाशितास्सन्ति। अतः प्रकाशनावसरे तेभ्यः कार्तज्ञं व्याहरामः।

पत्रिकायाः मुखपटले राष्ट्राय दर्शितवीरतयोर्मातृशक्त्योः छायाचित्रं राष्ट्रभक्तिजागरणाय सहायकं स्यात्।

अत्र येषां निबन्धप्रस्तोतृणां ज्ञानवैभवं प्रकाश्यते तेभ्यः धन्यवादं व्याहरामः। परिशेषे अपाणिपादस्य नीलशैलेश्वरस्य पादपद्मे नतिततिं समर्प्य पत्रिकायाः शिवमयीं प्रसृतिं कामयामहे। अन्तिमे इदमस्तु-

ज्ञानविज्ञानगात्रेयं व्यासश्रीः बुधमोदिनी।
मनांसि रञ्जयेत् नित्यं सम्यञ्चि सप्तविंशतिः।।


इति

दिनाङ्कः ३०.०६.२०२५

विदुषामाश्रवाः

**डॉ. बुद्धेश्वरषडङ्गी**

मुख्यसम्पादकः तथा व्यासश्रीपरिवारस्य सदस्याः



Scientific Journal Impact Factor

# CERTIFICATE OF INDEXING (SJIF 2024)

This certificate is awarded to

**VYASASHRIH**
**(ISSN: 2320-2025)**

The Journal has been positively evaluated in the SJIF Journals Master List evaluation process

SJIF 2024 = 7.747

**SJIF (A division of InnoSpace)**

SJIFactor Project Manager
International Advisory Services
INNOSPACE INTERNATIONAL

SJIFactor Project

# GUIDELINE

1. Paper should be prepared with in10 pages**.**

2. Your paper should be recommended by an eminent scholar (Professor/Associate Professor/PhD Guide) of concern field. Send the pdf and soft copy of your paper with recommendation of the scholar to **vyasasri12@gmail.com** Send a message to the contact no.7003415810 that you have sent the paper.

3. Your paper will be sent to our expert committees for approval.

***Guide line for the preparation of an article for VYASASHREE, ISSN 2320-2025***

…………………………………………………………………………….

**A. PRINTING AREA OF THE PAPER**

Length- **17cm**

Wide-**10.5 cm**

Letter size- **13 for Hindi/Devanagari** (Unicode fon0t)

**11 English (Arial Normal)**

**B. PAPER FORMAT**

1. Title of the Paper (all capital). **Font size-16**

2. Authors' name-**Font size 13**

3. Abstract- Font Size 12

4. Key words (italic). **Font size 12**

5. Introduction**. Font size 12**

6. Main Topic**. Font size 12**

7. Conclusion. **Font size 12**

8. Foot Note. **Font size 09**

9. List of Reference Book s. (Author, Name of the Publisher, Publication year) **Font size 09**

10. Page limit. **6 to 10**

All interested scholars are requested to prepare their research paper as per guide line to avoid the printing hazard.

**The paper not followed the above guide line may be rejected at final stage**.

N. B. The submitted papers are reviewed by the Board of Referees and Editorial Board. Only the selected papers are published in the journal. So, it takes three to six months to publish a paper.

**Dr. Buddheswar Sarangi**

***Chief Editor, Vyasashree***

# सूचीपत्रम्


| | | |
|---|---|---|
| **Editorial Board** | | (I) |
| **प्रास्ताविकम्** | | (V) |
| **Certificate of impact factor** | | (VII) |
| **Guideline** | | (VIII) |
| **सृष्टिः** | **स्रष्टा** | **पृष्ठम्** |
| 1. अलङ्कारशास्त्रे अलङ्कारसौष्ठवम् | निरंजनकुमारझा | 1 |
| 2. वैज्ञानिकविचारसम्बलितं ज्यौतिषं शास्त्रम् | डॉ.ज्योतिप्रसाददाशः | 16 |
| 3. "मतं विशिष्टाऽद्वैतं मे" एकमध्ययनम् । | ध्रुवो वाचस्पतिः | 29 |
| 4. मेघदूते व्यवहारज्ञानम् | शुभलक्ष्मी आचार्यः | 50 |
| 5. कुमारीकुसुम | सुप्रिया मिश्र | 55 |
| 6. पाणिनीयव्याकरणे संहिताधिकारविमर्शः | श्रीमती मुनि विशोई | 65 |
| 7. व्याकरणे समासस्वरूपविमर्शः | सौम्यरञ्जन आचार्यः | 70 |
| 8. स्कन्दपुराणे चतुर्धामूर्त्तिः | इन्दिरा पण्डा | 81 |
| 9. The Essence of *Khecarīmudrā* in some Yogic Texts | Abhilash Banerjee | 85 |
| 10. सिद्धान्तकौमुद्यां प्रमुखहल्सन्धिपदविमर्शः | डॉ. सुनेली देई | 94 |
| 11. प्रबोधचन्द्रोदयनाटके अद्वैतवेदान्ततत्त्वोपस्थापनम् | डॉ. ज्ञानरञ्जनपण्डा | 109 |
| 12. शाङ्करवेदान्त-स्वामिनारायणवेदान्तयोस्तुलना | डॉ. श्वेतपद्मा शतपथी | 115 |
| 13. Excellence of Similes in Karonā- kampa- Šatakam | Dr. Bipasha Das | 120 |
| 14. श्रीमद्भगवद्गीतायां पुरुषोत्तमयोगः | डॉ. राजश्रीदाशः | 128 |
| 15. नाट्यवृत्तिविमर्शः | डॉ. बुद्धेश्वरषडङ्गी | 140 |
| **•Writer's World** | | 150 |

# अलङ्कारशास्त्रे अलङ्कारसौष्ठवम्

निरंजनकुमारझा

साहित्याचार्यः

साहित्यविभागः, साहित्य-संस्कृतिसङ्कायः

राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः

संस्कृतवाङ्मये यावन्ति शास्त्राणि सन्ति, तेषु सर्वेषु शास्त्रेषु महत्त्वपूर्णं शास्त्रं वर्तते अलङ्कारशास्त्रम्। अन्यानि सर्वाणि शास्त्राण्यलङ्कारशास्त्रस्याङ्गभूतानि वर्तन्ते। अस्मिन् शास्त्रे अलङ्काराः, गुणाः, रीतयः, वृत्तयः बहवः सन्ति संग्राह्याः। दोषाश्च सन्ति परित्याज्याः। एषु सर्वेषु अलङ्कारस्य यादृशं स्थानं वर्तते, तादृशं न कस्याप्यन्यस्य, अतएवास्य शास्त्रस्य नाम आचार्यैः अलङ्कारशास्त्रं कृतम्, न तु गुणशास्त्रं,न रीतिशास्त्रं वृत्तिशास्त्रं वा। साहित्यशास्त्रस्य अपरो नाम अलङ्कारशास्त्रमिति प्रसिद्धम्। यस्मिन् शास्त्रे सौन्दर्यस्य पर्यालोचनं क्रियते तच्छास्त्रं अलङ्कारशास्त्रमित्यभिधीयते। काव्यशास्त्रस्यादिमे काले एतस्य काव्यालङ्कारशब्दस्य प्रयोगः क्रियते स्म। एतस्मादेव हेतोः काव्यशास्त्रस्यादियुगस्य सर्वे आचार्याः स्वग्रन्थानां नामानि काव्यालङ्कारः इत्यकार्षुः। अलङ्कारशास्त्रस्य प्रख्यात आचार्यो भामहः स्वग्रन्थस्य नाम काव्यालङ्कारः इत्यकार्षीत्। उद्भटोऽपि स्व-काव्यशास्त्रविवेचनात्मकस्य ग्रन्थस्य नाम काव्यालङ्कारसारसङ्ग्रहः इत्यकरोत्। रुद्रटस्य काव्यशास्त्रविषयकस्य ग्रन्थस्यापि नाम काव्यालङ्कार एव। अनेन ज्ञायते यत् साहित्यशास्त्रे काव्यसंघटकानां तत्त्वानां कियत् महत्त्वपूर्णं स्थानं वर्तते।

काव्यालङ्काराभिधानस्यालङ्कारशब्दः सौन्दर्यस्य बोधको वर्त्तते। अत एव वामनः प्राह स्वकीये काव्यालङ्कारसूत्रवृत्तिनामके ग्रन्थे –

**'काव्यं ग्राह्यमलङ्कारात् ।'**[1] इति ।

**'सौन्दर्यमलङ्कारः ।'**[2] इति ।

अन्येऽप्याचार्याः काव्यस्य सौन्दर्याधायकं तत्त्वम् अलङ्कारशब्देनाहुः । उक्तश्चापि दण्डिना –

**'काव्यशोभाकरान् धर्मानलङ्कारान् प्रचक्षते ।'**[3] इति ।

इत्थं काव्यालङ्कारशब्दः काव्यसौन्दर्यस्य बोधको भवति। लक्षणया च तेन शब्देन काव्यसौन्दर्यपरं शास्त्रमित्यभिधीयते। काव्यशास्त्रज्ञाः यथा भरतः, भामहादयः अलङ्काराणां महत्त्वं बहुत्र प्रतिपादितवन्तः। यथा कान्तामुखं कान्तमपि निरलङ्कारं सत् न शोभते, तथा शब्दार्थशरीरं काव्यं सगुणमपि न विभाति। उक्तं च भामहेन-

**न कान्तमपि निर्भूषं विभाति वनिताननम् ।**[4] **इति ।**

यथा शरीरस्य भूषणैः सौन्दर्यं वर्धते, तथा कविवाणी अपि अलंकारैः शोभते। हार-कवच-कुण्डलादिनामुचितसन्निवेशः यथा शरीरस्य शोभां वर्धयति तथैव काव्येऽपि समाना परिस्थितिः। यदि नाम काव्ये अलङ्काराणां समुचितनिवेशः क्रियते तदा ते अलङ्काराः शब्दार्थरूपकाव्यशरीरस्य शोभां वर्धयन्तः परम्परया आत्मतत्त्वस्यापि शोभां वर्धयन्ति अर्थात् काव्ये रसतत्त्वस्य परिपोषकत्त्वेन अलङ्काराः भवन्ति। काव्यप्रकाशकारेण उक्तं-

**उपकुर्वन्ति तं सन्तं येऽङ्गद्वारेण जातुचित् ।**

**हारादिवदलङ्कारास्तेऽनुप्रासोपमादयः । ।**[5] **इति ।**

चन्द्रालोके जयदेवेन अलङ्काराणां महत्तां प्रदर्शयता निरूपितम्-

**अङ्गीकरोति यः काव्यं शब्दार्थावनलङ्कृती ।**

**असौ न मन्यते कस्मादनुष्णमनलंकृती । ।**[6] **इति ।**

भूषणार्थक ‘अलम्’ पूर्वक ‘कृ’ धातोः ‘घञ्’ प्रत्ययकृते सति (अलङ्क्रियते अनेन इति अलङ्करोतीति वा अलङ्कारः) अलङ्कारशब्दः निष्पद्यते। येन अलङ्ककरणं क्रियते, काव्ये सौन्दर्यं वर्ध्यते स भवति अलङ्कारः। अर्थाद्रसाद्युत्कर्षजनकत्वे सति, अतिशयशोभातिशायि काव्यधर्मत्वम् अलङ्कारत्वम्। उक्तं च विश्वनाथेन -

**शब्दार्थयोरस्थिरा ये धर्माः शोभातिशायिनः।**

**रसादीनुपकुर्वन्तोऽलङ्कारास्तेऽङ्गदादिवत्।।**[7] **इति।**

यथा अङ्गदादयः शरीरशोभातिशायिनः शरीरिणमुपकुर्वन्ति, तथाऽनुप्रासोपमादयः शब्दार्थशोभातिशायिनो रसादेरुपकारकाः। अलङ्कारा अस्थिरा इति नैषां गुणवदावश्यकी स्थितिः। अर्थाद् गुणा अपि उत्कर्षकाः सन्ति, किन्तु ते रसस्य स्थिरधर्माः स्वरूपविशेषाः सन्ति। अलङ्काराश्च शब्दार्थयोरस्थिरा धर्माः शब्दार्थद्वारेण च रसमुत्कर्षयन्ति, इदमेव चैषां प्रयोजनं यत् शब्दार्थद्वारेण रसादेरुपकारकत्वम्।

साहित्यशास्त्रे अलङ्कारसौष्ठवस्य अतिमहत्वपूर्णं स्थानं वर्तते। सुष्ठुः शब्दः अतिशयस्य वाचकः। उक्तं च अमरकोशे-

**बलवत्सुष्ठु किमुत स्वत्यतीव च निर्भरे।**[8] **इति।**

**वाचस्पत्यमपि-**

**सु + स्था- कु। 1. प्रशंसायाम् 2. अतिशये अमरः। सत्ये च संक्षिप्तसा.।**

सुष्ठोः भावः भवति सौष्ठवम्। **वाचस्पत्यम्** इति शब्दकोशे सौष्ठवम् इत्यस्मिन् विषये इत्थं निरूपितमस्ति-

**सुष्ठु भद्रं तभ्यः भावः अण् न टिनापः।**

**आतिशय्ये “स सौष्ठवौदार्य्यविशेषशालिनीम्” सिरा।**

अर्थात् साकल्येन अलङ्कारसौष्ठवम् इत्यस्य अर्थः भवति काव्ये उत्कर्षाधानार्थं अलङ्काराणां अपृथग्यत्ननिर्वत्यः समुचितः सन्निवेशः। **सौष्ठवम्** इति शब्देन केवलं अलङ्काराणां प्राचुर्यं न स्वीक्रियते, अपितु अलङ्काराणां यथायोग्यं प्रयोगेण काव्यस्य रससमृद्धिः अपि लक्ष्यीकृता भवति। काव्येऽलङ्काराणां सुष्ठुतया प्रयोगः करणीयः येन रसास्वादः सम्भवेत्। तादृशं काव्यं लोके प्रशंसां प्राप्नोति तथा कवीनामपि यशलाभः भवत्येव।

इदानीमलंकाराणां विभागः क्रियते- शब्दालङ्कारः, अर्थालङ्कारः, शब्दार्थोभयालङ्कारः मिश्रालङ्कारश्च। लक्षणग्रन्थेषु पूर्वं शब्दालंकारस्य निरूपणं क्रियते। यतः शब्दः एवास्माभिः उच्चार्यन्ते श्रूयन्ते च। अर्थालंकारे त्वर्थानुसंधानस्यापेक्षा भवति। शब्दार्थोभयालंकारे च शब्दानामर्थानां च द्वयोरप्यपेक्षा वर्तते। शब्दालङ्कारः, अर्थालङ्कारः, शब्दार्थोभयालंकारः चित्रालङ्कारादयश्च यथाक्रमं काव्ये सौन्दर्यं वर्धयन्ति।

**शब्दालङ्कारः** – शब्दपरिवृत्त्यसहत्वे सति अलङ्कारत्वम् शब्दालङ्कारत्वम्। शब्दालङ्कारे वाक्येषु शब्दानां विशेषतया योजनेन काव्ये सौन्दर्यं वर्धते। ते च शब्दालङ्काराः षट्। तदुक्तं **काव्यप्रकाशसंकेते सोमेश्वरेण-**

**वक्रोक्तिरप्यनुप्रासो यमकं श्लेशचित्रके।**

**पुनरुक्तवदाभासः शब्दालङ्कृतयस्तु षट्।।**[9] **इति।**

**अर्थालङ्कारः–** शब्दपरिवृत्तिसहत्वे सति अलङ्कारत्वम् शब्दालङ्कारत्वम्। अत्र अर्थस्य विशेषानुसन्धानेन प्रबन्धे चमत्कारः आगच्छति। ते च न्यूनाधिक्यव्यवच्छित्तयेकाव्यप्रदीपादौ परिगणिताः। यथा उपमानन्वयः, उपमेयोपमा, उत्प्रेक्षा, सन्देहः रुपकादयश्च।

**शब्दार्थोभयालङ्कारः–** यत्र काव्ये शब्दस्य अर्थस्य च सौन्दर्यं समानभावेन प्रकट्यते, सः शब्दार्थोभयालङ्कारः इति कथ्यते। यथा पुनरुक्तवदाभासादिः।

**चित्रालङ्कारः –** चित्रालङ्कारे बन्धः विशेषस्थानं प्राप्नोति। अस्मिन् अलङ्कारे वर्णानां पदानां वा विशिष्टं क्रमबद्धविन्यासं कर्तुं प्रयत्नः क्रियते। बन्धाः विविधप्रकाराः सन्ति। यथा- सर्वतोभद्रबन्धः, गोमूत्रिकाबन्धः, सर्पिणीबन्धः,श्रृङ्गाटकबन्धादयः। एते बन्धाः न केवलं काव्यस्य अर्थं, अपि तु रुपदृष्टया अपि अपूर्वं सौन्दर्यं विदधाति। काव्ये यदा शब्दरचनया चित्रं रुप्यते, तदा चित्रालङ्कारः पूर्णतया प्रकटितो भवति।

अलङ्काराणां सुष्ठुतया प्रयोगेण काव्यं ग्राह्यम्, रसपूर्णं च भवति। यदा अलङ्काराणां संयोजनं काव्ये स्वाभाविकतया भवन्ति, तदा तादृशं काव्यं सहृदयानां चेतसि अपूर्वं आनन्दं जनयति। परन्तु, यदा काव्ये आवश्यकतां विना अलङ्काराणामतिप्रचुरतया प्रयोगः विधीयते, तदा काव्यं तथा आस्वाद्यं न भवति।

अलङ्कारशास्त्रस्य मूलस्रोतः वर्तते अग्निपुराणम्। अलङ्कारस्य कीदृशं स्थानं काव्ये वर्तते, इति भगवान् वेदव्यासः **अग्निपुराणे** प्रतिपादयति-

**"अर्थालंकाररहिता विधवेव सरस्वती।"**[10] इति

अत्रार्थालङ्काराणां केवलं निर्देशाः कृताः, परन्त्वत्र अलङ्कारशब्देन शब्दालङ्काराणामर्थालङ्काराणां शब्दार्थोभयालङ्काराणां च सर्वेषां ग्रहणं भगवतो वेदव्यासस्याभिप्रेतमिति प्रतिभाति। यदि नाम शब्दालङ्काराणां काव्ये चमत्कारः अपेक्षितः न स्यात्, तदा तस्य निरूपणमेव व्यर्थं भवेत्। नैतावदेव बहवः आचार्याः त्रिविधं संकरमेकविधं संसृष्टिं च स्वीकुर्वन्ति। अतः मिश्रालंकारस्यापि उपादेयता वर्तत एविति मम मतम्।

अग्निपुराणे 343 तमे अध्याये शब्दालङ्काराः निरूपिताः, ते च वृत्यनुप्रासः, यमकं चित्रालङ्कारश्च। एतेषां त्रयाणामलङ्काराणां बहवः भेदाः प्रदर्शिताः। तत्रैव 344 तमे अध्याये अर्थालङ्काराः निरूपिताः वर्तते, ते च – स्वरूपं, सादृश्यं, उत्प्रेक्षा, अतिशयः, विभावना, विरोधः, हेतुः समं च। सन्दर्भेऽस्मिन् तत्र एकः श्लोकः उद्धृतः वर्तते-

**"स्वरूपमथ सादृश्यमुत्प्रेक्षातिशयावपि।**

**विभावना विरोधश्च हेतुश्च सममष्टधा।।"[11] इति**

एतेषां बहवः भेदाः प्रदर्शिताः। एवं च 345 तमे अध्याये शब्दार्थालङ्काराः उल्लिखिताः, ते च प्रशस्तिः, कान्तिः, औचित्यं, संक्षेपः, यावदर्थता, अभिव्यक्तिः। श्लोक वर्तते-

**"प्रशस्तिः कान्तिरौचित्यं संक्षेपोयावदर्थता।**

**अभिव्यक्तिरिति व्यक्तं षड् भेदास्तस्य जाग्रति।।"**[12] इति

एतेषामपि बहवः भेदाः उदीरिताः।

चित्रालङ्कारे कवेः नैपुण्यं प्रतिभाषते। कस्यापि पद्यस्य कुत्रचित् पद्मे भवति, कुत्रचित् मुरजे, कुत्रचित् खड्गे कुत्रचित् गोमूत्रिकाबन्धे च भवति। नैकेषु वस्तुषु तादृशं पद्यं निर्माय तस्य पद्यस्य तथा लेखनं क्रियते, यथा पद्मबन्धादयः सञ्जायन्ते।

इदानीं शब्दालङ्काराणां विषये संक्षेपेण लिख्यते- शब्दालङ्कारेषु प्रायेण आचार्याः अनुप्रासस्य नाम उल्लिखन्ति परन्तु, नाट्यशास्त्रमलङ्कारशास्त्रस्य महानस्तम्भः वर्तते। तत्र भरतमुनिना एकस्यैव यमकस्य नाम गृहीतम्। यमकं चमत्कारपूर्णं भवति। अद्यत्वे शिशुपालवधस्यैकं रमणीयं पद्यं यमकस्य उदाहरणरूपत्वेन जनाः गृह्णन्ति-

**"नवपलाश-पलाशवनं पुरः स्फुटपराग-परागत-पङ्कजम्।**

**मृदुल-तान्त-लतान्तमलोकयत स सुरभिं सुरभिं-सुमनोभरैः।।"**[13] इति

नैकैः आचार्यैः स्वकीयेषु ग्रन्थेषु यमकस्य बहवः भेदाः कृताः। सन्दर्भेऽस्मिन् इत्येवमुक्त्वा विरमामि।

शब्दालङ्कारस्यानन्तरमर्थालङ्कारस्य निरूपणं आचार्याः कुर्वन्ति। नाट्यशास्त्रे भरतमुनिना त्रयः अर्थालङ्काराः निरूपिताः उपमा,रूपकं, दीपकं च। जानन्ति एव सर्वे यत् अर्थालङ्कारेषु उपमालङ्कारस्य प्राधान्यं वर्तते। उपमायाः द्वौ भेदौ भवतः - पूर्णोपमा लुप्तोपमा च। यत्र उपमानस्य, उपमेयस्य, उपमावाचकस्य, सामान्यधर्मस्य च उपादानं भवति तत्र पूर्णोपमा। यत्र एषु कस्यापि एकस्य लोपः भवति, तत्र लुप्तोपमा भवति। पूर्णोपमायाः केचन षड् भेदाः स्वीकुर्वन्ति, केचन च पञ्च। लुप्तोमायाश्च एकोनविंशति भेदान् स्वीकुर्वन्तीति संकलनेन पञ्चविंशति भेदाः प्रायेण भवन्ति। बहवः अर्थालंकाराः एतादृशाः भवन्ति, येषां मूलं भवति उपमा। अतएव इयं शैलुषी कथ्यते।

अर्थालङ्कारेष्वपमायाः अनन्तरमुत्प्रेक्षायाः महत्वपूर्णं स्थानं वर्तते। काव्यप्रकाशे-

**"सम्भावनमथोत्प्रेक्षा प्रकृतस्य समेन यत्।"**[14] इति

उत्प्रेक्षायाः आचार्यमम्मटस्य लक्षणं विद्यते। प्रकृतस्य अर्थात् उपमेयस्य समेन उपमानेन यत्र सम्भावना क्रियते। काव्यप्रकाशे उत्प्रेक्षायाः भेदाः न प्रदर्शिताः परन्तु, विद्यानाथेन स्वकीये प्रतापरुद्रीये बहवः भेदाः भवन्तीति उक्तं, तथापि षड्नवति भेदाः तेन प्रदर्शिताः। अन्येऽपि आचार्यैः उत्प्रेक्षायाः केचन भेदाः दर्शिताः। विद्यानाथेनार्थालङ्कारेषु उत्प्रेक्षायाः सर्वतोधिकाः भेदाः निरूपिताः। अतः विद्यानाथस्य दृष्टौ उत्प्रेक्षालङ्कारे चमत्कारस्य बाहुल्यं विद्यते। यदिनां चमत्कारे बाहुल्यं न स्यात्, तदा एतावन्तः भेदाः न सम्भवन्ति।

शब्दालङ्काराणामर्थालङ्काराणां च निवेशे कविभिः सावधानैः भाव्यमर्थात् यादृशः निवेशः ध्वन्यात्मभूते श्रंगारे अपेक्षितः भवति, येन रसस्य परिपाकः सम्यक् भवेत्। अयं विषयः ध्वन्यालोकस्य द्वितीये उद्योते आनन्दवर्धनाचार्येण अतीव सूक्ष्मेक्षिकया समीक्षितः। यथा-

**"श्रृंगारस्याङ्गिनो यत्नादेकरूपानुबन्धवान्।**

**सर्वेष्वेव प्रभेदेषु नानुप्रासः प्रकाशकः।।"**[15] इति

अर्थात्, यत्र श्रृंगारः प्रधानः भवति, तत्रैकरूपानुबन्धवान् अनुप्रासः कविना न निवेषितव्यः, अन्यथा श्रोतृणामनुप्रासे एव ध्यानमाकृष्टं स्यात्। येन श्रृंगाररसस्यास्वादः सम्यक् न भवेत्। एवमेव-

**“ध्वन्यात्मभूते श्रृंगारे यमकादिनिबन्धनम्।**

**शक्तावपि प्रमादित्वं विप्रलम्भे विशेषतः।।”**[16] इति

यत्र श्रृंगारः रसध्वनिः वर्तते, तत्र कविना यमकादिनां निवेशः न कर्त्तव्यः। विप्रलम्भे तु विशेषरूपेण स्वप्नेऽपि यमकादिनां निवेशः न कर्त्तव्यः। यतः श्रृंगारापेक्षया विप्रलम्भे अधिका कोमलता भवति। तदा इयं जिज्ञासा समुदेति यत् अलङ्काराणां निवेशः कथं कर्त्तव्यः ? तदुक्तम्

**“रसाक्षिप्ततया यस्य बन्धः शक्यक्रियो भवेत्।**

**अपृथग्यत्ननिर्वर्त्यः सोऽलंकारो ध्वनौ मतः।।”**[17] इति

अर्थात्, यः अलङ्कारः पृथग्यत्ननिर्वर्त्यः भवति, तस्य निवेशः वर्ज्यते। यः तु अपृथग्यत्ननिर्वर्त्यः भवति स न वर्ज्यते। अपृथग्यनिर्वर्त्यः इत्यस्य अयं अभिप्रायः रसपरिपाके दत्तचित्तस्य कवेः यत्नेन सह स्वयमेवागच्छति। तादृशे अलङ्कारे रसपरिपाके बाधा न जायते। अतः एतादृशाः अलङ्काराः संग्राह्याः सन्ति। यथा-

**“कपोले पत्राली करतलनिरोधेन मृदिता**

**निपीतो निश्वासैरयममृतहृद्योऽधररसः।**

**मुहुः कण्ठे लग्नस्तरलयति वाष्पः स्तनतटीं**

**प्रियो मन्युर्जातस्तव निरनुरोधे तु वयम्।।”**[18] **इति**

यत्र अलङ्काराः अहमहमिकया प्रतिभावतः कवेः काव्ये आगच्छन्ति, तस्य दृष्टान्तरूपेण स्थानद्वयं ध्वन्यालोके आचार्येण उद्धृतम्। एकं कादम्बरीदर्शनावसरे कादम्बरीग्रन्थे, अथ च द्वितीयं स्थलं सेतुबन्धकाव्ये मायारामादिशिरोदर्शनेन विह्वलायां सीतादेव्यां सेतौ। सेतुबन्धकाव्ये अलङ्काराः स्वयमेव आगच्छन्ति। तेषामलङ्काराणां निवेषाय कवेः पृथग्यत्नाः न भवन्ति, अस्यैवार्थस्य संग्रहश्लोकाः ध्वन्यालोके प्रदर्शिताः। तद्यथा-

**“रसवन्ति हि वस्तूनि सालंकाराणि कानिचित्।**

**एकेनैव प्रयत्नेन निर्वर्त्यन्ते महाकवेः।।**

**यमकादिनिबन्धे तु पृथग्यत्नोऽस्य जायते।**

**शक्तस्यापि रसेऽङ्गत्वं तस्मादेषां न विद्यते।।**

**रसाभासाङ्गभावस्तु यमकादेर्न वार्यते।**

**ध्वन्यात्मभूते श्रृंगारे त्वङ्गता नोपपद्यते।।”**[19] इति

इदानीं ध्वन्यात्मभूतस्य श्रृंगारस्य व्यंजकः अलंकारवर्गः प्रदर्शयते-

**ध्वन्यात्मभूते श्रृंगारे समीक्ष्य विनिवेशितः।**

**रूपकादिरलंकारवर्ग एति यथार्थताम्।।**[20] इति

ध्वन्यात्मभूते श्रृंगारे यत्र ध्वन्यात्मभूतः, तत्र रूपकादिरलङ्कारवर्गः समीक्ष्य यदि विनिवेशितः स्यात्, तदा सः यथार्थतां भजते। यथार्थतामित्यस्याभिप्रायः वर्तते अलङ्कारताम्। अलङ्करोति अलङ्कारः यः कस्यापि अन्यस्य शोभां वर्धयति सः अलङ्कारः भवति। अग्रे समीक्षा कथं कर्त्तव्या इति दर्शयति आचार्यः-

**विवक्षा तत्परत्वेन नाङ्गित्वेन कदाचन।**

**काले च ग्रहणत्यागौ नातिनिर्बर्हणैषिता।।**

**निर्व्यूढावपि चाङ्गत्वे यत्नेन प्रत्यवेक्षणम्।**

**रूपकादिरलंकारवर्गस्याङ्गत्वसाधनम्।।**[21] इति

अर्थात्, अलङ्काराणां निवेशः अङ्गरूपेण सदैव कर्त्तव्यः, कदाचिदपि अङ्गीरूपेण न। अथ च यत्रालङ्कारस्य ग्रहणमुचितं स्यात् तत्र ग्रहणं कर्त्तव्यं, यत्र त्यागः अपि उचितः स्यात् तत्र त्यागः अपि कर्त्तव्यः। तस्यालङ्कारस्याग्रेऽपि निर्वहण् भवेत्। नैतावदेव अलङ्काराणां निवेशः जातेपि पौनःपुन्येन अनुशीलनं कर्त्तव्यं यत् अस्यालङ्कारस्य निवेशः अङ्गरूपेण संजातः न अङ्गीरूपेण। इत्थं रूपकादिरलङ्कारस्याङ्गत्वसाधनं सम्यकोपपद्यते। अत्राभिज्ञानशाकुन्तलस्य एकमुदाहरणमुद्धृतम्-

**"चलापाङ्गा दृष्टिं स्पृशसि बहुशो वेपुथमती,**

**रहस्याख्यायीव स्वनसि मृदुः कर्णान्तिक चरः।**

**करौ व्याधुनवत्याः पिबसि रतिसर्वस्वमधरं,**

**वयं तत्त्वान्वेषान्मधुकरः हतास्त्वं खलु कृती।।"**[22] इति

इत्थमस्य प्रसङ्गस्य यादृशी समीक्षा ध्वन्यालोके कृता तस्यानुशीलनेन महानलाभः स्यादिति।

शब्दार्थोभयालङ्काराः अपि अलङ्कारशास्त्रे महत्वपूर्णं स्थानं भजते। शब्दालङ्कारे केवलं शब्दे एव चमत्कारः भवति, अर्थालङ्कारे अर्थे एव चमत्कारः भवति। शब्दार्थोभयालङ्कारे तु शब्दे अर्थे च उभयत्र चमत्कारः भवति। अत्र दृष्टान्तरूपेण भगवता वेदव्यासस्य अग्निपुराणे उद्धृतं पद्यं लिखामि-

**“शब्दार्थयोरलंकारो द्वावलङ्कुरुते समम्।**

**एकत्र निहितो हारः स्तनं ग्रीवामिव स्त्रियाः।।”**[23] इति

विभिनेषु ग्रन्थेषु शब्दार्थोभयालङ्कारस्य भिन्नाः-भिन्नाः संख्याः प्रदर्शिताः।

मिश्रालङ्कारे त्रिविधः संकरः एका च संसृष्टिः आयाति। त्रिविधेषु संकरेषु भिन्ना-भिन्ना चमत्काराः अनुभूयन्ते। संसृष्टि तु एका वर्तत एव। नीरक्षीरन्यायेन संकरःभवति, तिलतण्डुलन्यायेन संसृष्टिः भवति। अतः मिश्रालङ्कारस्याप्यलंकारशास्त्रे महत्वपूर्णं स्थानं वर्तते।

अलङ्काराणामोपयोगः सर्वत्र सार्थकः एव न भवति। कुत्रचित् सार्थकः कुत्रचित् निरर्थकः। अस्य विचारः काव्यप्रकाशे आचार्यमम्मटेन सम्यक्कृतः। यथा-

**“उपकुर्वन्ति तं सन्तं येऽङ्गद्वारेण जातुचित्।**

**हारादिवदलंकारास्तेऽनुप्रासोपमादयः।।”**[24] इति

अलङ्काराणां निवेशे कदा काव्ये चमत्काराः आयाति, कदा च न आयाति, इत्यत्र त्रयः पक्षाः प्रदर्शिताः। तत्र प्रथमः पक्षः वर्तते- “शब्दालङ्काराः शब्दस्य माध्यमेन अर्थालङ्काराः अर्थस्य माध्यमेन यत्र परम्परया रसमुपकुर्वन्ति।” यथा हारादयः अलङ्काराः तान् हाराद्यलङ्कारान् ये धारयन्ति, तेषां शोभां वर्धयन्ति, इति प्रथमस्य पक्षस्याभिप्रायः। यथा-

**अपसारय घनसारं कुरु हारं दूर एव किं कमलैः।**

**अलमलमालिमृणालैरिति वदति दिवानिशं बाला।।**[25] इति

**द्वितीयपक्षः**- यत्र काव्ये रसः न तिष्ठति, तत्र कुरूपया नायिकया अङ्गेषु धृताः अलङ्काराः यथा शोभां न वर्धयन्ति, तथैव रसरहिते काव्येऽपि समाना परिस्थिति भवतीति द्वितीयस्य पक्षस्याशयः। यथा-

**“मनोरागस्तीव्रं विषमिव विसर्पत्यविरतं**

**प्रमाथी निर्धूमं ज्वलति विधुतः पावक इव।**

**हिनस्ति प्रत्यङ्गं ज्वर इव गरीयानित इतो**

**न मां त्रातुं तातः प्रभवति न चाम्बा न भवती।।”**[26] इति

**अथ तृतीय पक्षः**- कुत्रचित् काव्ये यथा रमणीयायाः अङ्गेषु ग्रहीताः, तस्याः शोभां न वर्धयन्ति, तथैव यत्र काव्ये यादृशः अलङ्कारः अपेक्षितः वर्तते, तादृशः यदि निवेशः नास्ति, तदा तस्यालङ्कारस्य किमपि औचित्यं न स्यात्, इति तृतीयपक्षस्याशयः। यथा-

**“चित्ते विघटते न त्रुटयति सा गुणेषु**

**शय्यासु लुठति विसर्पति दिङ्मुखेषु।**

**वचने वर्तते प्रवर्तते काव्यबन्धे**

**ध्याने न त्रुटयति चिरं तरूणी प्रगल्भा।।”**[27] इति

एतेषां त्रयाणामपि पक्षाणामुदाहरणं काव्यप्रकाशस्याष्टमोऽल्लासे प्रदर्शितं यस्योल्लेखः मयापि कृतः। एतेषां त्रयाणां पक्षाणां समाना अन्ये अभिप्रायाः विद्यन्ते यतः कवयः अलङ्काराणां निवेशे स्वतन्त्राः न भवन्ति। ये खलु तादृशाः सिद्धाः कवयः भवन्ति, तेषां काव्ये अलङ्काराणां निवेशः समुचितः भवति। अतः चमत्कारे उत्कर्षः स्वयमेव आयाति। ये खलु कुकवयः भवन्ति, तेषामज्ञानेन काव्ये अलङ्काराणां निवेशे या त्रुटि जायते, तस्य प्रभावः तस्मिन् काव्ये स्पष्टं प्रतीयते। अतएव कवयः अपि द्विविधाः भवन्ति- कुकवयः सुकवयश्च। यथा लोके षड्रसाः भवन्ति, ते च माधुर्यादयः तेषामपि उपयोगः यदि अधिकः न क्रियते अथवा न्यूनः न क्रियते तदेव व्यञ्जनस्य परिपाकः सम्यक् भवति तथैव काव्येऽपि समाना परिस्थिति वर्तते।

## अलङ्कारसौष्ठवस्य कानिचन उदाहरणानि

कालिदासीयकृतिषु अलङ्कारः अपृथग्यननिर्वत्यः भवति। काव्ये शब्दालङ्काराणां समायोजने तेन कदापि पृथग्श्रमः न कृतः। तद्यथानुप्रासे-

**अथ प्रजानामधिपः प्रभाते, जायाप्रतिग्राहित-गन्धमाल्याम्।**

**वनाय पीतप्रतिबद्धवत्सां, यशोधनो धेनुमृषेर्मुमोच।।[28] इति।।**

अत्र प इतिवर्णस्य प्राचुर्यत्वेऽपि पत्नीप्रतिग्राहित इत्यस्य स्थाने जायाप्रतिग्राहित इति प्रयोगः कवेः धर्मशास्त्रीय पाण्डित्यं प्रकटयति।

**यमकेऽपि-**

**ततो मृगेन्द्रस्य मृगेन्द्रगामी, वधाय वध्यस्य शरं शरण्यः।**

**जाताभिषङ्गो नृपतिर्निषङ्गाद्, उद्धर्तुमैच्छत्प्रसभोद्धृतारिः।।[29] इति।**

अत्र गोः सेवाप्रसंगे सिंहात् नन्दिन्याः त्राणे यमकस्य प्रयोगः वीररसं पुष्णाति।

**चन्द्रंगता पद्मगुणान्न भुङ्क्ते,पद्माश्रिता चान्द्रमसीमभिख्याम्**

**उमामुखं तु प्रतिपद्य लोला, द्विसंश्रयां प्रीतिमवाप लक्ष्मीः।।[30] इति।**

अत्रोपमायाः अनायासेन संयोजन सहृदयानां मनः रञ्जयति।

**संचारिणी दीपशिखेव रात्रौ, यं यं व्यतीयाय पतिंवरा सा।**

**नरेन्द्रमार्गाट्ट इव प्रपेदे, विवर्णभावं स स भूमिपालः॥[31] इति।**

अस्मिन् श्लोके इन्दुमत्याः दीपशिखया सह साद्दश्यं प्रतिपादयन् कविः उपमायाः सौष्ठवं प्रदर्श्य काव्यवासनारिपक्काणां जनानां चेतसि अपूर्व आनन्दं जनयति।

**हरस्तु किंचित्परिलुप्तधैर्यश्चन्द्रोदयारम्भ इवाम्बुराशिः।**

**उमामुखे बिम्बफलाधरोष्ठे व्यापारयामास विलोचनानि।।[32] इति।**

कुमारसम्भवे तृतीयसर्गे कामस्य बाणसन्धानेन शिवस्य धैर्यं तथा भग्नं यथा चन्द्रस्य उदये समुद्रस्य स्थितिः, तस्मिन् तरङ्गाः उद्भवितुं आरभन्ते, उपमायाः एतादृशं वर्णनम् उपमा कालिदासस्य इत्युक्तिं चरितार्थं करोति।

## उपसंहारः

अखिलसंस्कृतवाङ्मये काव्यसंघटकतत्त्वानां मध्ये अलङ्काराणामतीव महत्त्वपूर्णं स्थानं वर्तते। शब्दगतचारुत्वहेतवः शब्दालङ्काराः, अर्थगतचारुत्वहेतवः अर्थालङ्काराः, शब्दार्थोभयगतचारुत्व-हेतवः भवन्ति शब्दार्थोभयालङ्काराः। कुत्रचित् पद्मबन्धादयोऽपि काव्ये अपूर्वं सौन्दर्यं विदधति। एते न केवलं सौन्दर्यवर्धनाय, परम्परया रसोत्कर्षस्य साधनमपि भवन्ति। अलङ्काराणामौचित्यपूर्वकमपृथग्यत्ननिर्वर्त्यसमायोजनमेव रसोपकारकं भवति, अन्यथा तु आभरणमात्रमेव।

### पादटीकाः

1. काव्य.सू.वृ.1/1/1
2. काव्य.सू.वृ.1/1/1
3. काव्यादर्श 2/1
4. काव्यालङ्कार 1/13
5. काव्यप्रकाश 8/67
6. चन्द्रालोक 1/8
7. सा.दर्पण 10/1
8. अ.कोश 3/4/2
9. का.प्र. बालबोधिनि, उल्लास-9
10. अग्निपुराणं, अध्यायः 344, श्लोकसंख्या 2
11. अग्निपुराणं, अध्यायः 344, श्लोकसंख्या- 3
12. अग्निपुराणं, अध्यायः 345, श्लोकसंख्या- 2
13. शिशुपालपधम्, षष्ठः सर्गः, श्लोकसंख्या- 2
14. काव्यप्रकाशः, दशमोऽल्लासः, सूत्र 136
15. ध्वन्यालोकः, द्वितीयः उद्योतः, कारिका संख्या- 14
16. ध्वन्यालोकः, द्वितीयः उद्योतः, कारिका संख्या- 15

17. ध्वन्यालोकः, द्वितीयः उद्योतः, कारिका संख्या 16
18. ध्वन्यालोकः, द्वितीयः उद्योतः, श्लोकसंख्या 16(उदाहरण)
19. ध्वन्यालोकः, द्वितीयः उद्योतः, कारिकासंख्या- 16(संग्रहश्लोक)
20. ध्वन्यालोकः, द्वितीयः उद्योतः, कारिकासंख्या- 17
21. ध्वन्यालोकः, द्वितीयः उद्योतः, कारिकाशंख्या 18-19
22. अभिज्ञानशाकुन्तलम्, प्रथमोऽङ्कः, श्लोकसंख्या 20
23. अग्निपुराणम्
24. का.प्र. 8/67
25. का.प्र., 8/341
26. का.प्र. 8/342
27. का.प्र. 8/343
28. रघुवंश 2/1
29. रघुवंश 2/30
30. कुमारसम्भव 1/43
31. रघुवंश 6/67
32. कुमारसम्भव 3/67

## सन्दर्भग्रन्थसूची-


1. चतुर्वेदी, शारदा. *शिशुपालवधम् (आशुबोधिनी संस्कृत-हिन्दी व्याख्या)*. वाराणसी: चौखम्बा संस्कृत अकादमी, 2020.
2. द्विवेदी, कपिलदेव. *अभिज्ञानशाकुन्तलम् (भारती टीका)*. इलाहाबाद: रामनारायणलाल विजयकुमार, 2023.
3. पांडेयः, प्रद्युम्न. *कुमारसंभवम् (प्रकाश व्याख्या)* . वाराणसी: चौखम्बा विद्याभवनम्, 2016.
4. पाठकः, जगन्नाथ. *ध्वन्यालोकः (प्रकाशटीका.* वाराणसी: चौखम्बा विद्याभवनम् , 2014.
5. रामभट्टः वामनाचार्यः. *काव्यप्रकाशः (बालबोधिनि)*. देलही: चौखम्भा संस्कृत प्रतिष्ठानम्, 2013.
6. शर्मा, देवेन्द्रनाथ. *काव्यालंकारः*. पटना: बिहार राष्ट्रभाषा परिषद्, 1985.
7. शास्त्री, देवर्षि सनाढ्य. *नैषधीयचरितम् (चन्द्रिका व्याख्या)*. वाराणसी: चौखम्बा कृष्णदास अकादमी, 2013.
8. शुक्लः, बाबुलाल. *नाट्यसास्त्रम् (प्रदीप व्याख्या),*. वाराणसी: चौखम्भा संस्कृत संस्थानम्, 2020.

# वैज्ञानिकविचारसम्बलितं ज्यौतिषं शास्त्रम्

डॉ. ज्योतिप्रसाददाशः
सहायकाचार्यः(सं), ज्योतिषविभागः
के.सं.विश्वविद्यालयः, श्रीसदाशिवपरिसरः, पुरी

वेदकालात्प्रभृतिज्यौतिषशास्त्रस्य परम्परा महत्त्वपूर्णतयाऽद्यावधि विद्वत्सु समादरयुक्ता वर्तते। षड्वेदाङ्गेषु शिक्षाकल्पव्याकरणनिरुक्तज्यौतिषच्छन्दस्सु ज्यौतिषस्याऽपि स्थानं सुष्टुतया गण्यते। पुरा यज्ञस्य कृते कालगणनाया आवश्यकता भवति स्म। दर्शपौर्णमासयोः कालः कदा भविष्यति, उत वाऽमुकनक्षत्रं कदोदेष्यति, अद्य का तिथिरस्ति, इति सर्वस्य ज्ञानाय कालविधानशास्त्रस्याऽऽवश्यकता वरीवर्ति। एतामावश्यकतामनुभूय वैदिकमहर्षिभिः कालगणनाशास्त्रमकारि। एतत्कालगणनाशास्त्रमेव ज्यौतिषशास्त्रनाम्नाऽभिहितम्। अतएव वेदाङ्गज्यौतिषे लिखितं वर्तते-

**वेदा हि यज्ञार्थमभिप्रवृत्ताः कालानुपूर्व्या विहिताश्च यज्ञाः।**

**तस्मादिदं कालविधानशास्त्रं यो ज्यौतिषं वेद स वेद यज्ञान्।।**[1]

वेदानां प्रयोजनं यज्ञार्थमेव। यज्ञाः कालज्ञानं विना न कर्तुं शक्याः। एतस्मात्कारणात्काल-ज्ञानशास्त्रमपेक्षते। एतत्तु ज्यौतिषशास्त्रमेव। ज्यौतिषशास्त्रद्वारा वैदिकाः कालज्ञानं विधाय यज्ञानां सम्पादनं सम्यक्तया कुर्वन्ति स्मेति प्रमाणितं भवति। समाजे तस्य यज्ञस्य सफलता दृश्यते एव। अतएव ज्यौतिषशास्त्रस्य वैदिककाले कालगणनायाः कृत आवश्यकताऽऽसीदिति सर्वैरेव ज्ञायते। परन्तु शास्त्रमेतदद्यत्वे कालगणनां विदधाति, शुभाशुभस्य फलस्याऽपि द्योतनं करोति। ज्योतिर्विज्ञानस्य विषये सर्वत्र प्रश्नोऽयमायाति यदेतच्छास्त्रं वैज्ञानिकमस्ति अथवा नास्त्यस्य वैज्ञानिकत्वम् ? एतस्मिन् प्रश्ने सति सर्वप्रथममेतद् द्रष्टुं शक्यते यद्वैदिककाले ज्यौतिषसम्बद्धं यत्किञ्चिदुपलभ्यते तत्र वैज्ञानिकत्वमस्ति उत नास्ति?

पृथिव्या आकारो गोल इति न नवीनं मतमपितु ऋग्वेदसंहितायामुक्तमस्ति यत्पृथिवी गोलाकारा वर्तते –

**चक्राणासः परीणहं पृथिव्या हिरण्येन मणिना शुम्भमाना।**

**न हिन्वानासस्ततिरुस्त इन्द्रं परि स्पर्शो अदधात् सूर्येण।।**[2]

एवमेव **गोपथब्राह्मणे**[3] पृथिव्याः गोलाकारत्वं निराधारत्वं चोररीकृतम्। भास्कराचार्येण सिद्धान्तशिरोमणेर्गोलाध्याये[4] प्रोक्तं यत्पृथिवी निराधारा सती स्वशक्त्याऽऽकाशेऽवलम्बिताऽस्ति। अस्या गोलत्वमपि प्रसिद्धमेव। वैज्ञानिका अपि स्वीकुर्वन्ति पृथिव्या निराधारत्त्वं गोलत्वञ्च। ऋग्वेदकाले ज्यौतिषस्य पर्याप्तं ज्ञानं जनेषु वर्तते स्म। यतो ह्येकस्मिन् मन्त्रे भचक्रस्य भ्रमणं दर्शितम्। तत्रोक्तं वर्तते यद्वादशारं चक्रमृतस्य भ्रमति कदापि जरां न गच्छति। तत्र विंशत्युत्तरसप्तशतानि पुत्रमिथुनानि तस्थुः।[5] अत्र द्वादशारस्य तात्पर्यं द्वादशमासा इति कर्तुं युज्यते। विंशत्युत्तरसप्तशतानि वर्षेऽहोरात्ररूपाणि भवितुमर्हन्ति। एकस्मिन्नपरे मन्त्रे द्वादशपरिधीनां नाभित्रयस्य षष्ट्युत्तरत्रिशतदिनानां च समुल्लेखो वर्तते-

**द्वादश प्रधयश्चक्रमेकं त्रीणि नभ्यानि क उ तच्चिकेत।**

**तस्मिन्त्साकं त्रिंशता न श्ङ्कवोऽर्पिताः षष्टिर्न चलाचलासः।।**[6]

एतत्सर्वं वेदे वर्णितम्। अत्रापि द्वादश प्रधयो द्वादशमासत्वेन निगदिताः। नाभित्रयं केन्द्रत्रयं वर्षे दिनसङ्ख्या च ३६० उक्ता। किमेतत्सर्वं वैज्ञानिकं नास्ति ? यदि ऋग्वेदस्य कथनमत्र किञ्चिदपि विज्ञानपरं वर्तते तर्हि ज्यौतिषशास्त्रस्य वैज्ञानिकतापक्षे काऽपि विप्रतिपत्तिर्न भवितुमर्हति। द्वादशमासातिरिक्तमधिमासस्यापि ज्ञानं वेदे सम्प्राप्यते। अतो वैज्ञानिकता ज्यौतिषस्य तस्मिन्कालेऽपि प्रमाणीभवति।

## ज्यौतिषशास्त्रस्य स्कन्धत्रयाणां वैज्ञानिकत्वम्

ज्यौतिषशास्त्रस्य विभाजनं त्रिषु स्कन्धेषु क्रियते सिद्धान्तसंहिताहोराभेदैः।[7] सिद्धान्तज्यौतिषे ग्रहाणां स्पष्टीकरणार्थं गाणितिकी विधिर्वर्तते। सिद्धान्तज्यौतिषमपि सिद्धान्ततन्त्रकरणभेदैः त्रिधा विभज्यते। सृष्ट्यादितो ग्रहाणां स्पष्टीकरणार्थं गणितसिद्धान्ताः सिद्धान्ते वर्णिताः। कलियुगाद् ग्रहाणां स्पष्टीकरणं यत्र विधीयते तत् तन्त्रमित्यभिधीयते। इष्टसंवत्सरात्स्पष्टीकरणं ग्रहाणां यत्र गणितद्वारा कथ्यते तत् करणमित्युच्यते। एवं सिद्धान्तज्यौतिषे गणितज्यौतिषस्य स्थितिर्मन्तव्या। संहिताज्यौतिषेऽनेकेविषया आयान्ति यथा-संवत्सरस्य शुभाशुभम्, भूकम्पेन्द्रधनुष-धूमकेतुग्रहचाराणां फलाफलत्वं, मेदिनीयज्यौतिषम्, वास्तुशास्त्रम्, स्त्रीपुरुषपश्वादीनां लक्षणम्, शकुनम्, सामुद्रिकशास्त्रमङ्गस्फुरणमुहूर्तादि च। होराज्यौतिषशास्त्रे जातकशास्त्रमायाति। यथा-जन्मकुण्डलीद्वारा जातकस्य शुभाशुभफलत्वं, दशान्तर्दशाः, अष्टकवर्गाः, आयुर्दायः, राजयोगाः, स्त्रीजातकम्, ताजिकशास्त्रञ्चेति। प्रश्नज्यौतिषमपि ताजिकशास्त्रे एवाऽऽयाति। ज्यौतिषस्य एतेषु त्रिष्वपि स्कन्धेषु वैज्ञानिकत्वं कथं दरीदृश्यत इति विचारोऽत्र कृतः।

विज्ञानस्य किं लक्षणमिति प्रश्ने सति वक्तुं शक्यते यद् यत्र सिद्धान्तानां प्रायोगिकपक्षे नाम विविधयन्त्रैः शुद्धपरिणामा आयान्ति, अपवादा विप्रतिपत्तयो वा न भवन्ति, अतिन्यूना वा भवन्ति स विषय एव विज्ञानस्य। एतदपि कथयितुं शक्यते यद् यस्मिन् विषये निश्चितरूपेण शुद्धपरिणामः प्राप्यते तदेव विज्ञानमुच्यते। ज्यौतिषशास्त्रीया विषयाः वैज्ञानिकाः सन्ति, अथवा न सन्ति? एतस्मिन् सन्दर्भेऽत्र त्रिषु ज्यौतिषस्कन्धेषु के के विषया वैज्ञानिका इति विचारयितुं तत्र दृष्टिपातो विधेयः। अनेन ज्योतिर्विज्ञानस्य वैज्ञानिकत्वं ज्ञातुं शक्यते-

## आदौ तावत् सिद्धान्तज्यौतिषस्य वैज्ञानिकत्वम्-

सिद्धान्तज्यौतिषं गणितोपरि समाधृतं वर्तते। गणितशास्त्रस्य वैज्ञानिकत्वमस्त्येव। नास्ति कस्यचिद् वैज्ञानिकस्य विषयेऽस्मिन् विप्रतिपत्तिः। भारतवर्षे प्राचीनकालत एव गणितशास्त्रस्य सम्यक् ज्ञानं जनेषु वर्तते। वैज्ञानिकाः कथयन्ति यत् पाइथागोरसप्रमेयः पाइथागोरसमहोदयेनाऽन्विष्टः। परन्तु नास्त्येतत्सत्यम्। पाइथागोरसप्रमेयः सम्यक्तया

बौधायनशुल्बसूत्रे समुद्धृतः। आयतस्य तिर्यङ्मानी पार्श्वमानी च द्वे भुजे यद्वर्गं साधयतस्तदुभययोगतुल्योऽक्ष्ण्यारज्जुवर्गो भवति-

**दीर्घचतुरश्रस्याक्ष्ण्या रज्जुः पार्श्वमानी तिर्यमानी च यत्पृथग्भूते कुरुतस्तदुभयं करोति।**[8]

पाइथागोरसमहोदयस्य समयः ५४० ईसवीपूर्वमिति मन्यते। बौधायनस्य समयश्च १००० ईसवीपूर्वोऽस्ति। बौधायनमहोदयेत गणितस्यैषः प्रमेयः पूर्वमेव प्रोक्तः।।[9]

मानवशुल्बसूत्रे पाई मानस्य समीकरणमित्थं लिखितुं शक्यते-

आर्किमेदीमहोदयेन यत्पाईमानं 22/7 स्वीकृतं तत्तु ३.१४२८ सङ्ख्यात्मकं पूर्वमानीतपाईमानतुल्यं वर्तते। आर्यभट्टेन ४९९ तमे ख्रीस्ताब्दे पाईमानमेतस्मादपि सूक्ष्मतरं साधितम्।[10] त्रिकोणमितिर्दशमलवप्रणाली बीजगणितम्, रेखागणितम्, गोलीयरेखागणितम्, चापीयत्रिकोणमिति-श्वेत्यादिगणितशास्त्रीया विषयाः प्राचीनकालादेव भारतवर्षे प्रख्यापिता आसन्। सिद्धान्तज्यौतिषं तु गणितशास्त्रेऽवलम्बितं वर्तते। यदि गणितशास्वस्य वैज्ञानिकता मन्येत तर्हि सिद्धान्तज्यौतिषस्यापि वैज्ञानिकत्वमवश्यमेव स्वीकुर्युर्विद्वांस इति।

ज्यौतिषस्य सिद्धान्तग्रन्थेषु वैज्ञानिकसिद्धान्ता अपि दरीदृश्यन्ते। गुरुत्वाकर्षण-सिद्धान्तोऽद्यापि न्यूटनमहोदयेन प्रत्यपादि, मिथ्यैषा चर्चा सर्वत्र प्रचलति। न्यूटनमहोदयात् पूर्वमेव भास्कराचार्यमहोदयेन सिद्धान्तशिरोमणिग्रन्थस्य गोलाध्याये पृथिव्याः गुरुत्वाकर्षणशक्तेर्विवेचनमकारि। भास्कराचार्यः प्रोक्तवान् यदेषा पृथिवी समाकर्षणशक्तियुता वर्तते। स्वाकर्षणशक्त्या पृथिवी सर्वाणि वस्तूनि स्वं प्रत्याकर्षति। अतएव वस्तु पृथिव्यां पततीवेति दृश्यते-

**आकृष्टिशक्तिश्च मही तथा यत् खस्थं गुरु स्वाभिमुखं स्वशक्त्या।**

**आकृष्यते तत्पततीव भाति, समे समन्ताद् क्व पतत्वियं खे।।**[11]

एष सिद्धान्तो भौतिकविज्ञानेनऽङ्गीकृतः। किमेतद् वैज्ञानिकं नास्ति ? पृथिवी गतिशीलाऽस्ति। आर्यभट्टेन सर्वप्रथमवोचि यत्पृथिवी दैनन्दिनं भ्रमति स्वधुर्याम्। आर्यभटीयग्रन्थस्य रचयिता प्रथम आर्यभट्टो मनुते यद्भूमिरचला नास्ति यथोक्तं गोलपादे-

**अनुलोमगतिर्नौस्थः पश्यत्यचलं विलोमगं यद्वत्।**

**अचलानि भानि तद्वत् समपश्चिमगानि लङ्कायाम्।।** [12]

कश्चिन्नौकारुढः मनुष्यो यथाऽनुलोमगमनात् स्थिरान् वृक्षादीन् विपरीतदिग्गामिभूतान् इव पश्यति तथैव पृथिव्या भ्रमणेन भचक्रं लङ्कातः समानान्तरगतयोर्याम्योत्तराशयोः समगत्या भ्रमद् दृश्यते। अतएव भूमेर्गतिर्यथा वैज्ञानिकैः स्वीकृता तथैव सिद्धान्तज्यौतिष-ग्रन्थेऽपि सुष्टुतयाऽङ्गीक्रियते। अतएवाऽऽर्यभट्टेन भगणादिमानेषु नक्षत्रभ्रममलिखित्वा भूभ्रम एव लिखितः। पृथिवी प्राणकालपरिमाणे कलामात्रात्मिकां गतिं करोति। अतएव पृथिव्याः गतिरार्यभट्टानुसारम्- पृथिव्याः गतिः = (पल/6) समये, १ कला।

प्राणकालपरिमाणं पलषष्ठांशतुल्यं भवति। एतत्सर्वं वैज्ञानिकं कथं न भवितुमर्हति। रवि-सोम-मङ्गल-बुध-गुरु-शुक्र-शनिवाराणां क्रमः सर्वथा वैज्ञानिक एवाऽस्ति। आधुनिकविज्ञानमपि वाराणां क्रमस्य रहस्यं न जानाति। एतस्य रहस्यं तदैव वक्तुं शक्यते यदा सिद्धान्तज्यौतिषे होराकालविभागस्याऽध्ययनं क्रियते। ग्रहाणां कक्षाक्रमो ज्यौतिषशास्त्रे निगदितः-

शनिबृहस्पतिभौमरविशुक्रबुधचन्द्राः क्रमेण पृथिवीतो दूरे सन्ति। खगोलेऽयमेव ग्रहकक्षाक्रमः। यथोक्तमार्यभट्टीये-

**भानामधः शनैश्चरसुरगुरुभौमार्कशुक्रबुधचन्द्राः।**

**तेषामधश्च भूमिर्मेधीभूता खमध्यस्थाः।।**[13]

अहोरात्रस्य चतुर्विंशतिविभागाः होराभिधेया भवन्ति। शनैश्चर-गुरु-भौम-रवि-शुक्र-बुध-चन्द्राणामहोरात्रे तिस्र आवृत्तयः भवन्ति, एवमेकविंशतिहोरा व्यतीताः। ततो होरात्रयं व्यतीत्य पुनः चतुर्थी होराऽपरदिने भवति। यस्य ग्रहस्य होरा स एव होरेशो मन्यते। सूर्योदयकाले दिनारम्भे यस्य ग्रहस्य होरा तद् ग्रहाभिधानं दिनं भवति। एवं कस्माच्चित् कक्षाग्रहाच्चतुर्थः कक्षाग्रह एव दिनपो भवति।

तद्यथा-

**सप्तैते होरेशाः शनैश्चराद्या यथाक्रमं शीघ्राः।**

**शीघ्रक्रमाच्चतुर्था भवन्ति सूर्योदयाद् दिनपाः।।**[14]

आर्षे सूर्यसिद्धान्तेऽपि वाराणां क्रमविषये वाक्यमेतादृशमेव प्राप्यते।

**मन्दादधः क्रमेण स्युश्चतुर्था दिवसाधिपाः।**

**होरेशाः सूर्यतनयादधोऽधः क्रमशस्तथा।।**[15]

वारोत्पत्तिप्रसङ्गे वाराणामेष क्रमः परमवैज्ञानिकोऽस्ति, किन्तु ज्यौतिषस्य सिद्धान्तग्रन्थं विहाय कुत्रापि नोल्लिखितम्। एतस्मात् सिद्धान्तज्यौतिषं कथं वैज्ञानिकं न स्यादिति। एवं ज्यौतिषशास्त्रस्य वैज्ञानिकता सर्वथा प्रामाण्यमुपगच्छति।

सिद्धान्तज्यौतिषे ग्रहाणां स्पष्टीकरणं क्रियते। ग्रहाणां स्पष्टीकरणं खगोलज्ञानं विना न सम्भवति। भास्कराचार्येण सिद्धान्तशिरोमणेर्गोलाध्याये यत् खगोलस्य वर्णनं व्यधायि तद्वर्णनं सर्वाङ्गीणतया वैज्ञानिकपदवीं स्पृशति। खगोलवर्णने याम्योत्तरवृत्तम्, पूर्वापरवृत्तम्, खस्वस्तिकम्, नाडीवृत्तम्, अहोरात्रवृत्तं कदम्बप्रोतञ्च यत्कल्पितं तत्सर्वं वैज्ञानिकमेवाऽस्ति। क्रान्तिवृत्ते द्वादशराशयः सप्तविंशतिनक्षत्राणि च प्रकल्पितानि। पृथिव्या अक्षांशदेशान्तररेखाणां प्रकल्पनं सिद्धान्तज्यौतिषे यद्विहितं तत्सर्वं विज्ञानसम्मतमेव। यदि सङ्क्षिप्ततया खगोलमण्डलस्य वर्णनमत्र कृतं स्यात्तर्हि स्वयमेव सिद्धान्तज्यौतिषस्य वैज्ञानिकता स्पष्टतामुपगच्छति।

सर्वप्रथममत्र सुमेरुपर्वतो मेरुस्थानं वा कुत्राऽस्तीति ज्ञातव्यम्। ज्यौतिषशास्त्रानुसारं यत्र ध्रुवतारा शिरस्युपरि दृश्यते तत्स्थानमेव मेरुः। उत्तरदिशि सुमेरुर्दक्षिणस्यां च कुमेरुः स्थितः। सुमेरुर्देवतानां स्थानं, कुमेरुश्च राक्षसानां स्थानं प्राचीनैः प्रोक्तम्-

**कुवृत्तपादान्तरितानि तानि स्थानानि षड्गोलविदो वदन्ति।**

**वसन्ति मेरौ सुरसिद्धसङ्घा और्वे च सर्वे नरकाः सदैत्याः।।**[16]

उत्तरध्रुवे षण्मासात्मकं दिनं दक्षिणध्रुवे च षण्मासात्मिका रात्रिर्भवति। अतएव मेरौ दिशा कल्पना न विधातव्या –

**मेरौ रविभ्रमति भू-जगतः समन्ताद्।**

**आशा न काचिदपि तत्र विचारणीया।।**[17]

ध्रुवबिन्दुतो नवत्यंशदूरे नाडीवृत्तमस्ति। अत्राऽक्षांशशून्यता दृश्यते। एतत्स्थानमेव निरक्षदेश इत्युच्यते। ऊर्ध्वाधरखमध्ययोर्ध्रुवयोर्गतं वृत्तं याम्योत्तरवृत्तं कथ्यते। ध्रुवस्थानाच्चतुर्विंशतिभागांशचापे कदम्बभ्रमवृत्ते कदम्बताराऽस्ति। कदम्बतारां केन्द्रमत्वा नवत्यंशात्मकेन चापेन यवृत्तं कल्पितं तदेव क्रान्तिवृत्तं भवितुमर्हति। नाडीवृत्तक्रान्तिवृत्तयोः सम्पातबिन्दुरेव क्रान्तिपात इत्युच्यते। अत्र प्रथमः सम्पातः सायनमेषादि वसन्तसम्पातोऽपरश्च सायनतुलादि शरत्सम्पातः इत्युच्यते। क्रान्तिवृत्तस्या-ऽपरनाम राशिवृत्तमपि वर्तते। क्रान्तिवृत्तस्य ३६० अंशात्मकस्य विभाजनं द्वादशभागेषु यदा क्रियते तर्हि = ३० अंशात्मिका मेषादिराशिर्भवति। यदि क्रान्तिवृत्तस्य 360 ÷ 27= 13.20 इति नक्षत्रपरिमाणं स्वीक्रियते। क्रान्तिवृत्तस्य बहिरङ्गत्वादभिजिन्नक्षत्रस्य गणना न क्रियते। यस्य नक्षत्रं निकषा चन्द्र उदेति नभसि, तस्मिन् नक्षत्रे एव चन्द्रमसः स्थितिर्ज्ञातव्या। ग्रहाणां विषये यद्विचारो विधीयते तत्सर्वं विज्ञानसम्मतम्। सूर्यग्रहः स्थिरः। पृथिवी च गतिशीला। एषा भूमिः सूर्यं परितो द्वादशमासेषु परिक्रमणमेकं विदधाति। ज्यौतिषशास्त्रे यत्सूर्यस्य गतिर्विलिख्यते, वास्तविकरूपेण सा तु पृथिव्या गतिरेव। सूर्य-चन्द्र-मङ्गल-बुध-बृहस्पति-शुक्र-शनि-नामधेयाः सप्तग्रहाः ज्योतिषशास्त्रे

मन्यन्ते। आधुनिकवैज्ञानिकाः नेपच्यूनः (वरुणः) हर्शलः (प्रजापतिः) यूरेनसः (इन्द्रः) इति नामधेयास्त्रयो ग्रहाः सन्तीति स्वीकुर्वन्ति। राहुकेतू न ग्रहौ, अपितु छायाग्रहौ बिन्दुरूपौ च स्तः। यत्र पृथिवीपरिक्रमापरिधिं चन्द्रकक्षापरिधिर्विकृन्तति तद्बिन्दुद्वयं राहु-केतुरूपं स्वीक्रियते। अत्र चन्द्रो निम्नत उपरि गच्छति तदुत्तरपातो राहुर्यत्र चन्द्र ऊर्ध्वतो नीचैरागच्छति तद्दक्षिणपातः केतुरिति ज्ञातव्यः। अत एव राहुकेत्वोरन्तरं षड्राशिपरिमितमेव भवति।

सिद्धान्तज्यौतिषे रविचन्द्रयोर्ग्रहणविषये वैज्ञानिकता भूरिशो दृश्यते। सूर्यग्रहणं सूर्योपरि चन्द्रमसश्छायापतने भवति अतः सूर्यस्यच्छादकश्चन्द्र एव। चन्द्रमसि यदि भूच्छाया निपतति तदा चन्द्रग्रहणं दृश्यते, चन्द्रच्छादिका भूच्छायैवेति सर्वं सिद्धान्तज्यौतिषग्रन्थेषु बहुधा समुल्लिखितम्, यथा-

**छादको भास्करस्येन्दुरधः स्थो घनवद्भवेत्।**

**भूच्छायां प्राङ्मुखश्चन्द्रो विशत्यस्य भवेदसौ।।**[18]

सिद्धान्तज्यौतिषे करणग्रन्थे च सूर्यग्रहणस्य चन्द्रग्रहणस्य च स्पर्शमध्यमोक्षकालानयनं सुष्ठु व्याख्यातम्। तत्र यन्मानमायाति तत्सर्वथा शुद्धं भवति। ग्रहणविषये वैज्ञानिका अपि ज्यौतिर्विज्ञानोक्तं वचनमेव ब्रुवन्ति। सिद्धान्तज्यौतिषस्य वैज्ञानिकता तत्रापि प्रमाणीभवति यत्र ग्रहाणां वेधो वेधशालासु क्रियते। नवीनयन्त्रैर्दर्शनेन यत्परिणामो ग्रहाणामायाति स एव परिणामो प्राचीनवेधशालासु प्रायोगिकतया ज्ञायते। तत्कथं ज्यौतिषस्याऽस्य नास्ति वैज्ञानिकत्वम् ? सिद्धान्तज्यौतिषं सर्वथा वैज्ञानिकमिति न काचित् संशीतिः।

**संहिताज्यौतिषस्य वैज्ञानिकत्वम्-**

ज्योतिर्विज्ञानस्य प्रायः सर्वेविषयाः संहिताज्यौतिषशास्त्रे दृश्यन्ते। परन्तु सिद्धान्तपक्षीयान् होरापक्षीयान् विषयान् विहाय संहितायां ये ये विषया आयान्ति, तेषु वैज्ञानिकत्वमस्ति न वेत्ति विचारोऽपेक्षितो वर्तते। ज्यौतिषस्य संहिताग्रन्थेषु ग्रहाणां चारस्तत्फलञ्च निरूपितम्। सिद्धान्तज्यौतिषशास्त्रेण ग्रहाणां तत्तद्राशीषु तत्तन्नक्षत्रेषु भ्रमणं तु

प्रमाणितमेव। परन्तु फलमेतस्याऽनुभवैकगम्यं वर्तते। यथा सूर्ये यदा विशेषराशिनक्षत्रेषु विचरति तदा शैत्यमौष्णं वृष्टिश्च भवति। एतस्य सर्वस्य प्रभावः प्राणिनामुपरि भवत्येव। सूर्यस्य प्रभावः पादपेषु वृक्षेषु च नितरां दृश्यते। समेषां कृते सूर्यकिरणानामवश्यकता वरीवर्ति, इति वैज्ञानिका अपि आमनन्ति। ग्रहाणां वर्णानुसारमपि फलं संहितायां लिखितम् –

**श्यामेऽर्के कीटभयं भस्मनिभे भयमुशन्ति परचक्रात्।**

**यस्यर्थे सुच्छिद्रस्तस्य विनाशः क्षितीशस्य।।**

**शशरुधिरनिभे भानौनभस्तलस्थे भवन्ति सङ्ग्रामाः।**

**शशिसदृशो नृपतिवधः क्षिप्रं चान्यो नृपो भवति।।**

**बृहत्संहितायाम्-** कूर्मचक्रविभाजनमुक्तम्। कूर्मचक्रविभाजनानुसारं कृत्तिका-रोहिणीमृगशीर्ष-नक्षत्रत्रयं तालिवानदेशाद् भारतवर्षस्योत्तरप्रदेशार्द्धभागं यावदभिन्यस्तम्। एतेषां नक्षत्राणां शनिराहुग्रहपीडितत्वाद् रुधिरपातोऽशान्तिश्च प्रत्यक्षमेव दृश्यते। संहिताया अन्ये विषया यथा दकार्गलम्, वास्तुशास्त्रम्, रत्नलक्षणम् वृक्षायुर्वेदः, उल्कापात, सामुद्रिकशास्त्रञ्च सर्वथा वैज्ञानिकतामङ्गीकुर्वन्ति। धूमकेतुनामुदयविषये वैज्ञानिका अध्ययनं कुर्वन्ति, संहिताज्यौतिषशास्त्रेऽपि धूमकेतूल्कादीनां फलं यत्रोक्तं तद् वैज्ञानिकदृष्ट्या समीचीनमेवेति। ऋतुविज्ञानं वृष्टिविज्ञानं वायुविज्ञानञ्च संहितायां ज्योतिर्विज्ञानस्य प्रायः सर्वे विषयाः संहिताज्यौतिषशास्त्रे दृश्यन्ते। परन्तु सिद्धान्तपक्षीयान् होरापक्षीयान् च विषयान् विहाय संहितायां ये ये विषया आयान्ति, तेषु वैज्ञानिकत्वमस्ति न वेत्ति विचारोऽपेक्षितो वर्तते। ज्यौतिषस्य संहिताग्रन्थेषु ग्रहाणां चारस्तत्फलञ्च प्राप्यन्ते। मेघं दृष्ट्वा वायुदिशामनुभूयाऽग्रि-मेवर्षेऽग्रिममासेषु वा कदा वृष्टिर्भविष्यति, कदा अभञ्जनोत्पात उत्पत्स्यत इति सर्व संहिताज्यौतिषद्वारा ज्ञातुं शक्यते। नारदीय-संहितायां वृष्टिविषये श्लोकोऽयं प्राप्यते-

**सिंहे भिन्ने कुतोवृष्टिरभिन्ने कर्कटे कुतः।**

**कन्योदये प्रभिन्ने चेत्सर्वथा वृष्टिरुत्तमा।।**[19]

यदि सिंहसङ्क्रान्तौ वृष्टिर्मेघा वा स्युः कर्कसङ्क्रान्तौ च वृष्टिर्वारिदाश्च न स्युस्तर्हि तस्मिन् वर्षे वृष्टेरभावो जायते। एवमेव कन्यासङ्क्रान्तौ वृष्टिर्वायुर्मेघा वा स्युश्चेत्तर्हि वर्षेऽत्युत्तमा वर्षा भविष्यन्तीति वक्तव्यम्। एतत्सर्वमृतुविज्ञानतुल्यं वैज्ञानिकतां प्रतिपादयति संहिताज्यौतिषस्य।

**होराज्यौतिषस्य वैज्ञानिकत्वम्-**

होराज्यौतिषशब्देन जातकशास्त्रमतं स्वीकर्त्तव्यम्। ज्यौतिषस्यैषा शाखा जातानां मानवानामन्यजन्तूनां शुभाशुभं भाविफलं कथयति। अस्मिन् स्कन्धे जातकस्य जन्मपत्रिकां निर्माय दशान्तर्दशाऽष्टकवर्गषड्वर्गभावफलदृष्टिफलराज-योगनाभसयोगस्त्रीजातकादिविविध-विषयाणां विचारपूर्वकं जातकस्य भविष्यफलं प्रोच्यते। एषा जातकप्रणाली किं वैज्ञानिकपदवीमारोहतीति विचारणायां सम्यक् वक्तुं शक्यते यज्जातकस्कन्धोऽयं नितरां वैज्ञानिकः। यदा जातकस्य जन्म भवति तदा तत्समयानुसारं लग्नमानीयाऽऽकाशीयग्रहाणां स्थापना तत्तद्राशिमध्ये क्रियते। जन्मकुण्डली कस्यचिज्जातकस्य जन्मसमये खगोलीयग्रहस्थितिरेव भवति। या राशिः पूर्वक्षितिजे समुदिता भवति तद्राशिरेव लग्नम्। पश्चिमक्षितिजे या राशिरस्तमुपगच्छति सैव सप्तमभावराशिः। एवं द्वादशभावेषु राशिन्यासं विधाय पुनश्च भावेषु ग्रहाणां स्थापनाज्जन्मचक्रं निर्मीयते। एवं जन्मपत्रिकायां वैज्ञानिकत्वं प्रमाणितं भवति।

जन्मपत्रिकायाः फलं कथं वैज्ञानिकतानिकषग्रावाणं स्पृशतीति सन्दर्भे वक्तुमिदमुचितं भवेद् यद् यथा सूर्यस्याऽऽतपस्य चन्द्रमसश्च शैत्यस्य प्रभावो मनुष्याणामुपरि निपतति तथैव जन्मपत्रिकाया ग्रहाणां प्रभावो भवति। जातकग्रन्थेषु नाभसयोगाः कथिता। आकाशे ग्रहाणां स्थित्या काचिच्चेदाकृतिर्निष्पद्यते तर्हि जन्मकुण्डल्यों नाभसयोगा राजयोगतुल्याः फलदा भवन्ति। बृहज्जातके कालपुरुषस्याऽङ्गविभाजनं कृतं वर्तते तत्तु वैज्ञानिकमेव प्रतिभाति-

**कालाङ्गानि वराङ्गमाननमुरो हृत्क्रोडवासोभृतो।**

**वस्तिर्व्यञ्जनमूरुजानुयुगले जङ्घे ततोऽङ्घ्रिद्वयम्।।**

**मेषाश्विप्रथमानवर्क्षचरणाश्चक्रस्थिता राशयो।**

**राशिक्षेत्रगृहक्षभानि भवनं चैकार्थसम्प्रत्ययाः।।**[20]

अस्य कालपुरुषस्याङ्गविभाजनोद्देश्यमिदं वर्तते यद् यस्यां राशौ यादृशो ग्रहो बलो निर्वलो वा स्यात्तत्र तादृश एव रोगो भवति, अङ्गानां सुबलत्वं निर्बलत्वं च भवितुमर्हति। एतत्तु सर्वथा सत्यमत एव विज्ञानसम्मतमेव। ये ये ग्रहाः पृथिव्याः समीपे वर्तन्ते तेषां ग्रहाणां प्रभावो मनुष्याणामुपरि बहु दृश्यते। दैवज्ञैर्यदि परीक्षणं विधीयते तर्हि फलितज्यौतिषस्य वैज्ञानिकतत्त्वान्युन्मीलितानि भवन्ति। अनेकेषां जातकानां जन्मकुण्डलीभिस्तत्तज्जीवनघटनानां कोऽपि दैवज्ञः परीक्षणं कुर्यात् तेषां भाविघटनां सूचयेच्चेत्तर्हि पूर्णप्रायोगिकदृष्ट्या फलितज्यौतिषस्य वैज्ञानिकता स्वयमेव प्रामाण्यमुपयास्यति।

२००२ तमे ख्रीस्ताब्दे पश्चिमदिशायामेकस्य **'आकिया झांग'** नामधेयस्य धूमकेतोर्दर्शनं दूरवीक्षणयन्त्रद्वारा विहिता। अप्रैलमासस्य पञ्चदशतारिकातो (२००२ ख्रीस्ताब्दे) धूमकेतोरस्य दर्शनं सूर्योदयात्पूर्वं पूर्वदिशि प्रत्यक्षतयाऽभवत्। एतत्तु वैज्ञानिकानां खगोलविदां च दृष्ट्या प्रमाणितम्। परन्तु धूमकेतोरेतस्योदये पृथिव्याकः परिणामो भवतीति सर्वे वैज्ञानिका न जानन्ति। फलितज्यौतिषे फलस्यैतस्य कीर्त्तनं बहुधा क्रियते। बृहत्संहितायां फलमस्य निर्दिष्टम्- **"उक्तविपरीतरूपो न शुभकरो धूमकेतुरुत्पन्नः।"**[21] अद्भुतसागरग्रन्थे धूमकेतोः फलं निर्दिष्टं यद् यदा जगति धूमकेतुरुत्पद्यते तर्हि वृक्षौषधितृण-गुल्मादिषु विकृतिर्जायते, देशे विपत्तिर्भवति राज्ञां नाशो युद्धं च दृश्यते। तद्यथा-

**वृक्षौषधितृणे गुल्मे विकृतिर्यत्र दृश्यते।**

**तत्र भौमं विजानीयाद् धूमकेतुमुपस्थितम्।**

**आन्तरिक्षोऽथ भौमो वा यत्र केतुः प्रदृश्यते।**

**तस्य देशस्य षण्मासाद् विनाशं परिनिर्दिशेत्।।**[22]

इत्थं फलस्यैतस्य चेत् परीक्षणं क्रियेत तर्हि प्रत्यक्षतया फलितज्यौतिषस्य वैज्ञानिकताऽवलोक्यते। एतेन प्रामाणिकविवरणेन निश्चप्रचं ज्योतिर्विज्ञानस्य वैज्ञानिकत्वं ज्ञातुं शक्यते। दैवज्ञः फलानां सम्यक्तया परीक्षणं विधाय जनमध्ये ज्यौतिषशास्त्रस्य प्रामाण्यं दर्शयेयुः। वैज्ञानिकैरपि सन्दर्भेऽस्मिन् साहाय्यं कर्त्तव्यम्, तैरपि ज्यौतिषशास्त्रोक्तफलस्य सत्यासत्यत्वपरीक्षणे निकषोपलैर्भवितव्यम्। इत्थं ज्योतिषशास्त्रं सर्वथा वैज्ञानिकमेवाऽस्ति सिद्धान्तज्यौतिषस्य विज्ञानपरत्वात्। सिद्धान्तज्यौतिषमेवाऽऽधारः खलु फलितज्यौतिषस्य, तर्हि वैज्ञानिकत्वाऽऽधारे सत्यवैज्ञानिकत्वमाधेयस्येति कथमुपपत्तिः सङ्गच्छेत्। अत एव सम्पूर्ण ज्यौतिषं वैज्ञानिकमित्यस्मिन् न काचिद् विप्रतिपत्तिर्भवितुमर्हतीति शम्।

## पादटीका

1. ऋग्वेदज्योतिषे, श्लोक -3
2. ऋग्वेदे 1/33/08
3. गोपथब्राह्मणे 9/10
4. सिद्धान्तशिरोमणिः, गोलाध्यायः, भुवनकोशे-2
5. ऋग्वेदे 1/164/11
6. ऋग्वेदे 1/164/48
7. बृहत्संहितायाम् 1/9
8. बौधायनशुल्बसूत्रे 1/48
9. प्राचीन भारतीयगणित पृ. 22
10. तत्रैव पृ.22-23
11. सिद्धान्तशिरोमणिः, गोलाध्याये-3/6
12. गोलपादे-9
13. आर्यभट्टीये, कालक्रियापादे-15
14. आर्यभट्टीये, कालक्रियापादे-16
15. सूर्यसिद्धान्ते भूगोलाध्याये श्लो.सं.-78
16. सिद्धान्तशिरोमणेर्गोलाध्याये, भुवनकोशे, श्लो.सं.-18
17. ग्रहलाधवम्, प्राक्कथने केदारदत्तजोषी, पृ.सं.-75
18. सूर्यसिद्धान्तः-4/9
19. नारदीयसंहिता-35/12
20. बृहज्जातके-1/4
21. बृहत्संहितायाम्-11/9
22. अद्भूतसागरे, पृ-19

## सन्दर्भग्रन्थसूची-

1. वेदाङ्गज्यौतिषम्, पं. सत्यदेवशर्मा, चौखम्बा सुरभारती प्रकाशन, 2011

2. गोपथब्राह्मणः, व्याख्याकार राजेन्द्रलाला मित्र, हरचन्द्र विद्याभूषण, (1872) केसिंजरपब्लिसिङ् 2010

3. सिद्धान्तशिरोमणिः, पं. सत्यदेवशर्मा, चौखम्बा सुरभारती प्रकाशन, 2011

4. ऋग्वेदः सायणभाष्यः, वैदिक संस्कृत टिप्पणीकारः सयाना शोध एवं प्रकाशनः वैदिक शोधन मंडल, तिलक विद्यापीठ, पुणे।

5. बृहत्संहिता, पं. अच्युतानन्द झा, चौखम्बाविद्याभवन, 2005

6. बौधायनशुल्बसूत्रम्, महर्षि सान्दीपनि राष्ट्रिय वेदविद्या प्रतिष्ठान, डॉ. रघुनाथ पुरुषोत्तम कुलकर्णी

7. आर्यभटीयम्, डॉ सत्यदेव शर्मा, चौखम्बा सुरभारती प्रकाशन, 2008

8. सूर्यसिद्धान्तः, पं कपिलेश्वर शास्त्री, चौखम्बा संस्कृत भवन, 2006

9. ग्रहलाधवम्, डॉ ब्रह्मानन्द त्रिपाठी, चौखम्बा सुरभारती प्रकाशन, 2008

10. अद्भुतसागरः, डॉ शिवाकान्त झा, चौखम्बा सुरभारती प्रकाशन, 2006

11. नारदीयसंहिता, टीकाकारः, अभयकात्यायनः, चौखम्बा सुरभारती प्रकाशन, 2018

12. बृहज्जातकम्, पं. केदारदत्तजोशी, मोतीलाल वनारसी प्रकाशन, वाराणसी, 2009

# "मतं विशिष्टाऽद्वैतं मे" एकमध्ययनम्।।

ध्रुवो वाचस्पतिः
(शोधच्छात्रः)
तिरुपतिस्थराष्ट्रियसंस्कृतविश्वविद्यालयः

परब्रह्मपुरुषोत्तमभगवत्स्वामिनारायणः ईशाब्दे १७८१[1] तमे वर्षे स्वोत्तमदिव्यसिद्धान्तप्रस्थापनाय पूर्वभारतीयप्रदेशच्छप्पैयाख्ये ग्रामे धर्मदेवभक्तिदेवीतः स्वदिव्यतनुम् अवतारयत्। इतः ऊर्ध्वं कालान्तरे अयोध्याख्यदेशे एकादशवर्षपर्यन्तं न्यवसद्। ततश्च स एकाकी एव दीर्घयात्रायै स्वदेशं तत्याज। तस्यां यात्रायां स संपूर्णभारतभ्रमणं कृतवान्। विचरन्नेव स विचारयामास 'गुजरे मुमुक्षवः प्रतीक्षन्ते', तस्मद्धि स लोजपुरग्रामे स्वस्य यात्रां संपूर्णयामास। ततश्च रामानन्दस्वामितः दीक्षां स्वीकृत्य श्रीसहजानन्दस्वामी इति नाम्ना प्रख्यापितः। तथा च गढपुरग्रामेऽपि दादाखाचरसंज्ञकस्य भक्तस्य गृहे न्यवसत्। तत्र च निजजनान् अमृतसन्निभवाणीरूपेण स्वोपदेशं सम्बोधयाञ्चकार। तस्य भगवत्स्वामिनारायणस्यैव दिव्यवचनानां सङ्ग्रहात्मकरूपेण शिक्षापत्रीवचनामृतादिग्रन्थाः सम्प्रदाये प्रसिद्धाः।

धरातलेऽस्मिन् भगवत्स्वामिनारायणस्य विविधसुन्दरमन्दिराणि निर्मितानि स्वामिनारायाणोपासकैः। तानि बहूनि मया दृष्टानि आलोचितानि च। तेषु स्वामिनारायणमन्दिरेषु विधयोऽपि मया दृष्टाः विचिन्तिताः। भगवत्स्वामिनारायणविरचितग्रन्थाः अपि पठिताः विचारिताश्चा दृष्ट्वैतत् सर्वमपि कश्चन सन्देग्धि यद् –

**मतं विशिष्टाद्वैतं मे गोलोको धाम चेप्सितम्।**

**तत्र ब्रह्माऽऽत्मना कृष्णसेवा मुक्तिश्च गम्यताम्।।**[2]

इति शिक्षापत्रीस्थेन श्लोकेन रामानुजसम्प्रदायान्नातिरिच्यते स्वामिनारायणसम्प्रदायः। अनेन तु भगवत्स्वामिनारायाणस्याऽभिप्रायेण रामानुजाचार्यकृतसिद्धान्त एव मान्य इत्यवभासते।

किन्तु स्वामिनारायणमन्दिरे मध्यखण्डे अक्षरपुरुषोत्तममहाराजस्य मूर्तिः, न तद्रामानुजसम्प्रदाये दृष्टं तथा च विविधविधयोऽपि भिद्यन्ते।

अत्र केचन अन्तःस्थाः बाहिष्ठाश्चाऽवतिष्ठन्ते।

ननु भगवत्स्वामिनारायणहस्तदीक्षितमुक्तानन्दस्वामि-गोपालानन्दस्वामिनाम्ना लिखापिते ब्रह्ममीमांसाभाष्ये प्रारम्भे-

“श्रीबादरायणमते रामानुजेन मुनिना रचितं हि भाष्यम्। यत् प्राह प्रसन्ना सरस्वती। जिज्ञासूनां मन्दधियां दुर्गमोऽयमंशोऽतः सरला व्याख्या (मया) विरच्यते। यया मन्दधियामपि ब्रह्मसूत्राणि सुग्रहाणि स्युः। श्रीभाष्याध्ययनाशक्तान् प्रति भाष्यमेतत् सुखबोधं परपक्ष-प्रतिक्षेपबाहुल्यमन्तरा सिद्धान्ततत्त्वप्रदर्शनतत्परं श्रीभाष्यप्रक्रियानुसार्येव व्यरच्यतेति तेनैव व्यक्तमभाषि।”

ब्रह्ममीमांसाभाष्यपूर्वभूमिकायां

“भगवान् सहजानन्दस्वामी स्वसम्प्रदायपरिपुष्ट्यै सद्ग्रन्थप्रणयने स्वान्तेवसिनः प्रख्यातिवैदुष्यान् मुनिवरान् समादिशदिति सुविदितमेव सम्प्रदायग्रन्थतः। तच्चरणारविन्दमिलिन्दिवृत्तिषु च विद्वत्सु तदन्तेवासिषु मुनिवरोऽन्यतमो ब्रह्मसूत्रेषु भाष्यं सरलमधुरगम्भीरं लघुशरीरं विविष्टाद्वैतप्रतिपादकं प्रणिनाय।”

(अण्णरङ्गाचार्यः ब्रह्ममीमांसा-प्रस्तावना. पृ. 48)

तथा च “कुछ आधुनिक विचारकों का मत है कि श्रीस्वामिनारायण का सिद्धान्त विशिष्टाद्वैत हि है, पर श्रीरामानुजाचार्य के विशिष्टाद्वैत से कुछ अंश में भिन्न है। मेरे मत से यह कहना सर्वथा अनुचित है क्योंकि श्री श्रीस्वामिनारायण भगवानने स्पष्टरूप से श्रीभाष्य को प्रमाण एवं विशिष्टाद्वैत को स्वसिद्धान्त कहा है।”

(पारसनाथ द्विवेदी, श्रीस्वामिनारायण सेश्वर वेदान्त, पृ.१०४.)

एवं च तात्विकरूपेणापि त्रीणि एव तत्त्वानि सन्ति इति तु स्पष्टतया शिक्षापत्र्याम् उल्लिखितं सहजानन्देन हुत्स्थोऽणुसूक्ष्मचिद्रूपो[3]... इत्यादिना जीवः, देहत्रये विराडादौ व्याप्योत्पत्तिस्थितिक्षयान् इत्यादिना ईश्वरः[4], त्रिगुणात्मा तमः कृष्णशक्तिर्देहतदीययोः इत्यादिना माया[5] इति श्लोकत्रयेण जिवेश्वरमायेतितत्त्वत्रयनिरूपणात्।

तथा हि सत्सङ्गिजीवने-

**जीवमायापरेशानां स्वरूपं बोद्धमञ्जसा।**

**रामानुजाचार्यकृता ग्रन्थाः पाठ्यास्त्वयाऽऽदरात्** ॥ १/१६/४८॥

**अतो रूपाणि निश्चेतुं जीवमायापरात्मनाम्।**

**रामानुजाचार्यकृतभाष्यादि त्वं प्रवर्तयेः** ॥ १/५९/२६॥

एवं भगवता स्वामिनारायणेन स्वसम्प्रदायत्वेन निदर्शनाद् विशिष्टाद्वैतदर्शनात् तत्त्वभेदस्तु स्वेष्टदेवद्रोह एव, कृते सति सा न वाराङ्गनाभक्तिरिति विचारय। एवं विप्रतिपत्तिकरत्त-वाच्छोधपत्रेऽस्मिन् द्वयोः सम्प्रदाययोः मध्ये कः भेदः इति प्रतिपादयिष्ये।

यदुक्तं नैतत् सत्यम्, अधोलिखितबिन्दुविरोधात्

बिन्दवः

१. तत्त्वामुखसैद्धान्तिकभेदात्

२. भगवद्धामभेदात्

३. भगवत्परमभक्तभेदात्

४. मुक्तिभेदात्

५. धार्मिकभेदात्

६. प्रत्यक्षगुरुहरिसेवनभेदाच्च

अथ चैकैकं बिन्दु विचित्य वितन्यते।

**१. तत्त्वामुखसैद्धान्तिकभेदात्**

अयि मित्र शिक्षापत्र्यामेव तत्त्वपञ्चकनिरुपणं स्फुटं दृश्यते, नो चेद् दर्शयामि, अज्ञानिनं पथदर्शनमेव साधुता।

शिक्षापत्र्यां जीवपरब्रह्ममायातत्त्वानां स्पष्टतयोल्लेखाद् अक्षरब्रह्मेश्वरतत्त्वानी निरूप्येते।

१.१. अक्षरब्रह्मनिरूपणम्

**निजात्मानं ब्रह्मरूपं देहत्रयविलक्षणम्।**

**विभाव्य तेन कर्तव्या भक्तिः कृष्णस्य सर्वदा।।** शिक्षापत्री-११६।।

अत्र स्वात्मानं ब्रह्मरूपत्वस्य विभावनाऽऽज्ञापिता। ब्रह्म शब्देन अत्र जीवेश्वरमायापरब्रह्मेतरतत्त्वं, रामानुजीये एतस्य ग्रहणाभावान्न दर्शनयोः साम्यता। दृश्यते च श्रुतिस्मृतिग्रन्थेषु प्रत्यगात्मनो ब्रह्मणा सहैकात्म्यस्याऽऽज्ञा।

**“योऽसवासौ पुरुषः सोऽहमस्मि”** ।[6]

**“तदात्मनमेववेदहं ब्रह्माऽस्मि”** ।[7]

**“अयमात्मा ब्रह्म”** ।[8]

**“एष म आत्मान्तहृदय एतद् ब्रह्म”** ।[9]

**“प्रज्ञानं ब्रह्म”** ।[10]

**“तत्त्वमसि”**[11]

**इत्यादिभिः शास्त्रवचनैः।**

अक्षरब्रह्मणा सह ऐक्यं न सर्वथा बोध्यम् अपि तु सेवकत्वदासत्वादिगुणसाम्यमेव बोध्यम् इति हृद्।

१.२. ईश्वरनिरूपणम्

**हृदये जीववज्जीवे योऽन्तर्यामितया स्थितः।**

**ज्ञेयः स्वतन्त्र ईशोऽसौ सर्वकर्मफलप्रदः।।** शिक्षापत्री - १०७ ॥

ईश्वरनिरूपणे ईश इत्यस्य स्वतन्त्रः इति विशेषणं प्रयुक्तम्। संभवव्यभिचाराभ्यां स्याद् विशेषणम् अर्थवद् इति न्यायेन संभवे व्यभिचारे च स्याद् विशेषणमर्थवत्, न संभवमात्रे इत्यर्थः। स्वतन्त्रः इति विशेषणे दृष्टे परतन्त्रोऽपि ईश्वरः स्यादिति सूच्यतेऽनेन उद्बोध्यते च भगवता स्वामिनारायणेन वचनाऽमृते-

"तस्य ईश्वरस्य विराड्सूत्रात्माव्याकृतादिदेहत्रयम्"[12]

"अन्तर्यामिरूपेण जीवेषु ईश्वरेषु च व्यापकः(परमात्मा) "[13]

तथा च ब्रह्मसूत्रेपि परतन्त्राधिकरणे जीवेश्वराणां पारतन्त्र्यं स्फुटं दृश्यते तत्तु स्वामिनारायण-भाष्याद्वेवावगम्येत। एवं हि जीवः ईश्वरः माया ब्रह्म परब्रह्म चेति पञ्च तत्त्वानि निरूपितानि शिक्षापत्र्यां भगवता।

न केवलं शिक्षापत्र्याम् अपि तु स्वदिव्यवाणीवचनाऽमृतेपि बहुषु स्थलेषु दृश्यते तत्त्वपञ्चकम्-

षड्विधतात्पर्यनिरूपणेनापि वचनामृतात् त्रीण्येव तत्त्वानि सम्प्रदाये मान्यानीति नैव सिद्ध्यति।

**उपक्रमोपसंहारावभ्यसोपूर्वता फलम्।**

**अर्थवादोपपत्ती च लिङ्गं तात्पर्यनिर्णये।।**

वचनामृतोपक्रमे दर्गपुरप्रथमप्रकरणस्य प्रथमे चिन्तामणितुल्यभगवन्मूर्ती मनोऽवस्थाननिरूपणे, उपसंहारे च दुर्गपुरान्त्यप्रकरणस्याऽन्तिमे वचनाऽमृते।

दुर्गपुरमध्यप्रकरणस्यैकत्रिंशत्तमे, दुर्गपुरान्त्यप्रकरणस्य दशमे एवं बहुषु चान्येषु पञ्चतत्त्वानां निरूपणस्य सत्त्वेन तत्त्वत्रयस्य कुत्राऽपि निर्देशाभावेनाभ्यासादपि तत्त्वपञ्चकसिद्धान्तः सिद्ध्यत्यनायासेन।

अपूर्वता च जीवेशानां पृथङ्निरूपणे पञ्चालाद्वितीयादिषु वचनामुतेषु भगवतैव प्रत्यपादि।

फलं दुर्गपुरप्रथमप्रकरणस्य द्वादशे मोक्षात्मकं, त्रिषष्टितमे ब्रह्मपरब्रह्मविज्ञानेन सर्वविज्ञानरूपम्, एकसप्ततितमे च भक्तेभ्योऽखण्डानन्दावाप्तिः, दुर्ग-पुरमध्यप्रकरणस्यैकचत्वारिंशत्तमे च मोक्षकुञ्चिकालाभशचति निर्दिष्टम्।

**"अर्थवादो माहातम्यरूपः"** जीवेश्वराणां कृते ब्रह्मरूपीभूय

परब्रह्मणः भक्तिकरणात्मकः दुर्गपुरमध्यप्रकरणस्य तृतीये, कनककान्ताबन्धनाभावः त्रिंशत्तमे। निन्दात्मको तज्ज्ञानाभावे मतिभ्रान्त्यवस्थानं दुर्गपुरप्रथमप्रकरणस्य सप्तमे वचनाऽमृते।

उपपत्तयोऽर्थाद् युक्तयो जीवब्रह्मपरब्रह्मभेदे दुर्गपुरप्रथमप्रकरणस्य एकोनचत्वारिंशत्तमे स्थितिभेदेन निरूपणे, जीवेश्वरभेदे पञ्चालाद्वितीये वचनाऽमृते।[14]

षड्विधकारणेषु न एकमपि कारणं तत्त्वत्रयनिरूपणे क्षमं तस्मादपि तत्त्वपञ्चकमेव स्वामिनारायणसिद्धान्तः इति निश्चप्रचम्।

एतदेव तत्त्वपञ्चकं शास्त्रेष्वपि लभ्यते :

"तमेव विदित्वाऽतिमृत्युमेति नान्यः पन्था विद्यतेऽयानाय"[15]

"अक्षरात् परतः परः"[16]

"तमीश्वराणां परमं महेश्वरम्"।[17]

तत्र प्रथमे मन्त्रे मृत्युरूपाऽविद्याया मायायाः, अतिक्रमितुर्जीवस्य मोक्षप्रदज्ञानविषयकस्य परब्रह्मणश्च विवेकः। द्वितीये च सर्वजीवेश्वरात्परस्य अक्षह्मणस्ततोऽपि परस्य परब्रह्मणश्च विवेकः। तृतीये ईश्वराणां परमेश्वरस्य च विवेकः, इत्येवं जीव-ईश्वर-माया-ब्रह्म-परब्रह्मणा वित्तिर्विलोक्यते वेदमन्त्रेषु।

**२. भगवद्धामभेदात्**

श्रीस्वामिनारायणभगवता स्वधामरूपेण सर्वत्राऽपि अक्षरधामैवोल्लिखितं किञ्च रामानुजसम्प्रदाये स्वधामरूपेण तु सर्वत्राऽपि वैकुण्ठः एव स्वीकृतः, तस्मादपि स्वामिनारायणसम्प्रदायो नातिरिच्यते रामानुजीयादिति न।

रामानुजसम्प्रदाये वैकण्ठोल्लेखो यथा -

दिव्यैश्च सुरिनिवहैरखिलैश्च सेव्यः। वैकुण्ठदिव्यनगरे सततं वसन् यः ॥ ८,६,५,

वैकुण्ठवर्तितममुं हृदि दृक्षु चित्त। नक्तं दिवं च कुतुकाकुलितं मदीयम्।। ९,३,७

वैकुण्ठनाथपुरसम्मुखपालकैश्चा १०,९,९ इति।

आल्वारमूर्धन्यश्रीशठकोपसूरिः

तथा च रामानुजाचार्येण स्वरचितेषु ग्रन्थेषु वैकुण्ठनामोल्लेखः

शरणागतिगद्ये, वैकुण्ठनाथविशेषणं, वैकुण्ठगद्ये च भगवद्धामरूपेण श्रीवैकुण्ठवर्णनं स्फुटं दृश्यते।

ननु रामानुजाचार्यसमये गोलोकधामनामाभावान्न तस्योल्लेखः, गोलोकधाम एव वैकुण्ठधाम अपि च तदेव भवतु अक्षरधाम, एवं च शिक्षापत्र्यामपि “गोलोकधाम चेप्सितम्” इति निर्देशाद् भवत्येव धामसाम्यम् इति चेद् धाम वर्तते मैवं, भगवत्स्वामिनारायणस्य धाम वर्तते अक्षरधाम तत्तु बहुविधभगवदुक्तवचनाऽमृतसन्दर्भैः ज्ञातुं शक्यते।

- "भगवतः अक्षरधाम तस्य प्राप्तिः न भवति" [18]
- "भगवान् अक्षरधाम्नि सदैव दिव्यसाकृतित्वेन विराजमानः "[19]
- "मायां तरति तथा च महत्त्वं लभते, अक्षरधाम गच्छति" [20]

न चात्र पुनः गोलोकधामनामाभाववैकुण्ठधामनामाभावादक्षरधामनामोल्लेखः इति मन्येत, वचनाऽमृते द्वयोः धाम्नोः पञ्चालाप्रकरणे सुखमीमांसायां पृथगुल्लेखात्।

"मनुष्याद्राज्ञः सुखमधिकं, तस्मादपि दैवीसुखं, तस्मादपि इन्द्रस्य, ततोऽपि बृहस्पतेः, ततश्चर्तुमुखब्रह्मणः, ततो वैकुण्ठधाम्नः, ततश्च गोलोकधाम्नः, तस्मादपि सर्वस्माद् अक्षरधाम्नः सुखम् अत्यधिकम्।[21]

तथा च वैकुण्ठधाम्नो वर्णनं बहुवारं दृष्टं, किन्तु न कदापि स्वधामरूपेणोल्लेखः प्राप्तः। तत्र एकोनत्रिंशत्सु वचनाऽमृतेषु चतुस्त्रिंशद्वारं वैकुण्ठधाम स्मृतं भगवता, एवं च तत्र श्रीलक्ष्मीनारायणभगवतो दर्शनमभूद् इत्यप्युल्लिखितम्।

अक्षरधाम्नि स्त्रीपुरुषयोः कोऽपि भेदो नास्ति, वैकुण्ठे तु लक्ष्मीनारायणयोरेव भेदे दृष्टे न तत्र भेदाभावः। वैकुण्ठस्थमुक्तानां चतुर्भुजत्वं ह्यक्षरधामस्थमुक्तानां तु द्विभुजत्वमेव परमात्मवत्।

तस्माद्धि स्वामिनारायणाऽक्षरधाम भिन्नं तथा च रामानुजसम्प्रदायाभिमतवैकुण्ठधाम भिन्नमेव, धामभेदाच्च सिद्धान्तभेदः, सिद्धान्तभेदाच्च दर्शनभेदो सरलतयावबोद्धुं शक्यते।

### ३. भगवत्परमभक्तभेदात्

स्वामिनारायणाऽक्षरपुरुषोत्तमदर्शनानुसारेण भगवद्धाम्नि भगवत्परमभक्तरूपेण अक्षरब्रह्म प्रख्योपितं तथा च रामानुजसम्प्रदायानुसारेण भगवद्धाम्नि भगवत्परमभक्तरूपेण लक्ष्मी स्वीकृता।

वैकुण्ठमुख्यपरिचारकरूपलक्ष्मीस्वरूपम्-

- लक्ष्मी तु जीवरूपा एव स्वीकृता। जीवरूपत्वे सति व्यापकत्वं तस्याः।
- धाम्नि लक्ष्मीनारायणयोः द्वयोः उपासना कर्तव्या।[22]
- परमात्मवत् स्वतन्त्रा।[23]
- लक्ष्मीनारायणयोः मध्ये दाम्पत्यभाव एव मुख्यः, सेव्यसेवकभावो गौणः।[24]
- लक्ष्मी तु पुरुषाकाररूपेण जीवानां मोक्षे सहायकः।[25]

इत्यादिभिः लक्ष्मीस्वरूपं ज्ञातुं शक्यते।

अथ च पूर्णपुरुषोत्तमभगवत्स्वामिनारायणधामस्थभगवत्परमसेवकरूपाक्षरब्रह्मणः स्वरूपं विचिन्त्यम्।

- जीवेश्वरमायाऽक्षरमुक्तपरे सति परब्रह्ममात्रन्यूनम् अक्षरब्रह्म तु एकं भिन्नं तत्त्वम्, सदैव परमात्माधीनम्।[26]
- अक्षरधाम्नि अनन्तकोटिमुक्तैः सह अक्षरब्रह्मापि परब्रह्मैवोपास्ते।[27]
- अक्षरब्रह्म तु न केवलं मोक्षे सहायकमपि तु मोक्षप्रदातृ च विद्यते।[28]
- पृथिव्यां परब्रह्मणः प्राकट्यम् अनुभावयति।[29]
- अक्षरब्रह्म तु स्वयमेव धामरूपं सेवकरूपं च।[30]

एवं च बहुविधलक्षणैः अक्षरब्रह्मस्वरूपं ज्ञातुं शक्यते।

अनेन भगवत्परमभक्ताऽक्षरब्रह्मस्वरूपगुरुसमाश्रयेणैव भवति प्रत्यगात्माऽक्षरमुक्तः, तस्मादेव लभ्यते परमात्मभक्त्यधिकारः इति तु सहजानन्दसिद्धान्तो वचनाऽमृते प्रदर्शितः।[31] नाऽयं विचारो विशिष्टाद्वैतमते दृश्यते कुत्रचिद्।

एवं हि परमात्मपरमभक्तभेदादपि द्वयोः सिद्धन्तयोः भेदः स्फुट एव।

**४. मुक्तिभेदात्**

मुच्यते जन्ममरणरूपभवबन्धनाद् अनेन इति मुक्तिर्मोक्षो वेति। एका एव मुक्तिः विविधदर्शनानुसरेण भिद्यते वास्तविकी केचिज्जीवन्मुक्तिविदेहमुक्तीत्युभयत्मिकां मुक्तिम् अभिसंपद्यन्ते, केचिच्च केवलविदेहमुक्तिमेवाङ्गीकुर्वन्ति।

अनेन मुक्तिविचारेण भगवत्स्वामिनारायणप्रदत्तमुक्तिविचारात् सर्वथा भिद्यते रामानुजीयमुक्तिः, तत्तद्वचनसन्दर्भात्।

❖ विशिष्टाद्वैतमताऽनुगुणमुक्तिविचारः

- जीवः पापपुण्यादिसर्वमपि मृत्युकाले मित्रेभ्यः स्वजनेभ्यश्च प्रददाति।[32]
- आतिवाहिकसाहाय्येन जीवो विरजानद्यां स्नाते सति लिङ्गशरीरं परित्यजति।[33]
- मुक्तस्य चर्तुभुजस्वरूपम्।[34]
- जीवन्मुक्तिः निषिध्यते।[35]

❖ स्वामिनारायणमताऽनुगुणमुक्तिविचारः

- इह लोके एव कारणशरीररूपमायां त्यक्त्वा जीवो मुक्तिमनुभवति।[36]
- सत्पुरुषसान्निध्यात् तस्य मनः कर्मवचनादेव पापपुण्यनाशप्रक्रिया प्रारभ्यते।[37]
- देहविलयसमये स्वयं परमात्मैव दिव्ययानेन अक्षरब्रह्मणा नैकमुक्तैश्च सह प्रत्यगात्मानं

- ब्राह्मीतनुं प्रापय्य स्वदिव्याक्षरधाम प्रति नयते।[38]
- जीवन्मुक्तिश्च विदेहमुक्तिश्च भगवता स्वामिनारायणेन स्वीकृता।[39]
- परमत्मवद् द्विभुजस्वरूपमेव।
- सृष्टिप्रक्रियायां मुक्तः परब्रह्मसंकल्पानुगुणाक्षरब्रह्मसंकल्पानुगुणेन मायया सह संयुज्यते।

इत्यदिभिः तत्तत्सम्प्रदायगतमुक्तिभेदैश्च स्वामिनारायणसिद्धान्तो विशिष्टाद्वैतसिद्धान्तश्च मिथो भिद्यते नाऽत्र कश्चन संशयः।

**५. धार्मिकभेदात्**

प्रत्येकसम्प्रदायो धर्माद्धि विशेषतो विभिद्यते इति तु सर्वसाक्षिकम्। तद्वदेव विशिष्टाद्वैतसम्प्रदायात् स्वामिनारायणसम्प्रदायो भिन्न इति स्फुटमवलोक्यते धार्मिकभेदात्।

❖ विशिष्टाद्वैतीयधार्मिकपरम्परा

- त्यागाश्रमे संन्यासदीक्षा चतुर्थाश्रमः।
- मन्दिरस्तोत्राणि संस्कृतद्रविडभाषायुक्तानि।
- द्रविडशैलीमन्दिराणि।
- मन्त्राः १- ॐ नमो नारायणाय

  २ - श्रीमन्नारायणचरणौ शरणं प्रपद्ये

  ३ – ॐ नमो भगवाते वासुदेवाय

- ऊर्ध्वपुण्ड्रं श्वेततिलकं मध्ये रक्तवर्णीयरेखा।
- सन्यासिनाम् अष्टाङ्गब्रह्मचर्यनियमो नास्ति।
- ब्रह्मविद्यायां शूद्रो नस्त्यधिकारी।[40]
- धर्मार्थं चौर्यं न निषिध्यते।[41]
- यज्ञे पशुहिंसा न निषिद्धा।[42]
- शैवमतं प्रत्यस्वारस्यम्।[43]
- सर्वेऽपि आश्रिताः वैष्णवरूपेण संबोधिताः।

❖ स्वामिनारायणीयधार्मिकपरम्परा

- त्यागाश्रमे साधुदीक्षा प्रथमाश्रमः ब्रह्मचर्याश्रमः।
- मन्दिरस्तोत्राणि गुर्जरव्रजसंस्कृतभाषासंयुतानि।
- नगरशैलीमन्दिराणि।
- मन्त्राः १. स्वामिनारायणः।

  २. अक्षरमहं पुरुषोत्तमदासोस्मि।
- पीततिलकं मध्ये कुङ्कुमचन्द्रकः।
- त्यागाश्रमिणाम् अष्टाङ्गब्रह्मचर्यनियमो निश्चितः।
- ब्रह्मविद्यायां सर्वेऽपि वर्णा अधिकारिणः सन्ति।
- धर्मार्थमपि चौर्यं निषिद्धम्।[44]

- यज्ञीयपशुहिंसा निषिद्धा ।[45]
- शिवादिदेवालयस्थाने नमनस्य तथा तत्तद्देवपूजनस्य श्रीहर्याज्ञा ।[46]
- सर्वेऽपि मुमुक्षवो हरिभक्ताः सत्सङ्गिनः इति संबोद्धिताः ।[47]

एवं हि बहुविधधार्मिकभेदाः परिदृष्यमाणाः, किन्तु केचनैवाऽत्र प्रदर्शिताः। एतस्माद्धि साम्प्रदायिकभेदाद् अनयोः द्वयोः सम्प्रदाययोः मध्ये भेदः स्फुटो विना केनापि संशयेन।

**६. प्रत्यक्षगुरुहरिसेवनभेदात्**

स्वामिनारायणाऽक्षरपुरुषोत्तमसिद्धान्ताद्दतेऽन्यत्र कुत्रापि प्रत्यक्षगुरुहरिसेवनं नैव दृश्यते। प्रत्यक्षगुरुहरिसेवनम् इत्युक्ते प्रत्यक्षस्य गुरुरूपहरेः सेवनं, मनःकर्मवचनैः तत्प्रदत्ताऽऽज्ञायाः परिपालनं, तदनुवृत्तिं विज्ञाय तदनुसारेणाऽनुसरणम्। ब्रह्मरूपत्वं खलु प्रत्यक्षगुरुहरिसेवन-फलम्।

अक्षरपुरुषोत्तमसिद्धान्ताऽनुसारेणाऽधुनाऽपि पृथिव्यां महन्तस्वामिरूपेण साक्षादक्षरब्रह्मस्वरूपेण भवत्येव भगवतः प्राकट्यम्, नैतावत् किमपि श्रूयते विशिष्टाद्वैतमते भगवतो गुरुरूपेण प्राकट्यम्। न चाऽत्र लक्ष्मी तु प्रथमगुरुरूपेण स्वीकाराद् दोषाभावो वाच्यं, तस्या अधुना पृथिव्यां प्रत्यक्षरूपेणाऽस्वीकारात्।

एवं हि प्रत्यक्षगुरुहरिसेवनभेदादपि सम्प्रदाययोः मध्ये भेदाभावभावः।

इत्थं हि षड्विधहेतुभिः स्वामिनारायणविशिष्टाऽद्वैतसम्प्रदाययोः मध्ये विद्यत एव भेद इति निश्चप्रचम्।

अथ च पुनः “मतं विशिष्टाऽद्वैतं मे" इति विप्रतिपत्तिकराऽवभासमानश्लोको विचिन्त्यते।

अत्र मतमिति तु मनँ अवबोधने इति धातोः क्तप्रत्यये कृते निष्पद्यते, अभिप्रेतार्थं प्रयोक्तुं शक्यते। भगवत्स्वामिनारायणकाले प्राप्तेष्वद्वैतादिषड्विधवेदान्तदर्शनेषु विशिष्टाऽद्वैतं

योग्यम्, अन्येषां स्वामिनारायणदर्शनतो दूरत्वाद् अस्य च भक्तिमार्गप्रधानत्वात् तत्काले स्वामिनारायणदर्शनाऽभावाच्च, मुमुक्षवो भक्तिमार्गान्न पतेयुः इत्याशयादेव तथोक्तिः।

ननु कथमेवं शक्येत, पूर्वेऽपि शततमे श्लोके सहजानन्देन गदितम्,

**शारीरकाणां भगवद्गीतायाश्चाऽवगम्यताम्।**

**रामानुजाचर्यकृतं भाष्यमाध्यत्मिकं मम।।** शिक्षापत्री - १०० ॥

तथा च वचनमृतेऽपि,

"यथा रामानुजाचर्यस्वामिना क्षराक्षराभ्यां परः पुरुषोत्तम इति निरूपितं, तस्य पुरुषोत्तमस्योपास्ना मम।...... इति मे रुचिः।"[48] इत्यादिसन्दर्भाऽनुसारेण रामानुजाचर्यकृतमत एव स्वामिनारायणमान्यः इति चेत्, भगवतः इहापरलोके साकारस्वरूपस्य न, सत्यसिद्धान्तम् अवगन्तव्यम्, वर्णनाद्, यथोक्तं पूर्वं भक्तिमार्गप्रधानत्वादेव तत्सम्प्रदायाऽऽदरः। अत एव लोयाप्रकरणस्य चतुर्दशतमे वचोऽमृते सहजानन्देनोक्तम् -

"रामानुजस्याऽयं मतः...." इत्युक्त्वा "अथ च ममाऽभिप्रायस्तथा रुचिः वच्म्यहम्।"[49] अनेन विज्ञायते द्वयोः मध्ये मतस्य भेदत्वम्।

अन्त्यप्रकरणस्य वचनाऽमृतेऽपि "विषयाः विनिवर्तन्ते निराहारस्य देहिनः इति स्श्लोकस्याऽर्थं विज्ञापय, तदा मुक्तानन्दस्वामी रामानुजाचर्यकृतगीता-भाष्याऽऽधारितार्थमवोचत ततश्च महाराज उदतरत् तस्याऽर्थं तु मया एवं निश्चितम्... "[50] इति अनेन वाक्येनाऽपि वयं ज्ञातुं शक्नुमो यद् विचरोऽपि भिद्यते द्वयोः मध्ये, रामानुजाऽर्थं परित्यज्य स्वमतप्रस्थापनस्या वैशेष्याद्।

तथा च "गोलोको धाम चेप्सितम्" इत्यस्य पदस्याऽपि तथैव तात्पर्यमवबोध्यं, सहजानन्देन स्ववचने स्वनिवासस्थानतयाऽक्षरधाम्नः इङ्गित्वात्।

- "भगवतः अक्षरधाम तस्य प्राप्तिः।"[51]

-"अक्षरधाम्नि भगवान् सदा साकारः एव विराजमानः।"[52]

-"अक्षरधामनि या मूर्तिः, सा एव प्रत्यक्षः, न कोऽपि भेदः।"[53]

इति भूरि अक्षरधाम्नः स्वधामरूपेणोल्लेखः। तथा च अक्षरधाम्नस्तु वैकुण्ठगोलोकादिधामतः परत्वमपि स्फुटमवलोक्यते वचनाऽमृतगतसुखमीमांसायाम्।

-"वैकुण्ठाद् गोलोकस्य सुखमधिकं गोलोकाद् अक्षरधाम्नः सुखं तु अत्यधिकम्... "[54]

एवं च वचनाऽमृते चतुस्त्रिंशद्वारं गोलोकधामनाम स्मृतं किन्तु न कदापि तद्धाम परमं मम इत्यवोचत् परमात्मा। तस्माद्धि वैकुण्ठगोलोकाऽक्षरधामेतिधामत्रयस्य पारस्परिको भेदो निश्चीयते। अपरं तु गोलोकधाम तु भेदाऽभेदवादिनिम्बार्कऽचिन्त्यभेदाभेदवादिश्रीगौडीयमते प्रसिद्धं यत्र राधाकृष्णस्य मुख्यदेवत्वेनोपासना। सर्वेष्वप्यक्षरधामव्यतिरिक्तधामसु गोलोकधामोत्तमं, वैकुण्ठलोकतः पञ्चाशद्योजनपरत्वात्।

अथ च किञ्चित् व्याकरणादिदृष्ट्या विचिन्त्य प्रस्तूयते। विशिष्टपदस्य विशेषणपदाऽभिहितेनोप्युज्यत्वाद् 'विशिष्टाऽद्वैतम्' इति पदस्य जीवेश्वरमायाऽक्षरब्रह्म-विशिष्टाऽद्वैतं मतं मे इत्यप्यर्थकरणान्न दोषः, शिक्षापत्र्यामेव तत्त्वपञ्चकनिरूपणस्य प्राप्तत्त्वात्, तत्तूक्तं पूर्वम्।

तथैव तत्र 'गोलोक' इत्यत्र गो शब्दस्य किरणार्थत्वाद्[55] गोभिः किरणैः लोक्यते, गवां किरणानां वा लोकः इति विग्रहे कृते अक्षरधाम एवाऽर्थो लभ्यते, अक्षरधाम्नः प्रकाशयुक्तत्त्वात्।

एवं च तत्र इत्युक्ते अक्षरधाम्नि ब्रह्मात्मना ब्रह्मणः आत्मा स्वरूपमिव आत्मा स्वरूपं यस्य तेन ब्रह्मरूपो भूत्वा इत्यर्थः। कृष्णसेवा कृष कर्षणे इति धातोः कर्षति दुःखानीत्यर्थत्वात्, "कृष्णः काके पिके वर्णे हरौ व्यासे अर्जुने कलाविति"[56] सहजानन्दसेवा मुक्तिश्च गम्यताम् इत्यर्थः। इति भवत्येव सहजानन्दश्लोकस्य सहजानन्दाऽर्थः।

### ❖ तत्कालीनपरिस्थितिवशाद् विशिष्टाद्वैतशब्दप्रयोगः।

ननु शिक्षापत्रीवचनामृताऽऽदिग्रन्थेषु रामानुजाचार्यनामोल्लेखेन दृश्यते भगवत्स्वामिनारायणस्याऽपि तन्मार्गगतत्त्वम्। किन्तु प्रस्थापितहेत्वनुसारेण तु द्वयोः सम्प्रदाययोः मध्येऽतीव भेदः स्फुटः, तथाऽपि भेदाऽभावः कथमेवमाभातीति चेत्।

प्रसन्नोऽहमाकर्ण्य भवन्मौमुक्ष्यप्रश्नम्, सानन्दमुत्तीर्यते च मया। भगवत्स्वामिनारायणो नीलकण्ठरूपेण प्रव्रज्य गुजरेष्वस्थात्। तत्काले रामानन्दस्वाम्यादिसाधवः श्रीकृष्णभक्तावेव निमज्जाः। तद्दृष्ट्वा स्वमतप्रस्थापनेन स्वश्लाघाऽऽदिदोषप्रसारणभिया रामानुजाऽऽचार्या-ऽभिमतभक्तिमार्गः श्रेष्ठः इति अवोचच्छ्रीहरिरन्यथा मुमुक्षवो भक्तिमार्गमपि परित्यज्य स्वच्छन्दतया वर्तेरन्।

कथमेवं निश्चितम्, वचनाऽमृतसन्दर्भादेव। लोयाप्रकरणस्याऽष्टादशतमे वचनाऽमृते श्रीहरि उवाच- "भगवन्निश्चयसम्पत्तिः खलु सर्वतो महाकठिना। सा च निश्चयवार्ताऽतीव[57] दुर्गमेति कथयताऽपि भीयते यत् किं ज्ञाने वार्तायां कृतायां कस्यचिद् वैपरीत्यम् आपद्येतेति, तथा हि तेन कृतपूर्वा या स्वकीयाङ्गदृढता, तदङ्गं यद्यनया वार्तया त्रुट्येत् तर्हि स सत्सङ्गात् समूलम् अपगच्छेद् इति ।[58] न केवलमत्रैवाऽपितु मध्यप्रकरणस्य त्रयोदशतमे वचोऽमृतेऽपि - "यां चेमां वार्तामहं चिकीर्षामि, तां न हि चिकीर्षामि दम्भतो मानतः स्वमहत्त्ववृद्धये च। तत्त्वेवं मन्ये, 'केनचिदियं वार्ता विज्ञायेत तर्हि तज्जीवस्य भूयाद् अतिहितम् ......." इत्येवमुक्त्वा "तत्तेजोऽन्तर्गता या मूर्तिः सा एव प्रत्यक्षः महाराजः"[59] इति वचनानुसारेण विज्ञायते कीयति परिस्थितिः सत्यज्ञानकथनेऽपि। एवं हि दृश्यते कार्याणीप्रकरणस्य पञ्चमे जीवस्यात्यन्तिककल्याणं भगवदवतारप्रयोजनम्, एतस्मिञ्जन्मनि भगवति स्निह्येच्चेज्जन्मान्तरेऽपि भगवत्स्वामिनारायणस्य निष्ठां लप्स्यते। किन्त्वाधुनैव भगवति मनुष्यभावे दृष्टे जन्मान्तरे सत्सङ्गं लभेत न वेति शङ्का। सर्वेऽपि मुमुक्षवो मोक्षं लभेरन्, स्वधाम प्राप्नुयुः इति शुद्धाशया यत्र कुत्राऽपि यावत्यो वार्ता भगवद्भक्तिपरयाणा भगवत्साकृतित्वप्रस्थापिका आसन् ता एव वार्ता निबोधिताः। तेषु सम्प्रदायेषु या भगवत्सम्बन्धिन्यो वार्ताः स्वमताऽभिपरायणाः ता एवाऽऽदृतास्त्यक्ता अन्याः। 'यत् परः स शब्दार्थः'[60] इति न्याय्यादपि

तत्तद्ग्रन्थगतप्रधानविषयेभ्यस्तत्तद्ग्रन्थप्रधानविषयप्राबल्यमानेतव्यमिति तग्रन्थपठितृप्रागल्भ्यबुद्धेः सूचकम्। तस्मादेव हेतोः, शङ्करमताभिप्रेतपाञ्चदैविकपूजनम्,[61] वल्लभाचार्यप्रोक्त-उत्सवविधानम्,[62] निम्बार्कमतगतगोलोक-धामस्वीकृतिः,[63] शैवसम्प्रदायभिप्रेतशिवमन्दिरदर्शनवन्दनादि।[64] एवं हि रामानुजनिम्बार्कादिसिद्धान्तगत-स्वसिद्धान्ताऽभिप्रेतवस्तूनि विचित्य स्वशिष्येभ्यो नीरक्षरिमिश्रिताच्छुद्धदुग्धं परमकृपालुः सहजानन्दः प्रददौ।

विचिन्त्यते चेद् वचनाऽमृतशिक्षापत्रीप्रामाण्यविषये तदाऽवगम्यते, शिक्षापत्रीग्रन्थस्तु सदाचारपरायणः, न तु तत्त्वनिर्णयसिद्धान्तबोधकादिविषये प्रामाण्यं तस्याः। कथमिति चेदुच्यते, ग्रन्थारम्भमध्यान्तभागे तस्य तथात्वोल्लेखात्।

प्रारम्भे – वर्तितव्यं निरन्तरम्।[65]

मध्ये – एते साधारणा धर्माः पुंसां स्त्रीणां च सर्वतः।[66]

अन्ते च - वर्तिष्यन्ते ये...... ते धर्मादिचतुर्वर्गसिद्धिं प्राप्स्यन्ति।[67]

इति उपक्रमोपसंहारादिलिङ्गेन निर्णेतुं शक्यम्।

तथा हि शिक्षापत्रीग्रन्थभाष्यकर्तुरपि तथैव प्रस्थापनात्, ‘प्राचीकशद् वैदेशिकशिष्यान् उज्जिघृक्षासंकल्पितादेशलेखव्याजेन परमरहस्यं धर्मतत्त्वस्य’[68] इति धर्मग्रन्थरूपेण निरूपणात्। एवं च शतानन्दस्वामिनार्थदीपिकायां प्रारम्भे - धर्मप्रियं धर्मभुवं धर्मस्थं धर्मपोषकम्, इत्यादिना धर्मशब्दस्योपरि प्राधान्यम्।[69] तथा च वचनाऽमृतग्रन्थे सर्वत्रापि तत्त्वज्ञाननिरूपणस्य दृष्टत्वात्, तस्यैव तत्र प्रामाण्यम्। एवं हि कालनिदर्शनेऽपि वचनाऽमृतग्रन्थः शिक्षापत्रीग्रन्थात् पूर्वं प्रारब्धः, शिक्षापत्री तु वचनाऽमृतपरिसमाप्तिमध्यभागे समाप्ता, तस्माद्धि बीजाङ्कुङ्करभावोप्यशक्यः परस्परविषयभेदात्। अतो हि तत्त्वज्ञानविषयचिन्तने वचनाऽमृतग्रन्थस्यैव परमप्रामाण्यं बोध्यम्।

**उपसंहारः**

प्रस्तुतविविधकुशलतर्कसन्दर्भादिभिः तत्त्वामुखसैद्धान्तिकभेदाद् भगवद्धामभेदाद् भगवत्परमभक्तभेदान्मुक्तिभेदाद् धार्मिकभेदात् प्रत्यक्षगुरुहरिसेवनभेदाच्च विशिष्टाद्वैतदर्शनात् सर्वथा भिद्यते स्वामिनारायणदर्शनम्। एवं हि दर्शनद्वयशङ्कापङ्काऽपनोदनेन स्वच्छसुरभिप्रसारणेन च स्वामिनारायणसिद्धान्ताभाप्रकाशनेन शुद्धज्ञानेऽशुद्धज्ञाना-भावप्रभावान्मोमुद्यते मे मनः।

### श्लोकाऽष्टकप्रस्तुत्या समापनम्

॥ अथ पूर्वपक्षी।।

शिक्षापत्रीति ग्रन्थस्य सदाचारपरस्य च।
नासिकानेत्रसूर्यस्य श्लोकस्य मर्म किं ननु॥१॥
रामानुजीयसिद्धान्तात् स्वामिनारायणस्य च।
पादेन ज्ञायते साक्षात् सिद्धान्तो नाऽतिरिच्यते ॥२॥
विशिष्टाऽद्वैतशब्देन साम्यता दृश्यते स्फुटम्।
नैव चेद् दृश्यतेऽभेदो नेत्रदोषो निवारयेत् ॥३॥

।। अथ च सिद्धन्ती ॥

नाऽयं दोषोऽस्ति नेत्रस्य दोषोऽस्ति दर्शने सुहृद्।
द्वयोर्दर्शनयोर्मध्ये नानाऽस्ति भेदता मता।।४।।
तत्त्वभेदाद् धामभेदाद् भक्तभेदात् परात्तथा।
मुक्तिभेदाद् धर्मभेदात् प्रत्यक्षगुरुणा तथा।।५।।
शाब्दिकाऽर्थेन चाऽस्यैव श्लोकस्य दृश्यते स्फुटम्।

प्रमाणैरवगम्येत भेदोऽस्ति सम्प्रदाययोः ॥६॥

विशिष्टाऽद्वैतशब्दस्य तत्कालीनपरिस्थितेः।

भक्तिमार्गप्रधानत्वात् प्रयोग ईक्ष्यते शुचिः ॥७॥

तस्मात् कथयितुं नैव विद्यते संशयः खलु।

स्वामिनारायणाद् भिन्ते मतं रामानुजस्य च।।८।।

।। इति शम्।।

## पादटीका

1. भगवत्स्वामिनारायणजीवनचरितप्रथमभागः, 2. शिक्षापत्री 3. शिक्षापत्री-105
4. शिक्षापत्री-106 5. शिक्षापत्री- 107 6. ईश.-16
7. बृ.1/4/10 8. मा.1/2 9. छा.3/14/4
10. ऐ.3/1/3 11. छा.6/8/7 12. प्र.12
13. प्र.45 14. प्रमाणरत्नाकरग्रन्थः पृ.43
15. श्वेताश्वत.3/8 16. मुण्डक.2/1/2 17. श्वेताश्वतर.6/7
18. प्र.19 19. प्र.71, लो.14 20. म.32
21. पं.1 22. बृहद्ब्रह्मसंहित-3/6/56, लक्ष्मीतन्त्रम्-17/15-22
23. श्रीतत्त्वसिन्धाञ्जनम्-पृ.14-23 24. स्तोत्ररत्नभाष्यम्-1, पृ.7
25. मुमुक्षुपडी- 2/8, वेदान्तविचारमाला- 1/63 26. प्र.64, लो.13 27. प्र.21
28. प्र. 27 29. वर.19 30. प्र.21, म. 13, सा 17/19
31. लो. 7 32. श्रीभाष्यम्-3/3/26 33. यतीन्द्रमतदीपिका, अष्टमोवतारः
34. यतीन्द्रमतदीपिका, अष्टमोवतारः 35. श्रीभाष्यम्-1/1/4 36. सा-9, म. 48, वेदरस-पृ.-149
37. प्र.37, 61, 72 38. गो.वा.पृ-368, श्रीहरिचरितम्-3/12/20, श्रीहरिलीलाकल्पतरूः- 7/21/12
39. सा-9, म.-48, वेदरस-पृ.149 40. श्रीभाष्यम्-1/3/33 41. परकालसूरिचरितम्
42. श्रीभाष्यम्-3/1/25 43. प्रपन्नामृतम्- 49 44. शिक्षापत्री- 17
45. शिक्षापत्री- 12, 15 46. शिक्षापत्री23, 84, 149

47. शिक्षापत्री- 44, 45
48. लो. 14
49. लो. 14
50. अ.32
51. प्र. 19
52. प्र. 71
53. अ.31
54. पं.1
55. वाचस्पत्यम्-पृ.2681
56. अनेकार्थसङ्ग्रहद्विस्वरकाण्डः 134
57. लो 12 अनुसारमुत्तमनिर्विकल्पनिश्चयः
58. लो. 18
59. म.13
60. तत्त्वचिन्तामणिः- शब्दप्रमाण्यवादः-
आसत्तिवादपूर्वपक्षः
61. शिक्षापत्री-84
62. शिक्षापत्री-81, 82
63. शिक्षापत्री- 121
64. शिक्षापत्री- 23, 149
65. शिक्षापत्री- 10
66. शिक्षापत्री- 122
67. शिक्षापत्री-206
68. शिक्षापत्रीभाष्यम्- 1
69. अर्थदीपिकाटीका

## सन्दर्भग्रन्थसूची

१. साधुः भद्रेशदासः, ब्रह्मसूत्रस्वामिनारायणभाष्यम्, प्रथमावृत्तिः, स्वामिनारायण अक्षरपी, मई २००९ अमदावाद।

२. साधुः भद्रेशदासः ईशाद्यष्टोपनिषत्स्वामिनारायणभाष्यम्, प्रथमा आवृत्तिः, स्वामिनारायण अक्षरपीठ, दिसम्बर २००९ अमदावाद।

३. साधुः भद्रेशदासः, छान्दोग्योपनिषत्स्वामिनारायणभाष्यम्, प्रथमा आवृत्तिः, स्वामिनारायण अक्षरपीठ, अप्रैल २०१२ अमदावाद।

४. साधुः भद्रेशदासः, बृहदारण्यकोपनिषत्स्वामिनारायणभाष्यम्, प्रथमा आवृत्तिः, स्वामिनारायण अक्षरपीठ, अप्रैल २०१२ अमदावाद।

५. साधुः भद्रेशदासः, श्रीमद्भगवद्गीतास्वामिनारायणभाष्यम्, प्रथमा आवृत्तिः, स्वामिनारायण अक्षरपीठ, जनवरी २०१२ अमदावाद।

६. साधुः भद्रेशदासः, स्वामिनारायणसिद्धान्तसुधा, प्रथमा आवृत्तिः, स्वामिनारायण अक्षरपीठ, जून २०१७ अमदावाद।

७. भगवत्स्वामिनारायणजीवनचरितप्रथमभागः स्वामीनारायण अक्षरपीठ, अहमदाबाद।

८. बृहद्ब्रह्मसंहिता आयसाक्षरैः मुद्रिता ई. १९१२।

९. शिक्षापत्री - स्वामिनारायण अक्षरपीठ, अहमदाबाद षोडशावृत्तिः अप्रैल २०१५।

१०. भगवत्स्वामिनारायणप्रबोधितवचनामृतस्य प्रथमावृत्तिः, स्वामिनारायण-अक्षरपीठ, २०१७ अमदावाद।

११. साधुः श्रुतिप्रकाशदासः, प्रमाणरत्नाकरः, द्वितीयावृत्तिः, आर्ष अक्षरधाम गान्धिनगर, २०१७।

१२. सुधाकरः मालवीयः, लक्ष्मीतन्त्रम्, प्रथमावृत्तिः, चैखम्बा, वाराणसी, ई २००३।

१३. स्वामी आदिदेवानन्दः, यतीन्द्रमत दीपिका, द्वितीयावृत्तिः १९६७, रामकृष्णमठ, मद्रास।

१४. रामानुजाचार्यः, श्रीभाष्यम् - श्रीसर्वेश्वरामुद्रालायः वृन्दावन, ई १९७१।

१५. वाचस्पत्यम् - विद्याविलासमुद्रालयः, वाराणसी, १९६२।

१६. अनेकार्थसङ्ग्रहद्विस्वरकाण्डः १३४- विकिस्रोतः।

१७. तत्त्वचिन्तामणिः -शब्दप्रामाण्यवादः- आसत्तिवादपूर्वपक्षः विकिस्रोतः।

# मेघदूते व्यवहारज्ञानम्

शुभलक्ष्मी आचार्यः
अध्यापिका, संस्कृतविभागः
स्वामिविवेकानन्दस्मारकस्वयंशासितमहाविद्यालयः
जगतसिंहपुरम्, ओडिशा

**शोधसारः**

क्रान्तद्रष्टुः कालिदासस्य काव्येषु लोकाचारस्य लोकव्यवहारस्य च यथोचितम् वर्णनं समुपलभ्यते। रघुवंशे राज्ञः दिलीपस्य पुत्रप्राप्तिप्रसङ्गः भवतु अथवा अभिज्ञानशाकुन्तले दुर्वासाभिशापः भवतु अथवा मेघदूते यक्षस्य अभिशापप्रसङ्गः भवतु सर्वत्र कालिदासः लोकाचारस्य एव जयगानं करोति। मेघदूते लोकाचारस्य सामाजिक व्यवहारस्य च दृष्टान्तभूतानि उदाहरणानि विलोक्यन्ते। शोधपत्रेऽस्मिन् स एव लोकाचारप्रसङ्गः आलोचितः।

***कूटशब्दाः*** – आरम्भः, उत्तमः, व्यवहारज्ञानम्, मेघदूतम्, सम्पत्।

**उपक्रमः**

काव्यम् आनन्दाय – इति न्यायेन काव्यस्य प्रमुखं प्रयोजनं भवति आनन्ददानम्। तथापि काव्यमाध्यमेन व्यवहारज्ञानवितरणमपि संस्कृतकवीनाम् अन्यतमम् उद्देश्यं वर्तते। अतः प्रायतः संस्कृतस्य सर्वेषु काव्येषु व्यवहारज्ञानविषयिणी चर्चा उपलभ्यते। तेन एव क्रमेण मेघदूते व्यवहारज्ञानम् आश्रित्य शेधपत्रमिदं विरचितम्।

मानवेन कीदृशं आचरणं करणीयं, कीदृशं आचरणं परिहरणीयम् इति विषये मेघदूतेऽपि काचित् चर्चा कृता। तेषु कानिचित् उदाहरणानि अधः प्रदीयन्ते।

1. कामार्त्ता हि प्रकृतिकृपणाश्चेतनाचेतनेषु।[1]

मेघः धूम – ज्योतिः – सलिल – मरुतां सन्निपातः। अत्र कालिदासः कथयति यत् पटुकरणैः समर्थेन्द्रियवद्भिः प्राणिभिः प्रेषणीया वार्ताः क्व निर्जीवः मेघश्च क्व। अर्थात् अत्यन्तबुद्धिमन्तः प्राणिनः अथवा मनुष्याः एव वार्ताः प्रापयितुं क्षमाः। ताश्च वार्ताः बुद्धिमद्भिः

दूतैः प्रेष्यन्ते। किन्तु अत्यन्तम् उत्सुकतावशतः एतत् सर्वं न विचारयन् यक्षः निर्जीवं मेघं दौत्याय अयाचत। अत्र कालिदासः निर्दिशति यत् कामप्रपीडिता जनाः विचारविमूढाः भवन्ति। कः चेतनः कः अचेतनश्च तद्विषये तेषां ज्ञानं न वर्तते। अतः ते चेतनाचेतनेषु पार्थक्यनिरूपणाय असमर्थाः भवन्ति। कामार्त्तविषये अन्यत्र उक्तमस्ति –

न पश्यति च जन्मान्धो कामोऽन्धो नैव पश्यति।
मदोन्मत्ता न पश्यन्ति ह्यर्थी दोषं न पश्यति।।

2. न क्षुद्रोऽपि प्रथमसुकृतापेक्षया संश्रयाय।
प्राप्ते मित्रे भवति विमुखः किं पुनर्यस्तथोच्चैः।[2]

त्वं यदा आम्रकूटं प्रति गमिष्यसि तदा तत्र वनाग्निः पर्वतं ग्रीष्मकाले दहति। जलवर्षणद्वारा त्वं तस्य दाहं शमयसि। अतएव स आम्रकूटः त्वां शिरसा वक्ष्यति। साधारणजनः अपि उपकारं स्मृत्वा कृतज्ञः भवति। महान् पर्वतः आम्रकूटः विशालः। स ते महती पूजां करिष्यति। अत्र कालिदासेन र्निदिष्टं व्यवहारज्ञानम् अतीव महत्वपूर्णमस्ति। यदि कोऽपि उपकारी जनः आश्रयार्थं आगच्छति तर्हि तस्य पूर्वकृतम् उपकारं स्मृत्वा तस्मै आश्रयं प्रदातुं नीचजनः अपि कुण्ठितः न भवति। यः पुनः आम्रकूटसदृशः महान् तस्य विषये किं वा वक्तव्यम्। अस्मात् सूच्यते यत् उपकारिणः कृते सर्वदा सर्वथा च आश्रयः प्रदातव्यः। अस्माकम् उपनिषदि अपि ईदृशं चिन्तनं वर्तते। यथा – अतिथि देवो भव।

3. रिक्तः सर्वो भवति हि लघुः पूर्णता गौरवाय।[3]

यक्षः मेघं कथयति – मार्गे गच्छन् वर्षणाद् हेतोः त्वं क्लान्तः लघुः च भविष्यसि। तस्याः गम्भीरानद्याः जले मत्तमातङ्गाः स्नानं कुर्वन्ति। फलेन तस्याः जलं तिक्तं भवति। तेन त्वं वृष्टिजलवमनफलेन दुर्बलः सन् तस्याः तत् जलं पास्यसि। फलेन तव शरीरं जलपूर्णं स्यात् गुरु भविष्यति च। अत्र कालिदासः सूचयति यत् रिक्तः अर्थात् शून्यः सर्वदा लघुः भवति।

परन्तु पूर्णता गौरवाय कल्पते। अतः सर्वे पूर्णताम् एव कामयन्ते। पूर्णताप्राप्त्यर्थं मानवेन चेष्टा करणीया।

4. मन्दायन्ते न खलु सुहृदामभ्युपेतार्थकृत्याः।[4]

यक्षः मेघं सानुनयं निवेदयति– त्वं उज्जयिन्यां कस्यांश्चित् सौधचूडायां रात्रौ विश्रामं नेष्यसि। तत्र पारावताः गाढनिद्रायां सुप्ताः। निर्जने तस्मिन् सौधशिखरे त्वं विद्युता सह केलिं करिष्यसि। साऽपि तव केलिविलासेन क्लान्ता भविष्यति। त्वं प्रभाते सति अवसादं विहाय पुनः अलकां प्रति यास्यसि। मित्राणां प्रियकारिणः कदापि विलम्बं न कुर्वन्ति। अतः त्वं शीघ्रं यास्यसि। अत्र उक्तमस्ति यत् ये मित्राणां कार्यसाधनाय प्रतिश्रुतिबद्धाः सन्ति तैः कार्यसाधने विलम्बः न करणीयः।

5. आपन्नार्त्तिप्रशमनफलाः सम्पदो ह्युत्तमानाम्।[5]

यक्षः मेघं कथयति – त्वं यदा वायुमार्गेण हिमालयसमीपं गमिष्यसि तदा भीषणः वनाग्निः तं दहतीति पश्यामि। तदा वह्निखण्डस्खलनेन चमरीमृगाणां बालभारः दह्येत। तस्मिन् समये घनघोरवृष्टिं विधाय तं वनाग्निं शमयेः। कारणं साधुजनानां सम्पदः विपन्नानां विपदुद्धाराय भवन्ति। अत्रोक्तमस्ति यत् सज्जनानां सम्पत् विपद्ग्रस्तानां उद्धरणाय एव उद्दिष्टा। मेघो भवति उत्तमजनः। तस्य जलसंपद् अस्ति। एतत् केवलं विपद्ग्रस्तानां दुःखस्य अपनोदनाय एव सहायकं स्यात्। अन्यत्र उक्तमस्ति यत् –

पिबन्ति नद्यः स्वयमेव नाम्भः
खादन्ति न स्वादुफलानि वृक्षाः।
नादन्ति शस्यं खलु वारिवाहा
परोपकाराय सतां विभूतिः।।

6. के वा न स्युः परिभवपदं निष्फलारम्भयत्नाः।[6]

शरभमृगाः मेघं वीक्ष्य उल्लसिताः सन्तः तं लंघयितुं चेष्टेरन्। परन्तु मेघः आकाशे स्थित इति हेतोः ते तं लंघयितुं न समर्थाः भविष्यन्ति, केवलं स्वाङ्गभङ्गं करिष्यन्ति एव। तस्मिन् समये करकापातेन मेघः तान् ताडयिष्यति। वृथा कार्यं ये कुर्वन्ति ते दुःखं लभन्ते। अत्र उक्तमस्ति यत् निष्फलकर्मणि कृतप्रयत्नः को वा दण्डनीयो न भवति। अर्थात् सर्वे भवन्ति एव। परिभवस्य अर्थः तिरस्कारः अथवा अनादरः। यथा –

अनादरः परिभवः परीभावस्तिरस्क्रिया। - इत्यमरः।[7]

पदम् इत्युक्ते स्थानम् अथवा पात्रम्। अमरकोषानुसारं यथा –

पदं व्यवसित त्राणस्थानलक्ष्माऽघ्रिंवस्तुषु।[8]

7. कच्चिद्भर्तुः स्मरसि रसिके त्वं हि तस्य प्रियेति।[9]

श्लोकेस्मिन् महाकविः कालिदासः विरहिण्याः नायिकायाः चेष्टां वर्णयति। यक्षः कथयति हे मेघ त्वं यदा मम गृहं गमिष्यसि तदानीं मम प्रियतमा पूजायै पुष्पादिकं धृत्वा व्यस्ता तिष्ठेत्। अथवा पूजादिकं समाप्य नीचैः निवसन्ती भूमौ मम रूपं निजभावनया कल्पयन्ती चित्रयितुं चेष्टेत। अथवा पिञ्जरस्थां शारिकां पृच्छेत् – हे रसिके त्वं तस्य मे प्रियतमस्य प्रिया आसीः। तत् त्वं स्मरसि किम् ? अत्र कविः लोकव्यवहारे विरहावस्थायां नायिकानां स्वं प्रति वैराग्यं, अन्येषां प्रियद्रव्याणां माध्यमेन कान्तस्य स्मरणं च इति लोकव्यवहारं सूचयति।

**उपसंहारः**

अनेन प्रकारेण मेघदूते यत्र यत्र व्यवहारज्ञानविषयिणी सूचना वर्तते तासां तासाम् उक्तीनां अध्ययनम् एव शोधपत्रेऽस्मिन् विहितम्।

## पादटीका

1. मेघदूतम् - 1.5
2. तत्रैव – 1.17
3. तत्रैव – 1.20
4. तत्रैव – 1.41
5. तत्रैव – 1.56
6. तत्रैव – 1.57
7. अमरकोषः – 1.7.22
8. तत्रैव – 3.3.93
9. मेघदूतम् – 2.25

## सन्दर्भग्रन्थसूची

1. मिश्र, व्रजसुन्दर, मेघदूत, विद्यापुरी, बालुबजार, कटक, 1999.
2. रेग्मी, शेषराजशर्मा, मेघदूतम्, चौखम्वा विद्याभवन, वाराणसी, 2015.
3. शास्त्री, दयाशङ्कर, मेघदूतम्, चौखम्वा सूरभारती प्रकाशन, वाराणसी, 2014.
4. Kale, M.R, The Meghaduta of Kalidasa, Motilal Banarsidas, Delhi, 1987.
5. Nandargikar, G.R, Meghaduta of Kalidasa, New Bharitya Book Corporation, Delhi, 2001.

# कुमारीकुसुम

डॉ.सत्यव्रत नन्द
अनुसन्धानसहायक (संस्कृत)
राष्ट्रीय भारतीय चिकित्सा सम्पदा संस्थान,हैदराबाद

सुप्रिया मिश्र
स्नातकोत्तर, वनस्पतिविज्ञान
महिला महाविद्यालय, सम्बलपुर, ओड़िशा

***विचारांश*** *– कुमारीपर्याय, कुमारी का गुणकर्म और उपचारात्मक उपयोग, कुमारीकुसुम, घीकुआँर फूलों का आगमन, अनुकूल परिस्थितियाँ, औषधीयगुण और उपचारात्मक उपयोगिता, विश्लेषण दृष्टि, निष्कर्ष।*

## उपक्रम :

प्राचीन वैदिक काल से आज तक घृतकुमारी के औषधीयगुणों का वर्णन अव्याहत रहा है। सिर्फ आयुर्वेद में ही नहीं, बल्कि इसका कॉसमेटिक उपयोग को लेकर आज हर जगह कुमारी का प्रचार प्रसार लोगों को आकर्षित किया है। मूलतः संस्कृत व्याकरण में कुमार शब्द के स्त्रीत्व विवक्षा में प्रथमवयोवचन करके ङीप् प्रत्यय से कुमारी शब्द 'द्वादशवर्षीया कन्या' के अर्थ को प्रकट करता है। परन्तु "कुं पापं दुरितं मारयति, कुं-भूमिं मारयति कुमारी; कुत्सितो मारोऽस्या इति वा, तस्याम्" ऐसे व्याख्याकार श्रीवल्लभमणि निघण्टुशेष में कुमारी का घृतकुमारी(औषधी) के अर्थ में व्याख्या करते हैं।[1] द्रव्य, पृथ्वी, अचलसजीव और औषधी ऐसे चार अर्थों के साथ कुमारी शब्द का प्रयोग अमरकोशकार निर्देश करते हैं।[2] उन चार अर्थों में से औषधी वाला अर्थ के साथ कुमारी शब्द का विचार सम्पूर्ण पत्र में किया गया है।

## शोध सामग्री और अनुसन्धानशैली:

इस शोधकार्य हेतु मुख्यतः आयुर्वेद के उन द्रव्यगुण ग्रन्थों का व्यवहार किया गया, जिन ग्रन्थों में कुमारी को लेकर वर्णना मिलता है। साथ ही ऋग्वेद और अथर्ववेद के कुछ अंश मूल तथा प्रामाणिक स्रोत के रूप में विचार किया गया है। कुछ महत्वपूर्ण अंशों को सम्मिलित करने हेतु वनस्पति विज्ञान के तथ्यों को भी उद्धहण किया गया है। कुमारी के नामपर्याय और

उपचारात्मक उपयोगिता को लेकर उन सभी आचार्यों का मतों का क्रमशः विश्लेषण किया गया है। अतः यह शोध सम्पूर्ण साहित्यिक अनुसन्धान के आधार पर प्रस्तुत है।

## कुमारीपर्याय :

घृतकुमारी एक ऐसे औषधीय पौधा है जो *कैरातिका कुमारिका सका*[3]..ऐसे वैदिककाल से प्रसिद्ध है और इसे हिंदी में घीकुआँर तथा वनस्पति विज्ञान(Plant Science) में इसे Aloevera (L.) Burm f.Syn A.barbadensis Mill Asparagaceae नाम से जाना जाता है। श्रीभावमिश्र ने भावप्रकाश के द्व्यर्थकवर्ग में कुमारी शब्द के प्रयोग से दो अलग अलग औषधी को स्वीकारा है जैसे कि - *घृतकुमारिका, शतपत्री च*[4]। अन्य आचार्यों ने भी भिन्न भिन्न औषधियों के लिए यह नाम बताया है। आयुर्वेद के निघण्टुओं में कुमारी के लिए बहत सारे पर्याय कहे गये हैं। विभिन्न आचार्यों के अनुसार कुमारी के पर्याय एवं गुणकर्मों में मतभेद भी दिखाई देता है। रूप, आकृति आदि विचारपूर्वक नरहरिपण्डित राजनिघण्टु के पर्पटादिवर्ग में कुमारी के इक्कीस पर्याय बताते हैं तथा भावमिश्र आदि अन्य आचार्यों के मत निम्न प्रकार (सारणी क्रमाक.1) दिया गया है।

**(सारणी क्रमांक.1)**

| क्रमांक | राजनिघण्टु | मदनपालनिघण्टु | निघण्टुशेष | कैयदेवनिघण्टु | पर्यायमुक्तावली | सरस्वतीनिघण्टु | भावप्रकाश |
|---|---|---|---|---|---|---|---|
| 1. | कुमारी | कुमारी | कुमारी | कुमारी | कुमारी | कुमारी | कुमारी |
| 2. | गृहकन्या | मण्डला | कर्णिका | गृहकन्या | सहा | दण्डपुष्पी* | गृहकन्या |
| 3. | कन्यका | माता | चारुकेसरा* | कन्या | तरुणी | कुमारिका | कन्या |
| 4. | दीर्घपत्रिका | गृहकन्या | भृङ्गसम्मता | मण्डला | कन्या | पत्रमज्जका | घृतकुमारिका |
| 5. | स्थलेरुहा | अतिपिच्छला | तरणी | फलमत्स्या | स्तवकशालनी | | |
| 6. | मृदुकन्या | रसायनी | रामतरणी | आक्षिकीरसा | | | |
| 7. | बहुपत्रा | कटिकिनी | गन्धाढ्या | | | | |
| 8. | अमरा | सवरा | कन्यका | | | | |
| 9. | अजरा | वनोद्भवा | सहा | | | | |
| 10. | कण्टकप्रावृता | | | | | | |
| 11. | भृङ्गेष्टा | | | | | | |
| 12. | विपुलस्रवा | | | | | | |
| 13. | व्रणघ्नी | | | | | | |

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| 14. | तरुणी | | | | | | |
| 15. | रामा | | | | | | |
| 16. | कपिला | | | | | | |
| 17. | अम्बुधिस्रवा | | | | | | |
| 18. | सुकण्टका | | | | | | |
| 19. | स्थूलदला | | | | | | |
| 20. | वीरा | | | | | | |
| 21. | घृतकुमारी | | | | | | |

निघण्टुकार जैसे नरहरिपण्डित, नृपमदनपाल, वैद्यकैयदेव, हरिशरणसेन, सरस्वतीनिघण्टुकार, श्रीभावमिश्र आदि घीकुआँर के लिए उन पर्यायों में से कुमारी, कन्या, गृहकन्या, सहा, माता और तरुणी ऐसे पर्यायों को प्रतिपादन करने के साथ साथ कुछ विशेष नामों को अपने निघण्टु में स्थान देकर यह औषधि को पहचानने में लोगों का विशेष मार्गदर्शन किया है। यह घीकुआँर भारतवर्ष के सभी प्रादेशिक स्थल पर पाई जाती है। इसकी विविधता भी देखने को मिलती हो जो कुमारी के नाम से व्यवहृत है। (*रूपात्मक पर्यायवाची शब्द जो फूल को संदर्भित करते हैं।)

**कुमारी का गुणकर्म और उपचारात्मक उपयोग :**

घृतकुमारी के लिए नरहरिपण्डित दूसरे आचार्यों से अधिक पर्याय लिखते हैं अपने राजनिघण्टु ग्रन्थ में। पर्याय के उपरान्त इस औषधी का गुण एवं कर्मों का वर्णना करते हुए समुदाय सात निघण्टुकारों का मत उपलब्ध होता है। स्थान, काल, ऋतु, प्रकार व्यवस्था आदि के अनुसार मतपार्थ्यक्य का दृष्टिगोचर होना ही एक औषधी का वैशिष्ट्य तथा गुणोत्कर्ष को दर्शाता है। उन सभी मतानुयायियों का द्रव्यगुणनिर्देश को निम्नप्रकार(सारणी क्रमांक.2 में) प्रस्तुत किया गया है।

**(सारणी क्रमांक.2)**

| **निघण्टुनाम** | **रस** | **गुण** | **वीर्य** | **विपाक** | **कर्म** | **उपचारात्मक उपयोग** | **विशिष्ट गुण/ उपकारिता** |
|---|---|---|---|---|---|---|---|
| **भावप्रकाश** | तिक्ता मधुरा | -- | शीता | -- | भेदनी, बृंहणी, वात एवं कफ शमनकारी | गुल्म, प्लीहा, यकृद्वृद्धि, ज्वर, ग्रन्थि, अग्निदग्ध, विस्फोट, पित्तरक्त, सभी त्वगामय और विषविकारों का नाशक। | रसायनी, नेत्र्या, बल्या, वृष्या |
| **राजनिघण्टु** | तिक्ता | -- | हिमा | -- | कफ नाशक और पित्त शमनकारी | कास, विष, श्वास और कुष्ठ रोगों का उपशम करनेवाला है। | मदगन्धिः, रसायनी |
| **मदनपाल निघण्टु** | -- | -- | शीता | -- | भेदनी और कफ शमनकारी | यकृत्, प्लीहा, सभी ज्वर, ग्रन्थि, विस्फोट, पित्तरक्त और सभी त्वगामय में हितकारी। | -- |
| **माधव द्रव्यगुण** | -- | -- | शीता | -- | भेदनी और कफ शमनकारी | यकृत्, प्लीहा, सभी ज्वर, वह्नि, विस्फोट, पित्तरक्त, त्वगामयों में हितकारी। | -- |
| **सोढल निघण्टु** | तिक्ता | पिच्छिला, सरा | शीता | -- | वातजित्(वात शमनकारी) | कुष्ठविनाशनी, तद्रसोद्रेकाद् उदावर्तादि नाशकरी। | -- |
| **कैयदेव निघण्टु** | तिक्ता, मधुरा | | शीतला | -- | भेदनी, वात और कफ शमनकारी | गुल्म, प्लीहा, यकृद्वृद्धिं, ज्वर, ग्रन्थी, अग्निदग्ध, विस्फोट, पित्तरक्त, त्वगामय और विष को नष्ट करता है। | चक्षुष्या, बल्या, वृष्या, रसायनी |
| **सरस्वती निघण्टु** | -- | महापिच्छिल पत्रिका | शीता | -- | -- | -- | चक्षुष्या |

(भेदनी – कोष्ठकाठिन्य तथा पथरी भेदनकारी, बृंहणी - शरीरवर्द्धक, नेत्र्या/चक्षुष्या – आँख के लिए हितकरी, बल्या - बलकारी, वृष्या – पुरुष शक्तिवर्द्धक, रसायनी – सर्वाङ्ग पोषक , गुल्म - पेट की गांठ/ग्रंथि संबंधी वृद्धि, प्लीहा -प्लीहा रोग, यकृद्वृद्धि – वसीय यकृत्, ग्रन्थी – शरीर में गांठ, अग्निदग्ध/वह्नि – आग से जला हुआ घाव, विस्फोट - छाला पडना, पित्तरक्त

- रक्तदोष, त्वगामय - चर्मरोग, ज्वर - बुखार, उदावर्त - मल और मूत्र के रुकने के कारण वायु का ऊपर की ओर चलना, मदगन्धि – मद सदृश गन्धयुक्त)

यहाँ पर शीतल गुण के लिए आचार्यों ने शीता, शीतला, हिमा ऐसे तीन शब्दों का प्रयोग किया है। पद्यों में से विशेष लाभकारक पारिभाषिक शब्दों का यहाँ विशेष रूप से चिह्नित किया गया है। द्रव्यगुण ग्रन्थों के साथ साथ अष्टाङ्गसंग्रहकार वाग्भट ने भी उत्तरस्थान के अभिष्यन्दप्रतिषेध में कुमारी का महत्व के उपर प्रकाश डाला है - *कुमारी सर्वश्लेष्माक्षिरोगघ्नी*[5]। यहाँ कफ विकार से सभी नेत्र समस्या तथा सम्बन्धीय विकारों को लेकर के आचार्य वाग्वट ने घीकुआँर का इस प्रकार जिक्र किया है जो कि उपरोक्त नेत्र सम्बन्धी चिकित्सा तथा उपकारात्मक भाव को सिद्ध और सुदृढ करता है।

यह स्वाद में तिक्त रस होने के कारण रक्त शर्करा के स्तर को कम करने में मदद करता है, इसलिए मधुमेह के लिए लाभकारी है। यह जलन और अन्य त्वचा विकारों को ठीक करने में सहायक है। यह घावों और अल्सर से राहत देता है। यह मुंहासों को बढ़ने से रोकता है और त्वचा को नमी देता है। आजकल इसका और उपयोग भी देखने को मिलते हैं जैसे फंगस, कीड़े के काटने, दाद(herps), योनि संक्रमण और एलर्जी प्रतिक्रियाओं के इलाज में मदद करता है। इसका रस विविध पेट बीमारियाँ जैसे कि पीलिया(jaundice), रजोरोध(amenorrhea) और बवासीर(piles) जैसी स्थितियों में एक टॉनिक है। इसे एंटीसेप्टिक माना जाता है, कई वायरस और बैक्टीरिया को मारने में इसका मदद लिआ जाता है। यह शरीर को क्षारीय बनाने में मदद करता है, एसिड उत्पादन को संतुलित करता है और कब्ज का इलाज करता है। यह पथरी(kidney stones), आंत में क्रोहन रोग(crohn's disease) और संवेदनशील आंत की बीमारी (Irritable Bowel Syndrome - IBS) को रोकता है। यह रक्तवसा(cholesterol) और तनाव(oxidative stress) के स्तर को भी नियंत्रित करता है।

कुमारी सत्व से विविध प्रस्तुति(formulations) आयुर्वेद में वताए गए हैं। सामान्य उपयोग के बारे में आचार्यों ने वताया है कि अगर घीकुआँर के पत्तों का मज्जा(Leaf pulp) लेते हैं तो 1 – 3 grams, अगर ताज़ा रस (Fresh Juice) लेते हैं तो 10 – 20 ml, और जलीय अर्क (Aqueous Extract) लेते हैं तो 100 – 300 mg.

कुमारी भेदनीय होने के कारण मात्राधिक मौखिक सेवन से कभी-कभी पेट में ऐंठन (abdominal cramps) और दस्त (diarrhea) हो सकता है। गर्भावस्था और स्तनपान के दौरान इसका सेवन न करें तो बहत अच्छा है।

**कुमारीकुसुम :**

कुसुम शब्द संस्कृत में पुष्प के लिए प्रयुक्त है। कुमारी का कुमुम(फूल), एकपद में कुमारीकुसुम बनता है। घीकुआँर (एलोवेरा) अपने औषधीय और कॉस्मेटिक लाभों के लिए जाना जाता है। लोग सिर्फ कुमारी का पत्तों का व्यवहार करते हैं इसलिए कई लोगों को यह जानकर आश्चर्य होता है कि यह फूल भी पैदा कर सकती है।



**घीकुआँर फूलों का आगमन :**

घीकुआँर (एलोवेरा) के पौधे, जब परिपक्क और स्वस्थ होते हैं, तो एक फूल का डंठल पैदा कर सकते हैं जिसे पुष्पक्रम(an inflorescence) कहा जाता है। इसका फूल आकार में नली सा (tubular) होते हैं और पीले, नारंगी या लाल जैसे रंगों में आते हैं। फूलों का

खिलना आमतौर पर सर्दी के अंत या वसंत की शुरुआत में होता है, जो पर्यावरणीय परिस्थितियों पर निर्भर करता है।

**अनुकूल परिस्थितियाँ :**

- पर्याप्त आलोक - घीकुआँर को फूल खिलने के लिए प्रचुर मात्रा में आलोक, अप्रत्यक्ष धूप की आवश्यकता होती है।
- यथोचित जल सेचन - अत्यधिक पानी देने से पौधे को नुकसान हो सकता है और फूल आने में बाधा आ सकती है। पानी कम से कम डालना है और पानी देने के बीच मिट्टी को सूखने के लिए छोड़ देना है।
- ठंडी अवधि - ठंडे तापमान की अवधि(कार्तिक माह), विशेष रूप से सर्दियों के दौरान फूल खिलने को उभरते है।

घर के अंदर घीकुआँर के पौधे हमेशा फूल खिला नहीं सकते हैं, क्योंकि उनमें अक्सर बाहर पाई जाने वाली आदर्श परिस्थितियों का अभाव होता है। हालाँकि, उचित देखभाल के साथ, गमले में लगा एलोवेरा भी खिल सकता है, जो इसके लाभों को एक शानदार दृश्यात्मक पक्ष प्रदान करता है।

**औषधीयगुण और उपचारात्मक उपयोगिता :**

जैसे कि आयुर्वेद द्रव्यगुण के अनुसार सभी आचार्यों ने कुमारी के बारे में विस्तार से कहा है, कुमारी पत्र के औषधीयगुणों को स्पष्ट किया है; उसी तरह घीकुआँर फूलों का भी चिकित्सकीय उपकारिता है। यद्यपि पर्यायों का अनुशीलन से, विशेष कर के सरस्वतीनिघण्टु का **दण्डपुष्पी** तथा निघण्टुशेष का **चारुकेसरा** नाम से कुमारी पुष्प का यत्किंचित् आभास प्रतीयमान होता है किन्तु कुमारी पुष्प के बारे में किसी ने भी वैसे आग्रह नहीं दिखाया; जो वैद्य कैयदेव ने कुमारी प्रसङ्ग में कहा है। यह हो सकता हे कि घीकुआँर के फूल सदैव उपलब्ध न होने के कारण इसे विशेष ध्यान नहीं मिल पाया हो या अन्य कारणान्तर।

कुमारी के गुणकर्म लिखने के उपरान्त विशेषकर के कुमारी के फूलों का जिकर करते हुए श्रीवैद्यकैयदेवपण्डित लिखते हैं –

**वातपित्तकृमिहरं कुमारीकुसुमं गुरु।**[6]

घीकुआँर का फूल गुण में गुरु(भारी) होता है। यह शरीर में वात एवं पित्त दोषों का शमन करते हुए कृमियों का उपशम कराता है।

**विश्लेषण दृष्टि :**

यहाँ वैद्य कैयदेव ने कुमारी कुसुम का नाम लेते हुए कुमारी पत्र के समान, फूलों का भी गुणकर्म निर्देश करके उसमें विद्यमान औषधीय गुण तथा उपचारात्मक उपयोग(therapeutic uses) का स्पष्ट उल्लेख करते हैं। जैसे आयुर्वेद के सभी आचार्यों ने कुमारी को 'विषनाशक' के रूप में दर्जा दिया है, वैदिककाल में भी सर्पविष चिकित्सा के लिए कुमारी का उपयोग **कन्या** नाम से सूचित किया गया है - *तौदी नामासि कन्या घृताची नाम वा असि। अधस्पदेन ते पदमाददे विषदूषणम्।*[7]

तौदी, घृताची और कन्या नाम की औषधियाँ हैं जो नीचेवाले विषनाशक भाग में विषनाशक के रूप में प्राप्त होतीं हैं – ऐसे अर्थ अथर्ववेद के सुबोधभाष्य से उपलब्ध होता है। ऐसे वेद तथा अन्य प्राचीन ग्रन्थों में विविध नाम कुमारी के लिए प्रयोग किया हुआ है, जो द्रव्यगुण में जिज्ञासा रखनेवाले वैद्यों को ही ज्ञात होता है। विषचिकित्सा; जीने मरने का विषय होने के कारण इसमें प्रयुक्त औषधि के नाम पर्यायों का समझ अवश्य जरुरी है। जैसे वेद में कुमारी के अर्थ में कहीं कन्या तो और कहीं कुमारिका जैसे पर्यायों का प्रयोग देखने को मिलता है। वेद में कई मन्त्र, मन्त्रशास्त्र की दृष्टि से देखने वाले होते हैं तो और कई मन्त्रों का अर्थ संकेत वैद्यशास्त्र की दृष्टि से खुलने वाला है। इसलिए यह प्रसङ्ग को ध्यान में रखते हुए उपरोक्त कुमारी के पर्यायों को प्रस्तुत करने वाली सारणी क्रमांक -1 सार्थक है।

उपचारात्मक उपयोग हेतु कुमारी का विचारविमर्श सदैव युक्तियुक्त है। कुमारी के उपचारात्मक प्रसङ्ग में भावप्रकाशकार के 'नेत्र्या' और सरस्वतीनिघण्टु तथा कैयदेव के

'चक्षुष्या' को और सुदृढ करता है उपर संकेत की हुई वाग्भट की वाणी – 'कुमारी सर्वश्लेष्माक्षिरोगघ्नी'। राजनिघण्टुकार नरहरिपण्डित और सोढल इइसे कुष्ठरोग का उपशम वताते हैं, जहाँ सिर्फ सरस्वतीनिघण्टु को छोड़कर अन्य सभी आचार्य 'त्वगामयान्' कहकर वही अर्थ को प्रकट करते हैं। 'तद्रसोद्रेकात् उदावर्तादि' कहकर घीकुआँर का रस से उदावर्त रोग का ठीक होना वैद्य सोढ़ल का अपना विचार है। 'ग्रन्थि' शब्द का प्रयोग करते हुए शरीर में गांठ को नष्ट करने में कुमारी का उपयोग सिर्फ भावमिश्र, मदनपाल और कैयदेव लिखते हैं, अन्य आचार्यों ने नहीं। कैयदेव, माधव और भावमिश्र ने ही आग से जलन (अग्निदग्ध) की पीड़ा को दूर करने के लिए इसे उपयुक्त वताये हैं। यकृत्, प्लीहा, विस्फोट, पित्तरक्त, ज्वर और विषचिकित्सा के लिए कुछ आचार्यों को छोड़कर प्राय सभी मत पोषण करते हैं। जब नरहरिपण्डित कुमारी का पित्त शामक वताते हैं तव श्रीभावमिश्र, सोढ़ल और कैयदेव उसका वातशामक वताकर सभी ने कुमारी का कफशामक कर्म को व्यक्त करते हैं।

**निष्कर्ष :**

साल भर में एक बार प्रस्फुटित होने वाला यह सुन्दर घीकुआँर फूलों का महत्व एवं वैशिष्ट्य का बोध होना जरुरी है। सिर्फ घीकुआँर का पत्तों का रस तक ही सीमित नहीं बल्की उसके फूलों का व्यवहार उपयोगिता को समझकर प्रकृति की देन को सार्थक करना उचित होगा। आयुर्वेदानुगुण इसका उपचारात्मक उपयोग(therapeutic uses) को लोगों का विचारसमक्ष करना ही यह आलेख का मूल उद्देश्य है जो भविष्य में इसका प्रयोगात्मक अनुसन्धान हेतु वैद्य, अनुसन्धेता तथा पाठकों का ध्यान आकर्षण करने में एक माध्यम हो सकता है।

**कृतज्ञता** : इस सन्दर्भ में प्रकाश डालने हेतु प्रेरणा देने वाले गुरुजी पण्डित श्रीनिवास महापात्र जी को आभार प्रकट करते हैं।

## पादटीका

1. निघण्टु.2.244।
2. अमर,2.1.73।
3. अथर्व.10.4.14।
4. भा.प्र.द्व्यर्थ. 99।
5. अ.सं. उत्तर.19.33।
6. कै.नि. औषधि.1640।
7. अथर्व.104.24।

## सन्दर्भग्रन्थसूची


1. सातवलेकर श्रीपाद दामोदर, 1985, स्वाध्याय मण्डल, पारडी, अथर्ववेद का सुबोधभाष्य भाग - 3।
2. सातवलेकर श्रीपाद दामोदर, 1985, स्वाध्याय मण्डल, पारडी, ऋग्वेद का सुबोधभाष्य भाग -1।
3. शास्त्री हरगोविन्द, 2008, चौखम्बासंस्कृतसंस्थान,वाराणसी, अमरकोश(अमर.),2.1.73।
4. शर्मा प्रियव्रत, 2009, चौखम्बा ओरियन्टालिया, वाराणसी, कैयदेवनिघण्टु(कै.नि.),औषधि.1638-1640।
5. शास्त्री जे.एल.एन., 2010, चौखम्बा ओरियन्टालिआ, वाराणसी, मदनपालनिघण्टु, अभयादिवर्ग.332।
6. शर्मा प्रियव्रत, 2017, चौखम्बा भारतीय अकादमी, वाराणसी, माधवद्रव्यगुण, विविधौषधिवर्ग.141।
7. पुण्यविजयजी, 1968, लालभाई दलपतभाई भारतीय संस्कृति विद्यामन्दिर, अहमदावाद, निघण्टुशेष(निघण्टु.), गुल्मकाण्ड.244।
8. पाण्डे.जी.एस, 1969, व्याख्या : चुनेकर के.सि.,भावप्रकाश(भा.प्र.), गुडूच्यादिवर्ग. 116-117।
9. त्रिपाठी इन्द्रदेव, चौखम्बा कृष्णदास अकादमी, वाराणसी, 1998, राजनिघण्टु(रा.नि.), पर्पटादिवर्ग.49।
10. कामत सदानन्द दिगम्बर, 2006, चौखम्बा संस्कृत प्रतिष्ठान, देहली, सरस्वतीनिघण्टु,उलपवर्ग.41।
11. 2016, दिव्य प्रकाशन, हरिद्वार, सोढलनिघण्टु, लक्ष्मणादिवर्गद्रव्यगुण.559।

# पाणिनीयव्याकरणे संहिताधिकारविमर्शः

श्रीमती मुनि विशोई
संस्कृतशिक्षिका
ब्रह्मपुरम्, गञ्जाम

**उपक्रमः**

पाणिनिना शव्दानामनुशासनाय सूत्राणि प्रणितानि। तेन अष्टाध्यायीग्रन्थो विरचितः। अस्य ग्रन्थस्य प्रणयनानन्तरं सूत्रजगति महत्परिवर्त्तनं संजातम्। अत्यन्तसरलया मनोरमया च शैल्या सूत्राणां रचना कृता तेन। पाणिनिना सूत्राणां लघुकरणं कृतम्। अतः कियन्ति अधिकारसूत्राणि कृतानि। तदनुसारं क्वचित् सम्पूर्णसूत्रस्य कुत्रचिच्च कस्यचनांशस्यानुवृत्तिः विहिता।

सूत्रं षड्विधं भवति। यथा- संज्ञा, परिभाषा, विधिः, नियमः, अतिदेशः, अधिकारश्च। विधिसूत्रैकवाक्यतया बोधजनकत्वमधिकारत्वम्। अधिकारशब्दो भावसाधनः कर्मसाधनो वा। अधिकरणमधिक्रियतेनेनेति वाधिकारः। पतञ्जलिना अधिकारशब्देन प्रतियोगमुपस्थापनमुच्यते[1]। केषाञ्चित् विदुषां मते अधिकरो नाम उत्तोरत्तरगमनम्। परन्तु लक्षणमिदं प्रायिकं भवति। यतो हि **स्वरितेनाधिकारः**[2] इति कारणेन न केवलमनुवृत्तिर्भवति, अपितु अपकर्षोपि। अधिकारसूत्रमुत्तरोत्तरं सूत्रैः साकं यथायोग्यं सम्बन्धमाप्नोति। तेन उत्तरसूत्राणां लक्ष्यधर्मिकशाब्दवोधो भवति। यथा- कारके, प्रत्ययः इत्यादयो योगाः सन्ति। शास्त्रे अधिकारस्वरूपं त्रिधा प्राप्यते। यथा- 1. सिंहावलोकनवत् 2. मण्डुकप्लुतिवत् 3. गङ्गाप्रवाहवत्।

अष्टाध्याय्यां त्रीणि संहिताधिकारसूत्राणि विद्यन्ते। यथा- **संहितायाम्** 6.1.72, **संहितायाम्** 6.3.114, **तयोर्य्वावचि संहितायाम्** 8.2.108। एतेषां त्रयाणां सूत्राणां प्रयोजनविषये चर्चा करिष्यते प्रबन्धेस्मिन्।

**संहितायाम् 6.1.72**

इदमधिकारसूत्रम्। अस्य सूत्रस्याधिकारः **अनुदात्तं पदमेकवर्जम्**[3] इति सूत्रं यावत् गच्छति। इतः आरभ्य अनुदात्तं पदमेकवर्जमिति सूत्रं यावत् यद् किमपि उच्यते तत् संहितायाः विषये एव भवतीति सूत्रार्थः। एतेषु सर्वेष्वपि सूत्रेषु विहितानि कार्याणि संहितायाः विषये एव भवन्तीति अस्याधिकारस्याभिप्रायः। अस्मिन्नधिकारे स्वरसन्धिविशिष्टानि सूत्राणि विद्यन्ते। सर्वे स्वरसन्धयः संहितायाः उपस्थितावेव भवन्ति।

सूत्रमिदमेकपदात्मकं भवति। अत एव अस्य सम्बन्धः पदैकवाक्यतया भवति। यथा- **छे च**[4] इति सूत्रस्यार्थो भवति- संहितायां विषये ह्रस्वस्य तुगागमो भवति छकारे परे। पाणिनिना संहितायाः स्वरूपप्रदर्शनाय **परः सन्निकर्षः संहिता**[5] इति संहितासंज्ञाविधायकं सूत्रं प्रणीतम्। वर्णानामतिशयितः सन्निधिः संहितासंज्ञः स्यादिति सूत्रार्थः। द्वयोः वर्णयोः उच्चारणमतिशयसान्निध्येन क्रियते चेत् तयोः वर्णयोः मध्ये विद्यमानस्य सान्निध्यस्य निर्देशः संहिता इति संज्ञया क्रियते। अर्थात् वर्णानामतिशयसामीप्यं संहिता उच्यते।

संहितायामित्यत्र विषयसप्तमी स्वीक्रियते, न तु सतीसप्तमी। संहितायां विषये इत्यर्थः। तेन यदि कार्यिनिमित्तयोः संहिता विषयभूता भवति तत्रैव वक्ष्यमाणं कार्यं भवति। संहिता च- स्वारसिकार्धमात्राकालाव्यवायेनो- च्चारणमिति[6] नागेशेनोक्तम्। संहिताकार्ये अर्धमात्राधिककालव्यवधानं न सोढव्यो भवति।

**संहितायाम् 6.3.114**

संहितायामित्यधिकारः। यदित ऊर्ध्वमनुक्रमिष्यामः संहितायामित्येवं तद् वेदितव्यमिति[7] काशिकायामुक्तम्। संहितायामिति सूत्रं सिद्धान्तकौमुद्यां समासाश्रयविधिप्रकरणे[8] विद्यते। अस्याधिकारः पादसमाप्तिं यावदस्ति। अर्थात् **संप्रसारणस्य च**[9] इति सूत्रं यावत्। इत्थञ्च अस्याधिकारे पञ्चविंशतिः सूत्राणि आयान्ति। अस्मिन्नधिकारे प्रामुख्येण पूर्वपद-उत्तरपदयोः मध्ये जायमानानि कार्याणि सङ्कलितानि सन्ति। यथा- **मित्रे चर्षौ**[10] इति सूत्रेण विश्व इति

पूर्वपदस्य मित्र इति उत्तरपदे परे संहितायां सत्यामेव दीर्घादेशो विधीयते। येन विश्वामित्र इति ऋषेः नाम सिद्ध्यति।

शेखरकारेण अस्याधिकारस्य फलं प्रदर्शितम्। तथा हि .- एतत्फलं द्व्यचस्तिङन्तस्यातो दीर्घः स्यादित्यर्थकेन **द्व्यचोतस्तिङि**[11] इत्यनेन विद्माहित्वा गोपितं शूरगोनामित्यत्र संहितायामिव विद्महित्वेति पदकाले दीर्घो न भवति[12]। संहिताधिकारे पठितत्वात् संहिताविषये एवास्य प्रवृत्तिर्भवति। तथा च ऋग्विषये संहितायामेव द्व्यचस्तिङन्तस्यातो दीर्घः अनेन क्रियते। तेन विद्माहित्वा गोपितं शूरगोनामित्यस्यां ऋचि विद्माहित्वा इत्यत्र दीर्घो भवति। किन्तु पदकाले दीर्घरहितो विद्महित्वा इत्येव प्रयोगो भवति।

**तयोर्य्वावचि संहितायाम् 8.2.108**

इदमधिकारसूत्रम्। संहितायामित्यधिकृतं वेदितव्यमाध्यायपरिसमाप्तेः। इत उत्तरं यद्वक्ष्यते संहितायामित्येवं तद्वेदितव्यम्[13]। अस्याधिकारः अष्टमाध्यायस्यान्तिमं सूत्रं यावत् विद्यते। अत्र सम्पूर्णस्य सूत्रस्याधिकारो न भवति अपितु संहितायामित्यंशमात्रम्।

अस्यापि पदैकवाक्यतयैव उत्तरत्र सम्बन्धो भवति, अधिकारस्य पदस्वरूपत्वात्। तेन **समः सुटि**[14] इति सूत्रस्यार्थो भवति- सम् इत्येतस्य रुः भवति सुटि परतः संहितायां विषये।

अस्मिन्नधिकारे प्रामुख्येण हल्सन्धिविशिष्टानि सूत्राणि उक्तानि सन्ति। सर्वे हल्सन्धयः संहितायाः उपस्थितावेव भवन्तीति अस्याभिप्रायः। यथा- तद् तथा जलमित्येतयोः द्वयोः मध्ये संहिता विद्यते चेत् तदा दकारस्य **स्तोः श्चुना श्चुः**[15] इत्यनेन सूत्रेण श्चुत्वे जकारादेशे जाते तज्जलमिति रूपं सिद्ध्यति।

**उपसंहारः –**

अष्टाध्याय्यां प्रोक्ताः त्रयोपि संहिताधिकाराः महाभाष्यकारेण प्रत्याख्याताः। अत्र भाष्यकारः आदौ सप्तमीविभक्तेः त्रीन् अर्थान् विवृणोति। यथा- व्यापकसप्तमी, औपश्लेषिकसप्तमी, वैषयिकसप्तमीति। तिसृणामपि सप्तमीनां निर्देशं कृत्वा भाष्यकारः अग्रे

सूचयति यत् – शब्दशास्त्रे एकस्य शब्दस्यापरेण शब्देन सह विद्यमानः सम्बन्धः केवलं पौर्वापर्यभावः (इत्युक्ते औपश्लेषिकसम्बन्धः) इत्येव भवितुमर्हति। यत्र औपश्लेषिकः सम्बन्धः अस्ति, तत्र संहिता भवत्येव। अतः पुनः संहितायामिति पृथगधिकारो नावश्यकः।

तथा हि भाष्ये- **अयं योगः शक्योवक्तुम्। कथम् ,अधिकरणं न्नाम त्रिःप्रकारम्- व्यापकम्, औपश्लेषिकम्, वैषयिकम् इति। शब्दस्य च शब्देन कोन्यो अभिसम्बन्धो भवितुमर्हत्यन्यदत उपश्लेशात्। इको यणचि (6.1.77) अचि उपश्लिष्टस्येति। तत्रान्तरेण संहिताग्रहणं संहितायामेव भविष्यति**[16]।

संहिताधिकारे च प्रत्याख्याते, संहितासंज्ञा अपि प्रयोजनाभावात् प्रत्याख्याता एवेति प्रदीपटीकायां कैयटेन[17] प्रतिपादितम्।

## पादटीका

1. अधिकारः क्रियते प्रतियोगं तस्यानिर्देशार्थ इति। किमिदं प्रतियोगमिति। योगं योगं प्रति प्रतियोगम्। म.भा. 1.3.11

2. पा.सू. 1.3.11
3. पा,सू. 6.1.158
4. पा.सू. 6.1.73
5. पा.सू. 1.4.109
6. ल.श.शे. पृ. 185
7. का.वृ. 6.3.114
8. सि.कौ. सू. 1035
9. पा.सू. 6.3.139
10. पा.सू. 6.3.130
11. पा.सू. 6.3.135
12. ल.श.शे.पृ 175
13.का.वृ. पा.सू. 8.2.108
14. पा.सू. 8.3.5
15. पा.सू. 8.4.40
16. म.भा. 6.1.72
17. म.भा.प्र.टीका. 6.1.72

## सन्दर्भग्रन्थसूची


1. अष्टाध्यायीसूत्रपाठः - पाणिनिः
2. काशिकावृत्तिः – जयादित्यवामनौ
3. महाभाष्यम् – पतञ्जलिः
4. लघुशब्देन्दुशेखरः – नागेशभट्टः
5. सिद्धान्तकौमुदी – भटोजिदीक्षितः

# व्याकरणे समासस्वरूपविमर्शः

सौम्यरञ्जन आचार्यः
अनुसन्धाता (पि एच्. डी - संस्कृतम्)
महाराजाश्रीरामचन्द्रभञ्जदेओ विश्वविद्यालयः
वारिपदा, मयूरभञ्ज

## प्रस्तावना

भाषास्वरूपज्ञानाय परिनिष्चितपदप्रयोगाय महामुनिः पाणिनिप्रणीतमष्टाध्यायीव्याकरणं सर्वेषु व्याकरणेषु मूर्द्धन्यं विद्यते पुरा पाणिनीयव्याकरणाध्ययनाध्यापनपद्धतिरष्टाध्यायी-क्रमानुसारिण्यासीत्। अष्टाध्यायीमधिकृत्य कृतं पातञ्जलं महाभाष्यमष्टाध्यायीक्रमानुरूपमेव वर्त्तते। वार्त्तिककारैः सूत्राणामुपरि कृता वार्त्तिकरचनाऽप्येवंविधैवावलोक्यते। सैव पद्धतिः काशिकाकारेण व्याख्याकारैश्च स्वीकृता। पदप्रयोगविज्ञाने समासस्य अपरिहार्यत्वात् अष्टाध्यायीव्याकरणे समाससन्दर्भ निर्णेतुं पाणिनिना द्वितीयोऽध्यायप्रथमपादत आरभ्य द्वितीयोऽध्यायद्वितीयपादं यावत् सूत्राणि व्यवस्थितानि सन्ति।

**कूटशब्दाः** अष्टाध्यायी, महाभाष्यम्, सूत्रम्, काशिकावृत्तिः, समासः।

**निबन्धस्य सारविन्दवः**

- ❖ उपक्रमः
- ❖ पाणिनीयव्याकरणपरम्परा
- ❖ समासवृत्तिविवेचनम्
- ❖ समासभेदानुशीलनम्
- ❖ उपसंहारः
- ❖ पादटीकाः

❖ सहायकग्रन्थसूची अत्र प्रस्तावनायां मया निबन्धशीर्षकस्य तथ्यानि संन्यस्तानि सन्ति।

**उपक्रमः**

पदवाक्यप्रमाणविशेषज्ञं महामुनिपाणिनिः महता यत्नेन प्राङ्मुखः दर्भवित्रपाणि अष्टाध्यायीनामकं व्याकरणशास्त्रं प्रणिनाय। तदुपरान्तं कात्यायनेन सूत्रात्मकं वार्तिकाख्यं शब्दनियामकं नियमं विरचितवान्। अनन्तरं सुत्र-वार्त्तिकयोरुपरि यत् महत्व्याख्यानं महर्षिपतञ्जलिना प्रणीतं तत् महाभाष्यमिति समाम्नातम्। गछता कालेन समुपलब्धवृत्तिषु जयादित्यवामनकृतकाशिकावृत्तिः सर्वैः शाब्दिकैः भृशमाद्रियते। एषा वृत्तिः न केवलं स्वकीयं प्राचीनत्वं विघोषयति अपि तु महाभाष्यस्तथा भतृहरिविरचितवाक्यपदीयमित्यनयोः प्रणयनात्परं काशिकावृत्तिरत्यन्तं महत्वपूर्ण राजते। काशिकायां यद्यपि पाणिनिसूत्राणां व्याख्यानं विहितम्, तत्र तु महाभाष्यसिद्धान्तसहितमपरेषामाचार्याणां मतमपि पर्यालोचितम्।

**पाणिनीयव्याकरणपरम्परा**

पदस्वरूपज्ञानाय शब्दब्रह्मसाक्षातकाराय शब्दशास्त्रोपकारकम् वाच्यवाचक सम्बन्धव्यञ्जकं व्याकरणं मूर्द्धन्य राराजते। व्याकरणशास्त्रस्य प्रामुख्यं ऋग्वेदः, मुण्डकोपनिषद्, मैत्रायणीसंहिता, ऐतरेयब्राह्मणम्, गोपथब्राह्मणम् प्रभृतिषु परिलक्ष्यते। अस्य मौलिकमुद्देश्यं भवति साधुशब्दानामन्वाख्यानं शाब्दवोधश्च। पाणिनीय परम्परायां सूत्रकारः पाणिनिः वार्तिककारः कात्यायनः महाभाष्यकार पतञ्जलिरिति मूर्द्धाभिषिक्तमुनित्रयेण वैदुष्यपूर्णप्रज्ञया गीर्वाणगिरा सकलवेदपारिषदमिदं व्याकरणं पुष्पितं फलितं महिमामण्डितं च।

**आचार्यः पाणिनिः** - शब्दानुशासनस्य प्रामाणिकप्रवक्ता सूत्रकर्त्ता पाणिनिरिति सर्वेषां विदुषां मतं यथार्थ्य संगच्छते। व्याकरणस्य सूत्रनिबद्धं महदुपकारकं प्रामाणिकं साधुशब्दनिर्णायकं शास्त्रमष्टाध्यायीति। सत्सु वहुषु व्याकरणेषु संस्कृतभाषावैदुष्यलाभाय पाणिनेरष्टाध्यायीव्याकरणं मूर्धण्यं प्रतिभाति। तत्र पुरुषोत्तमदेवेन[1] कतिपय नामानि स्पष्टीकृतानि सन्ति। यथा 1. पाणिनः 2. पाणिनिः 3. शालातुरीयः 4. दाक्षीपुत्रः 5. शालङ्किः

6. आह्निकः 7. पाणिनेयः। महाभाष्यकारेण पाणिनिसूत्रसार्थक्यं प्रतिपादयितुं प्रकटयति "सामर्थ्ययोगान् नहि किञ्चिदस्मिन् पश्यामि शास्त्रे यदनर्थकं स्यात्।[2] पतञ्जलिः 'भूवादयो धातवः'[3] इति सूत्रे लिखति- "मांगलिक आचार्य महतः शैस्त्रौघस्य मंगलार्थं वकारागमं प्रयुङ्क्ते। मंगलादीनि मंगलमध्यानि मंगलान्तानि च शास्त्राणि प्रथन्ते।"

**कात्यायनः** - पाणिनिकृताष्टाध्यायीग्रन्थस्योपरि कात्यायनः वार्त्तिकम् विरचितवान्। महाभाष्ये पतञ्जलिना वहूनां वार्त्तिककाराणानां नामानि लिखितानि सन्ति। कात्यायनः (कात्य), वैयाघ्रपद्यः, व्याघ्रभूतिः, सुनागः, भारद्वाजः, कोष्टा, वाडवः।

**उक्तानुक्तदुरुक्तानां चिन्ता यत्र प्रवर्त्तते।**

**तं ग्रन्थं वार्त्तिकं प्राहुः वार्त्तिकज्ञा मनीषिणः।।**[4]

अष्टाध्यायीग्रन्थोपरि यावन्ती वार्तिकानि लिखितानि सन्ति तेषु कात्यायनविरचितं वार्त्तिकं मूर्धन्यमस्ति। महाभाष्ये प्रमुखतया कात्यायनकृतवार्त्तिकानां व्याख्यानं दृश्यते। कात्यायनस्य नामान्तराणि यथा- कात्यः, वररूचिः, मेधाजित्, पुनर्वसु।

**पतञ्जलिः**- पाणिनि व्याकरणपरम्परायां महर्षिपतञ्जलिः अनन्यप्रतिभायाः प्रतीकमन्यते। पाणिनि-कात्यायन-पतञ्जलिरिति सुप्रशस्य विद्यते। तत्र महाभाषस्य उद्योत्तटीकायाम्[5]- यथोत्तरं मुनीनां प्रामाण्यम्। प्रामाण्यविमर्श उत्तरोत्तर मुनीनां ग्रहणं प्रकर्म्यणं जायते। पतञ्जलिप्रणीतमहाभाष्यसन्दर्भे भाष्यलक्षणमुपस्थाप्यते -

**सूत्रार्थो वर्ण्यते यत्र पदैः सूत्रानुसारिभिः।**

**स्वपदानि च वर्ण्यन्ते भाष्यं भाष्यविदो विदुः।।**

## समासवृत्तिविवेचनम्

परिभाषा सूत्रमिदम् परितः भासते परिभाषासु नरकेदेशस्थासतीसर्वं शास्त्रमभिज्वलयतिप्रदीपवत्। समर्थः पदविधिः[6] पदच्छेदः समर्थः, पदविधिः, अर्थः-

पदसम्बन्धी यो विधिः स समर्थाश्रितः वोध्यः। (सर्वः पदविधिः समर्थः वेदितव्यः काशिका) यथा समासादि पदविधिः विग्रहः वाक्यार्थाभिधाने यः सः समर्थः।

समर्थः सं गतार्थः समर्थः। संवद्धार्थः समर्थः। संप्रेक्षितार्थः समर्थः।

समीक्षा - विधियते इति विधिः। विधिः नाम कार्यम्। पदस्य पदानां वा विधिरिति षष्ठी तत्पुरुषसमासः। अत्र समर्थशब्दः समर्थाश्रितरूपेण ज्ञातव्यः। तत्र यद्यपि कृदन्त-तद्धित-णिजन्त-प्रभृतिषु पदविधिः दृश्यते। परन्तु अत्र समासे यादृशः पदविधिः दृश्यते, तत्र सर्वत्रैव विधीयमानः पदविधिः समर्थाश्रितः इति। समर्थस्य भावः सामर्थ्यम्। सामर्थ्यं हि द्विविधम्।

यथा - व्यपेक्षालक्षणम् (विग्रहवाक्यम्)

एकार्थीभावश्च (समासः)

पृथक् अर्थानां पदानाम् एकार्थीकरणम् एकार्थीभावः। उदाहरणम्- राज्ञः पुरुषः- राजपुरुषः।

a. आकाङ्क्षा – अर्थान्तरजिज्ञासा।

b. योग्यता - परस्परान्वय विषयत्वम्।

c. आसत्तिः - पदानाम् अव्यवधानत्वम्।

d. तात्पर्यम् - निर्दिष्टार्थवोधाय निर्दिष्टशब्दोच्चारणम्।

राज्ञः पुरुषः राजपुरुषः अत्र राज्ञः पुरुषः इति विग्रहे व्यपेक्षालक्षण सामर्थ्यं विद्यते। नाम राज्ञः पदोच्चारणात् परम् अर्थान्तरस्य अपेक्षा जायते। तस्मात् पुरुष पदस्य प्रवृत्तिः व्यवहारो वा क्रियते। पुरुष पदोच्चारणेऽपि कस्य पुरुषः इति आकाङ्क्षायां राज्ञः इति पदस्य सन्निवेशः कृतः। अतः राज्ञः पुरुषः इति पदद्वयस्य पृथक् उपादाने न कश्चित् एकार्थः वोध्यते।

एकार्थीभावे तु "राजपुरुषः" पदात् पूर्वं जायमानानां पृथगर्थपदानाम् एकार्थः सम्भवति इति। 'समर्थपदविधिः' सूत्रम् अधिकार सूत्रं भवति। अस्य अधिकारस्तु "**कडाराः कर्मधारये**"[7]

इति पर्यन्तं विद्यते। अधिकारो नाम अधिकरोति उत्तरोत्तर सूत्रेषु अन्तर्भवति आविर्भवति स्वार्थप्रकाशनाय इति।

'समास' शब्दस्यार्थः- समसनं समासः- संक्षीप्तीकरणं समासः- समस्यते अनेकपदं येन स समासः- एकपदीभवनं समासः- पदानामेकीकरणं समासः- यस्मिन् समुदाये पदद्वयं परस्परं समस्यते स समासः - पृथक् अर्थानां पदानामेकार्थीकरणं समासः। समासे राजपुरुषः इत्यादौ राज्ञः पुरुषः इति। लौकिक विग्रहदर्शनात् (राजन्+ङस्) (पुरुष+सु) इति अलौकिकविग्रहकरणात् कोऽयं नाम विग्रहः इति जिज्ञासा जायते। अतः कथ्यते वृत्त्यर्थवोधकं वाक्यं विग्रहः। तर्हि का नाम वृत्तिः? समाधानं यथा- विग्रहः – अन्वादेशः।

1. परार्थाभिधानं वृत्तिः – देशान्तरम्
2. विग्रहवाक्यावयव पदार्थेभ्यः परः अन्यः योऽयं विशिष्टैकार्थः तत् प्रतिपादका वृत्तिः।
3. प्रक्रियादशायां प्रत्येकमर्थवत्वेन प्रथमविगृहीतानां पदानां समुदाय शक्त्या विशिष्टकार्य प्रतिपादिका वृत्तिः।
4. जहत् स्वार्थावृत्तिः अवयवार्थः निरपेक्षत्वे सति समुदायार्थवोधिकात्वं। उदाहरणम् - शुश्रूषा - सेवा इत्यर्थः।
5. अजहत् स्वार्थावृत्तिः अवयवार्थसम्वलित समुदायार्थ वोधिकात्वम् अजहत् स्वार्थावृत्तिः। उदाहरणम् - राजपुरुषः।

| वृत्तिः पञ्चविधा - | विग्रहः | वृत्तिः |
|---|---|---|
| १. कृद् वृत्तिः | व्यक्तिः (कथयति) इति | वाचकः |
| २. तद्धितवृत्तिः | दक्षस्य अपत्यम् | दाक्षिः |

| | | |
|---|---|---|
| ३. समासवृत्तिः | नद्याः जलम् | नदीजलम् |
| ४. एकशेषवृत्तिः | रामश्च लक्ष्मणश्च | रामलक्ष्मणौ |
| ५. सनाद्यन्त धातुवृत्तॉः | (सन्, यङ्, काम्य च प्रभृतयः) | |
| क. सनन्तधातुवृत्तिः | पठितुमिच्छति | पिपठिष्यति |
| ख. यङन्तधातुवृत्तिः | जंगम्यते | पुनः पुनः गच्छति |
| ग. नामधातुवृत्तिः | पण्डितायते | आत्मानं पण्डितं मन्यते |

समासाधिकारः – सहसुपा[8] अत्र तु निर्दिष्टसंज्ञा अभावात् समास संज्ञायाः अवकाशः विद्यते। प्राक्कडारात् समासः[9] सूत्रार्थः कडाराः कर्मधारये इत्यतः प्राक् समास अधिक्रियते। अत्र उच्यते यत् समास संज्ञायाः अधिकारः कड्डाराः कर्मधारये इति सूत्रात् प्राक् वेदितव्यः। अत्र सूत्रे प्राक् ग्रहणम् किमर्थम् ? इत्यस्य समाधानं यत् आकडारादेका संज्ञा[10] इति सूत्रेण कड्डाराः कर्मधारये इति सूत्रं प्राक् एकस्य एका संज्ञा भवति इत्युक्तम्। अतः अव्ययीभावः[11] तत्पुरुषः[12] इत्यादिभिः अव्यीभाव-तत्पुरुषादि संज्ञा करणात् परं पुनः तेषां समासः संज्ञा न स्यात्। तस्मात् प्राक् ग्रहणं सामर्थ्यात् अनवकाशभूत अव्ययीभावादीनां समाससंज्ञा करणार्थं प्राक् ग्रहणं यथार्थमिति।

समासशब्दस्य व्युत्पत्तिः (सम्+अस्+घञ्) समस्यते अनेकपदमिति समासः साधनम्। सम् उपसर्ग पूर्वकं अस् धातोः अकर्त्तरिच कारके संज्ञायाम्[13] इति सूत्रेण घञ् प्रत्यये अतउपाधाया[14] इति सूत्रेण ञिति प्रत्यये परे उपधाभूत अकारस्य वृद्धौ आकारे कृते सम्+आस् घञ् इति जाते हलन्त्यम् इति सूत्रेण ञ् लोपे लशक्वतद्धिते इति सूत्रेण घ् लोपे सम् + आस्+अ इति जाते कृतद्धितसमासाश्च अनेन अत्र कृदन्तस्य नाम समास इति पदस्य प्रातिपदिके सु प्रत्यये समास + सु इति जाते उपदेसेऽजनुनासिक इत् इति सूत्रेण उ लोपे ससजुषोरुः अनेन स स्य रु आदेशे उपदेशेऽजनुनासिक इत् अनेन उ लोपे कृते समास + र् इति जाते खरवसानयोः विसर्जनीय इति सूत्रेण र स्य विसर्गे समासः इति पदं सिद्धम्।

व्युत्पत्तिः - प्रत्ययानां सन्निहित-पदार्थगत स्वार्थवोधकत्वम्।

प्रत्ययानां प्रकृत्यर्थान्वित स्वार्थं - व्युत्पत्तिः

अर्थात् विवरणसहितं प्रतिप्रत्ययार्थवोधः। कस्तावत् विग्रह (वृत्त्यर्थवोधकं वाक्यं विग्रहः)- कृद्-तद्धित-समास-एकशेष-सनाद्यन्तधातुवृत्तिनामर्थं प्रकाशयितुं यद् वाक्यं व्यवह्रियते तद् वाक्यं विग्रहः इति। विग्रहः द्विविधः - स्वपदविग्रहः अस्वपदविग्रहः।

स्वपदविग्रहः - समासघटितपदानां नाम समस्तपदानां विवरणं यस्मिन् विग्रहे दृश्यते स स्वपदविग्रहः। यथा लम्वकर्णः- समासः। लम्वौ कर्णौ यस्य स इति स्वपदविग्रहः।

अस्वपदविग्रहः - समासघटितपदानां नाम समस्तपदानां विवरणं यस्मिन् विग्रहे न दृश्यते स अस्वपदविग्रहः। यथा उपकूलम् समासः। कूलस्य समीपम् अस्वपदविग्रहः।

**समासभेदानुशीलनम्**

समास षडविधः इति सिद्धान्तितम् तद्यथा- अव्ययीभावः, तत्पुरुषः, कर्मधारयः, द्विगुः, वहुब्रीहि, द्वन्द्वः। अत्र प्राचीनवैयाकरणाः समासः चतुर्विधः इति उक्त्वा कर्मधारयं द्विगुं च तत्पुरुषभेदं मन्यन्ते।

**समासभेदाः**

(क) प्राचीन वैयाकरणानां मते- समासः पञ्चविधः।

१. केवलसमासः भूतपूर्वः

२. अव्ययीभावसमासः अधिहरिः

३. तत्पुरुषसमासः वृक्षच्छाया

४. वहुव्रिहीसमासः पीताम्वरः

५. द्वन्द्वसमासः पितरौ

(ख) नवीनवैयाकरणानां मते- समासः षडविधः ।

यथा सुपां सुपा तिङा नाम्ना धातुनाऽथ तिङातिङा

सुवन्तेनेति ज्ञेयः समास षड्विधः वुधैः ।।

सुपां सुपा - सुवन्तेन सह सुवन्तपदस्य समासः । उदाहरणं राजपुरुषः ।

सुपां तिङा- पूर्वपद सुवन्तेन सहितमुतरपदतिङन्तस्य समासः। उदाहरणं पर्यभूषयत् (गतिमणेदाभवतातिङाऽपिसमासः)

सुपां नाम्ना - सुवन्तस्य प्रातिपदिकेन सह समासः । यथा कुम्भकारः, कुम्भं करोति इति विग्रहे कर्मण्याण् अनेन सूत्रेण अण् प्रत्यये कुम्भ अम् कृ + अण् इति दशायां कर्तृकर्मणोः कृतिः इति सूत्रेण द्वितीया अम् प्रवाध्य करमणः षष्ठ्यां कुम्भ + ङस् कार इति स्थितौ उपपदमतिङ् अनेन उपपदसमासे स समास सुवुत्पत्तेः प्राक् भवति ।

सुपां धातुना - पूर्वपद सुवन्तेन सहितमुत्तरपदधातुमात्रस्य समासः । यथा कटप्रूः । अत्र कटं प्रवते इति कटप्पु इति अवस्थायां क्विप्वतायतस्तु- कटप्रुजुश्रीणां दीर्घश्च इति वार्त्तिकेन दीर्घ कटप्रूः । (पुङ् (प्रु) गतौ – प्रवते - इति धातुरूपम्, कटप्रूः कटं याति)

तिङां तिङां- उदाहरणम् - पिवतखादता (वारम्बारं पिवति खादति) (पूर्वपदतिङन्तमुत्तरपदमपि तिङन्तम्) पिवतखादत अत्र आख्याति माख्यातेन क्रियासातत्ये इति मयूरव्यंसनाद्यन्तर्गत गणसूत्रेण समासः । (क्रियासातत्यं नाम सततं यस्यां क्रियायाम् अभिधीयते) पिवतखादत इति अवस्थायां समासे जाते समासात् परं टापि पिवतखादत इति सिद्ध्यति ।

तिङा सुवन्तेन - पूर्वपदं तिङन्तमुत्तरपद सुवन्तेन सह समस्यते। उदाहरणम् जहिस्तम्वः। जहिकर्मणा वहुलमाभीक्ष्ण्ये कर्त्तारं चाऽभिदधाति इति मयूरव्यंसकाद्यन्तर्गत गणसूत्रेण अत्र समासः । स्तम्बः - गुल्मः (shrub) तृणगुच्छः (Clump of grass) जहिस्तम्बः- स्तम्बं

जहि इति आभीक्ष्णेन य आह स इति विग्रहः जहिस्तम्वः स्तम्बस्य नाम गुल्मस्य आघातकर्त्ता। अत्र कर्त्तारं वोधयति।

पाणिनि सूत्रानुसारं षड्विधः समासः अव्ययीभावसमासः[15], तत्पुरुषसमासः[16], कर्मधारयसमासः[17], संख्यापूर्वोद्विगुसमासः[18], शेषोवहुव्रीहिसमासः[19], चार्थेद्वन्द्वसमासः[20], तत्पुरुषसमानाधि[21], सूत्रे भाष्ये तत्पुरुष समानाधिकरणपदः कर्मधारय संज्ञः भवति इति व्याख्यानात् संख्यापूर्वी[22] सूत्रे भाष्ये यः संख्यापूर्वः स द्विगुसंज्ञः इति वचन सामर्थ्यात् अव्ययीभावः, तत्पुरुषः, कर्मधारयः, द्विगुः, वहुव्रीहिः, द्वन्द्वः। इति समासः षड्विधः- अव्ययीभावः पूर्वपदार्थप्रधानः (अव्ययं विभक्ति....[23] सूत्रेभाष्ये), तत्पुरुषः- उत्तरपदार्थप्रधानः, कर्मधारयः- समानाधिकरणपदः कर्मधारयः[24], द्विगुः- यः संख्यापूर्वसमासः स द्विगुः[25], वहुव्रीहिः- अन्यपदार्थप्रधानः[26], द्वन्द्वः- उभय पदार्थप्रधानः[27] (समुच्चयान्वायेयोः असामर्थ्यात् समासः न, इतरेतरयोगे समाहारे च द्वन्द्वसमासः)

द्विगुसमासटीप्पणी – तद्धितार्थे-उत्तरपदे-समाहारे

यः संख्यापूर्वः समासः स द्विगुः।।

**उपसंहारः**

तत्र "समर्थः पदविधिः" इति सूत्रं परिभाषासूत्रमिति काशिकावृतौ प्रतिपादितः। तत्र 'यः कश्चित् इह शास्त्रे पदविधिः श्रूयते स सर्वः वेदितव्यः' इत्यर्थः प्रकटितः। अत्र न्यासकारेण परिभाषेयमिति। परितो व्यापृता भाषा= परिभाषा। तथा चोक्तम्- 'परिभाषा पुनरेकदेशस्था सती सर्वं शास्त्रमभिज्वलयति प्रदीपवत्, यथा- वेश्म प्रदीपः[28]। तत्र विधीयत इति विधिः। भावसाधने विधिशब्दे आश्रीयमाणे पदानामपरिनिष्पन्नानां परिनिष्पादनं पदविधिरिति पदेषु कर्मणि कृद्योगलक्षणा षष्ठी; तेषां विधिना सम्बन्धात्। कर्मसाधने तु परिनिष्पन्नानां व्यवस्थितानामेव पदानां यत् समासादि कार्यं विधीयते स पदविधिः। पदमञ्जरीकारेण स्वकार्य-निष्पादनक्षमो हि लोके 'समर्थः' इत्युच्यते। अर्थप्रतिपादनं च शब्दानां स्वकार्यम्।

स्वकार्यव्युत्पाद्यत्वेन चाधिकृताः लौकिकाः वैदिकाश्च यस्य कस्यचित्प्रतिपादने समर्थाः, उच्यते चेदं समर्थ इति, तत्र सामर्थ्याद्विशेषोऽवगम्यते।

तत्र जयादित्य-वामनाभ्यां काशिकावृत्तौ प्रोक्तम्- अथवा समर्थपदाश्रयत्वात् समर्थः। समर्थानां पदानां सम्वन्धार्थानां संसृष्टार्थानां विधिवेदितव्यः।

## पादटीकाः

1. त्रि.को. - ¼
2. पाणिनि सूत्रम् - 6.1.77
3. पा.सू. 1.3.1
4. वार्तिकम्
5. महाभाष्य उद्योतटीका - 3.1.87
6. पा.सू. - 2.1.1
7. पा.सू. 2.2.38
8. पा.सू. - 2.1.4
9. पा.सू. - 2.1.3
10. पा.सू. - 1.4.1
11. पा.सू. - 2.1.5
12. पा.सू. - 2.1.22
13. पा.सू. 3.3.19
14. पा.सू. - 7.2.116
15. पा.सू. - 2.1.5
16. पा.सू. 2.1.22
17. पा.सू. 1.2.42
18. पा.सू. 2.1.52
19. पा.सू. - 2.2.23
20. पा.सू. 2.2.29
21. पा.सू. - 1.2.42
22. पा.सू. - 2.1.51
23. पा.सू. 2.1.6
24. का. वृ- 1.2.42
25. काशिकावृत्तिः - 2.1.52
26. पा.सू. - 2.1.6
27. पा.सू. - 2.1.6
28. महाभाष्यम् 2.1.1, पृ. 31-4

## सहायकग्रन्थसूची

1. झा, पण्डित वेदानन्द, वाक्यपदीय भर्तृहरिः मन्दाकिनी संस्कृत विद्वत्परिषद्, दिल्ली, 2002

2. झा, डा. बालगोविन्द, समास-सन्दर्शिका चौखम्बा सुरभारती प्रकाशन, वाराणसी, 1960

3. त्रिपाठी, डा. जयशङ्करलाल, परमलघुमञ्जुषा - कृष्णदास अकादमी, वारणासी, 1985

4. दहाल, डा. विष्णु, पाणिनि अष्टाध्यायी- शिवसंस्कृतसंस्थान, वाराणसी, 2005

5. पुरुषोत्तमदेवः, त्रिकाण्डकेषः - शिलीखण्डमठम्, प्रकाशन क्षेमराजश्रीकृष्णदास वेडेकटेश्वरप्रेस्, (Bombay) 1916

6. बत्रा, डा. नरेश, वार्तिककारः कात्यायनः अभिषेकप्रकाशनम्, दिल्ली, 2009

7. वामनजयादित्य, काशिकावृत्तिः, तारा प्रिण्टिग वर्क्स, वाराणसी, 1986

8. शास्त्री, श्री गुरुप्रसाद, संपादक, अष्टाध्यायीसूत्रपाठः, भार्गवपुस्तकालयः, काशी, 1994

9. Abhyankar, MM K.V, The Vyākaraṇa Mahābhāşya of Patanjali Research Institute, Poona, 1996 Bhandarkar Criental

10. Sastrigal, S Chandrasekhara, Sidhânta Kaumudî - St. Joseph's Industrial School Press, 1910

# स्कन्दपुराणे चतुर्धामूर्त्तिः

इन्दिरा पण्डा
सहायकाचार्या संस्कृतविभागस्य
सामन्तचन्द्रशेखरस्वयंशासितमहाविद्यालयः
पुरी

पुण्यभूमिभारतस्य उत्कलदेशे प्रसिद्धं श्रीपुरुषोत्तमधाम विद्यते। अत्र पुरा नीलपर्वतः आसीत्। अतः नीलाचलधामापि इदमुच्यते। यथोक्तं स्कन्दपुराणे उत्कलखण्डे –

**दक्षिणोदधेस्तीरे नीलचलविभूषितम्।**

**दशयोजनविस्तीर्णं यावद्विरजमण्डलम्॥**[1]

दक्षिणोदधेः आरभ्यः दशयोजनपर्यन्तं विरजमण्डलं यावत् अस्य सीमा वर्त्तते। एतत् अतीव पवित्रं क्षेत्रम्। युगानुसारं परमात्मा परब्रह्म स्वकीयां लीलां प्रकटयति। स एकाकी स्थातुं नेच्छति, अपितु विविधदेवैः सह तिष्ठति। अत्रापि समन्वयस्य तत्त्वं प्रतिपादितं भवति। स एव भगवान् दारुमयीं तनुं धारयन् अत्र क्षेत्रे मनुष्यवत् लीलां प्रकाशयति। प्रबन्धेऽस्मिन् भगवतः दारुब्रह्मचतुर्धामूर्त्तिविषये आलोचितम्। तस्य दारुविग्रहत्वं दर्शयितुं स्कन्दपुराणे उक्तम्, यथा-

**पुरुषोत्तमाख्यं सुमहत्क्षेत्रं परमपावनम्।**

**यत्रास्ते दारवतनुः श्रीशः मानुषलीलया॥**[2]

सत्ययुगे सूर्यवंशोद्भवः इन्द्रद्युम्नः नाम राजा आसीत्। सः परमवैष्णवः अवन्तीनामनगरीं शासितवान्। मर्त्यलोके विष्णोः विग्रहस्थापनाय तस्य इच्छा अभवत्। एकदा एकः परिव्राजकः तस्य समीपमागत्य उक्तवान् यत् नीलकन्दरे परंब्रह्म श्रीविष्णुः नीलमाधवरूपेण पूज्यते। राजा तस्य वचनं श्रुत्वा मन्त्रिणं विद्यापतिं नीलकन्दरं प्रति तद्विग्रहविषये ज्ञातुं प्रेषितवान्। विद्यापतिः उत्कलदेशं गत्वा नीलकन्दरं प्राप्तवान्। नीलमाधवस्य पूजनं विश्वावसुः शबरः करोति स्म। तस्य अनुग्रहेण विद्यावतिः नीलमाधवस्य दर्शनं कृतवान्। कियद्दिनानन्तरं विद्यावतिः स्वदेशं

प्रत्यावर्त्य सर्वं सम्वादं राज्ञे न्यवदयत्। राजा तच्छ्रुत्वा ससैन्यः श्रीक्षेत्राभिमुखं प्रस्थितः। तदानीं झञ्झावातेन वालुकावृत्तः नीलपर्वतः आसीत्। राजा भगवतः दर्शनं न प्राप्य शोकाकुलः अभवत्। तदा शुन्यवाणी अभवत् यत् "भगवान् दारुरूपेण समुद्रतीरे प्लवते। तदानीय मूर्त्तिं निर्मातु" इति। राजा श्रीक्षेत्रे विग्रहनिर्माणात् प्राक् नृसिंहस्य पूजनं तथा यज्ञं कृतवान्। स्वयं भगवान् विश्वकर्मा भूत्वा तद्दारु प्रतिमारूपेण निर्मितवान्। पञ्चदशदिनाभ्यन्तरे मूर्त्तिः रत्नसिहांसने चतुर्धारूपेण प्रकाशिता। यथोक्तं स्कन्दपुराणे –

**तादुगाविर्बभूवासौ युष्माकं वर्णितः पुरा।**

**दिव्यसिंहासनगतो बलभद्रसुदर्शनैः॥**

**शङ्खचक्रगदापद्मलसद्बाहुजनार्दनः।**

**गदामूसलचक्राब्जं धारयन् पन्नगाकृतिः॥**

**छत्राकृतिफणासप्तमुकुटोज्वलकुण्डलः।**

**सुभद्राचारुवदना वराब्जाभयधारिणी॥**[3]

बलरामस्य सप्तफणा छत्राकृतिः अस्ति। तदुपरि विन्यस्तं मुकुटम् उज्वलं कुण्डलं च शोभते। चारुवदना सुभद्रा एकस्मिन् हस्ते पद्मम् अपरस्मिन् हस्ते च अभयमुद्रां धारयन्ती विराजते। जनार्दनः शङ्खचक्रगदापद्मचिह्नशोभितवाहुः वर्त्तते। तस्य शक्तिस्वरूपा इयं भगिनी श्रीः इति प्रकीत्तिता। प्रकटितदारुशाखायाः अग्रभागात् निर्मिता स्तम्भप्रायमूर्त्तिः सुदर्शनः सः प्रभोः चतुर्थमूर्त्तिरूपः। इत्थं स्वयं भगवान् मूर्त्तिचतुष्टयरूपेण आत्मानं प्रकाशयति। यथोक्तं स्कन्दपुराणे –

**तस्य शक्तिस्वरूपेयं भगिनी श्रीः प्रकीर्त्तिता।**

**सुदर्शनं तु यच्चक्रं सदा विष्णुकरे स्थितम्॥**

**शाखाग्रमध्यस्थं तद्रूपं तत्तुरीयकम्।**

**एवं तु मूर्त्तयस्तेन चतस्रो वै प्रकाशिताः ॥**[4]

भगवतः एवंरूपेण दर्शनं कृत्वा राजा कृतकृत्य बभूव। तदानीं नारदः कथयति –

**यं द्रष्टुं योगिनः नित्यं यतन्ति यतमानसाः।**

**अवधानेन महता क्षणं पश्यन्ति मानवाः ॥**

**स्वयं दारुमयं देहं समास्थाय जनार्दनः।**

**अनुग्रहीतुं त्वं भूप प्रत्यक्षमुपागतः ॥**[5]

सः जगन्नाथः दारुमयीं तनुमवलम्ब्य भक्तानां कृते अनुग्रहं करोति। तत्र इन्द्रद्युम्नः प्रणिपातपूर्वकं जगन्नाथं स्तौति। यथा –

**परित्राहि जगन्नाथ मग्नं संसारसागरे।**

**अनाथबन्धो कृपया दीनं मां तापसंकुलम् ॥**[6]

वलभद्रस्य कृते तस्य निवेदनमासीत् यथा –

**पर्यायवृत्या वलिनां वरिष्ठ**

**त्वामीशितारं शरणं प्रपद्य।**

**यया सृजस्यत्सि जगन्ति नाथ**

**वक्षःसरोजासनया स्वशक्त्या ॥**[7]

सुभद्रायाः कृते तदीयप्रार्थना यथा-

**तां भद्ररूपां जगदाश्रयां तां**

**देवारणिं पादयुगे नतोऽस्मि।**

**यदंशुजालप्रतिसृष्टमेतद्**

**ब्रह्माण्डजालं करसङ्गि नाथ ॥**[8]

सुदर्शनस्य कृते सः कथयति-

**सुदर्शनं दैत्यबलस्य हन्तृ चक्राभिधं त्वां प्रणतः सुदर्शनम् ।**[9]

एवं क्रमेण राजा इन्द्रद्युम्नः बहुधा साष्टाङ्गं प्रणम्य तस्य दारुब्रह्मणः स्तुतिं करोति।

महाप्रभोः जगन्नाथस्य लीला परमरहस्यमयी। स एव कार्य, स एव कारणम्। बलभद्रः शिवरूपेण जगन्नाथः कृष्णरूपेण सुभद्रा शक्तिरूपेण सुदर्शनः सूर्यरूपेण च सर्वेषां सम्प्रदायानां प्रतीकभूताः सन्ति। चतुर्णां वेदानामपि प्रतीकभूतस्य तस्य प्रभोः भक्तः चतुर्धामूर्त्तदर्शनेन परमानन्दमनुभवति।

**बलभद्रो जगन्नाथः सुभद्रा च सुदर्शनः।**

**दारुब्रह्मस्वरूपाय चतुर्धामूर्तये नमः ॥**

## पादटीप्पणी

1. स्कन्दपुराणम्, उत्कलखण्डे - 12.74
2. तत्रैव - 1.2
3. तत्रैव - 19.8-10
4. तत्रैव- 19.17-18
5. तत्रैव - 19.53-54
6. तत्रैव – 20.25
7. तत्रैव - 20.22
8. तत्रैव - 20.23
9. तत्रैव - 20.24

## सहयकग्रन्थसूची

1. स्कन्दपुराणान्तर्गतं श्रीपुरुषोत्तमक्षेत्रमाहात्म्यम्, प्रथमभागः, अनुवादकः-वावाजीचैतन्यचरणदासः, प्रकाशकः श्रीजगन्नाथमन्दिरप्रशासन, पुरी 2016

2. स्कन्दपुराणम् - गीताप्रेस्, गोरखपुर।

# The Essence of *Khecarīmudrā* in some Yogic Texts

Abhilash Banerjee
(Ph.D. research scholar)
Department of Sanskrit, Pali & Prakrit
Visva-Bharati, Santiniketan

Our ancient sages and their creations always enlighten us in different ways. From the very beginning of this universe the holy and pure knowledge of yoga is always with us by the grace of the God. Due to lack of proper knowledge, we can't define this knowledge. But it is already there. In every era almighty lord comes out and addresses us and tries to teach us about the yoga. It is not an easy task to understand this fact but our sages have the power to access to this knowledge. The Lord addresses in the holy *Gitā*-

**इमं विवस्वते योगं प्रोक्तवानहमव्ययम्।**
**विवस्वान्मनवे प्राह मनुरिक्ष्वाकवेऽब्रवीत्।।** ( 4. 1)[1]

So the way of knowledge is not an easy path. It means one has to struggle every moment to achieve pure knowledge. In this holistic way our Guru helps us from various angles to attain the success. Like that, yoga and yoga *mudrā*s are the things by which we can prosper physically, mentally and spiritually. Among all the *mudrā*s *khecarīmudrā* is this *mudrā* by which one can arouse his serpent *kuṇḍalinī.* In this article we are going to discuss about the essence of *khecarīmudrā*.

## Key Word

*Kuṇḍalinī*, *Khecarīmudrā*, Spiritual, Mundane,

## *KHECARĪ*

At first *sādhaka* should know about the *Vajrāsana* because to perform *Khecarī mudrā Vajrāsana* is very much needed. According to Lord *Śiva* this yogic *mudrā* is more favourite than his life. So one who wants to perform this *mudrā* he should follow some basic rule. It is a very important *mudrā* which is described in every ancient yogic text. A yogi can reach his destiny only by doing this *mudrā* properly and one should always keep in mind that it is not an easy *mudrā* to perform. After a hard practice through long time he can achieve it. Only regular practice and grace of

God are able to give you the success. Before doing this one's body and mind should be steady.

**PRACTICE METHOD (According to *Śiva Saṃhitā*)**

To perform this *Khecarī mudrā* one must find out a clean and clear place. Then sitting in *vajrāsana sādhaka* should stable his gaze between his eyebrows firmly. After that he should properly conjoin the upturned tongue with the hollow nectar oozing cavity which is situated just above the soft palate and which is known as *kapālakuhara* or nasopharyngeal cavity. After a regular proper practice of this *mudrā* one can test the holy nectar which is already situated in our body. Only *yogī* can feel the test of this nectar. One should simply rub his tongue within nasopharyngeal cavity and only then he can feel it. It is not an easy task to do. Whether anyone is in pure or impure condition if he can perform this *mudrā* properly then he must become pure and there is no doubt about it.


**अपवित्रः पवित्रो वा सर्वावस्थां गतोऽपि वा।**
**खेचरी यस्तु जानाति स शुद्धो नात्र संशयः।।** ( *Ś.S.* 4.55 )[2]

("Whether pure or impure or in whatever condition one may be, if one knows the *khecarī* he is pure without any doubt")

Picture can help us to create a clear concept, so we give below a picture of *Khecarī mudrā*. But without the help of the Guru it is quite impossible. By proper practice of this *mudrā* anyone can easily cross the ocean of pain in this world and may access to his ultimate goal. *Khecarī mudrā* has the power to give one the chance of birth in noble family and there is no doubt about that.

**क्षणार्धं कुरुते यस्तु तीर्त्वा पापमहार्णवम्।**
**दिव्यभोगान् प्रभुक्त्वा च सत्कुले स प्रजायते।।** ( *Ś.S.* 4. 56.)[3]

("If one practices *khecarī* even for half a moment, having crossed the great oceans of sins and after enjoying divine experiences, takes birth in the noble family")




4

(According **to *Gheraṇḍa Saṃhitā***)

In this text we find that there is some different approach to access with *Khecarī mudrā*. This text very clearly says that if we want to perform this *mudrā* then we must cut our frenum by iron pincers and rubbing it with butter. If anybody regularly performs this *mudrā* then certainly he can accomplished this. We should practice in this way that after some day we can touch between the eye-brows by our tongue. It means tongue must be large to perform this *mudrā*.

**एवं नित्यं समभ्यासाल्लम्बिका दीर्घतां व्रजेत् ।**

**यावद्गच्छेद्भ्रुवोर्मध्ये तदा सिध्यति खेचरी ।।** ( *G.S.* 3. 22.)[5]

("By regularly practicing in this way the tongue becomes so long as to reach between the eye-brows. Then *khecarī* is accomplished.")

Nobody can see this *mudrā* from outside till the aspirant shown him because the happening place of this posture is totally inside of the one's mouth. Only a yogi has the power to realize it. When upturned tongue enters the cavity above the upper palate of the mouth and the gaze is fixed between the eyebrows only then *Khecarī mudrā* is accomplished. The three important *nāḍi*s meet at the same point which is

called *kapālakuhara* which is situated inside our top part of the mouth. After getting a control over this *mudrā* one can be free from hunger, thirst and different types of major diseases related to our body and mind. This text addressed that the body of a *sādhaka* who got victory over *Khecarī* cannot be burnt by fire, nor dried up by the wind and his body is also not wetted by water. A glow certainly comes out from the body of this *sādhaka*. He can be able to drink the nectar of different test which is oozing from the moon which is situated to the left side of the interior of the two eye-brows. *Sādhaka*'s tongue can taste different types of juices.

**नानारससमुद्भूतमानन्दं च दिने दिने।**
**आदौ च लवणं क्षारं ततस्तित्ककषायकम्।।**
**नवनीत घृतं क्षीरं दधितक्रमधुनि च।**
**द्राक्षारसं च पीयूषं जायते रसनोदकम्।।** ( *G.S.* 3. 27, 28.) [6]

("Day by day the person experiences the pleasurable sensations arising from these various juices. Among the juices secreted the tongue has the first taste of salt, then bitter, then astringent, then the taste of butter, ghee, curds, butter-milk, honey, grape juice and lastly of nectar.")

(**According to *Haṭharatnāvalī*** )

The author of this text *Śrīnivāsayogī* addressed that *khecarī* is the last *mudrā*. It's mean after getting control over other nine *mudrā*s we can try to perform it, not before that. That is the way the author increases its significance. This *mudrā* has so many different names according to this text like *suṣumnagā, amṛtā, mūrdhvā,*and *lambikā*. *Khecarī* helps one to quickly make the *prāṇa* move into *brahmarandhra*. Then a wish aspirant must cut his frenum by a sharp thing which looks like a leaf of a milk-hedge.

**जिह्वाकृतिनिभं शस्त्रमल्पं तच्छेदने क्षमम्।**
**स्नुहीपत्रनिभं बल्यं शस्त्रं कुर्याद्विचक्षणः।।** ( *H.R.* 2. 130.)[7]

("A wise person should collect a strong weapon resembling the leaf of milk- hedge, appearing like a tongue, which would be able to cut the tongue very little.")

All the ingredients used during the cutting process of *Khecarī* is called by the word *Śastra*. In the text "*Kapālakuraṇṭaka-Haṭhābhyāsa-Paddhati*" we found some name which is used for different *Śastra*s like-

| Original Name | ***Śastra* Name** |
|---|---|
| Black pepper | *sūryaśastra* |
| Rock-salt (*saindhava*) | *Candra-śastra* |
| Chebulic myrobalan (*harītakī*) | *Dhanvantarī śastra* |
| Sharp weapon | *Indra-śastra* |
| Cardamom (*elā*) | *Brahma-śastra* |
| Scissors | *Caurā-śastra* |
| Sulpher (*gandhaka*), Orpiment (*haritāla*), Vermilion (*hiṅgula*) | *Bhavānī-śastra* |
| White of leadwort (*citraka-arka*) | *Agni-śastra* |

Then one has to make a powder with some of the selected ingredients which are mentioned above. We must follow the quantity which is used for making powder. Here the weight is mentioned by the term *niṣka*. 1 *niṣka* = 25gms.

2 *niṣka harītakī* = (25+25 = 50) gms. 1 *niṣka nāgara* (Dried ginger) = 25gms.
½ *niṣka* rock salt = 12.5gms.

The author mentions it at last since in order because to achieve *Khecarī* we must know the process of *śakticālana* which is already mentioned before. After seven days one has to cut his frenum again to the thinness of a sesame and powdering in same way.

छेदनादिक्रमेणैव यावद् भ्रूमध्यगा भवेत्।
तावच्छनैः प्रकर्तव्यं श्रीनिवासस्य भाषणम्।। ( *H.R.* 2. 135.)[8]

("One should cautiously follow the processes of *chedana* (cutting) etc., so that the tongue touches the center of the eyebrows. This is told by *Śrīnivāsa*.")

After that yogi *Śrīnivāsa* explains some thoughts of different *haṭhayogasampradāya* about *Khecarī mudrā* especially over the cutting process. Some doctrines address that after cutting the tongue to a hair's breadth one attain

*lambikā* (yoga) very soon. Other one said that when someone folding his tongue inserts it into the nasopharyngeal cavity and fixes the gaze between the eye-brow this should be called *Khecarī mudrā*. After getting a good control over this *mudrā* one is not affected by diseases, hunger, thirst and death. "*Haṭhapradīpikā"* advised to cut the tongue gradually until it touches the center of the eye-brow and then only *Khecarī* is attain. Thus there are so many different doctrines about *Khecarī mudrā*.

After that yogi *Śrīnivāsa* explains about *saṅketa* as per his guru's guidance. According to him *khecarī* can't be attained without *saṅketa* and *śṛṅkhalā*. Although it is not so clear but it seems like that *saṅketa* is in the form of two spiral rings for the insertion of tongue into it. *Saṅketa* is made by two *śṛṅkhalā*s which looks like a rounded snake and its length is twenty digits. One should try to insert the tongue in to the circle of *śṛṅkhalā* so that the tongue is able to enter *suṣumnā* and only then the *Khecarī* is perfect. The person who has control over this *mudrā* is never bitten by *vāsukī*, *takṣaka* etc. He can hear different types of sound.

**प्राणे सुषुम्णासम्प्राप्ते नादं तु श्रूयतेऽष्टधा।**

**घण्टादुन्दुभिशंखादिवीणावेणुनिनादवत्।**

**तनूनपात्तडित्तारेशपवनोपमम्।।** ( *H.R*. 2. 148.)[9]

("When *prāṇa* enters into *suṣumnā*, eight types of *nāda*s are heard, like sounds resembling that of a bell, trumpet, conch, *vīṇā*, flute, tiny bell, tinkling of a very fine pot, cracking sound of the fire, loud thunders and shrill sound of blowing air.")

At that time *sādhaka* is able to taste the divine ambrosia nectar ( *amara-vāruṇī* ) as salt, pungent, sour or milk, honey or ghee which is oozing from *candrā* ( *iḍā* ). Generally there are two main parts in every yoga *mudrā*, so this *mudrā* has also two parts. We can divide every good quality of *khecarī mudrā* in these two segments. Those parts are-

1. Spiritual.
2. Mundane.

## SPIRITUAL BENEFITS

1. One becomes free from this world.
2. He can achieve the absolute state (*brahmasthānaṃ*).
3. He becomes sin free in his whole life.

**निरन्तरकृताभ्यासात् पीयूषं प्रत्यहं पिबेत् ।**

**तेन विग्रहसिद्धिः स्यान्मृत्यु मतंगकेसरी ।।** ( *Ś.S.* 4. 54.) [10]

("One should daily drink the nectar through its regular practice. By this, the body becomes so strong that works as a lion over the elephant of death.")

## MUNDANE BENEFITS

1. Aspirant's body becomes very much stronger.
2. Sensory organ becomes more effective.
3. Increases the eye power of *sādhaka*.

## CONCLUSION

One should always learn this *mudrā* from the Guru because if one does any mistake then one can't access to the ultimate pleasure. This *mudrā* is adored by the God that's not for any ineligible person because this *mudrā* is as significant as the vital air. One should be very careful while performing this posture and it is also a secret *mudrā.* It's meaning it is not for everyone. To get a control over *khecarī* is not an easy work; it can take time so one should not be in hurry.

## End Note

1. *Śrīmadbhagavagītā*. Ed. Swami Vasudevananda. Kolkata: Udbodhana Office, 2000.

2. *Śiva Saṃhitā.* Ed. Swami Maheshananda, Dr. B.R. Sharma, Shri G.S. Sahay, Shri R.K. Bodhe, Dr. B.K. Jha, Shri C. L. Bhardwaj. Kaivalyadhama S.M.Y.M. Samiti, Pune, 2009, P. 154.

3. *Śiva Saṃhitā.* Ed. Swami Maheshananda, Dr. B.R. Sharma, Shri G.S. Sahay, Shri R.K. Bodhe, Dr. B.K. Jha, Shri C. L. Bhardwaj. Kaivalyadhama S.M.Y.M. Samiti, Pune, 2009, P. 154.

4. *Khecarī mudrā*- Wikipedia (Nexoye).

5. Gheraṇḍa. *Gheraṇḍa Saṃhitā*. Ed. Swami Digambarji, Dr. M.L. Gharote. Kaivalyadham S.M.Y.M. Samiti, Pune, 1997, P. 100.

6. Gheraṇḍa. *Gheraṇḍa Saṃhitā*. Ed. Swami Digambarji, Dr. M.L. Gharote. Kaivalyadham S.M.Y.M. Samiti, Pune, 1997, P. 103.

7. Śrīnivāsayogi. *Haṭharatnāvalī*. Ed. Dr. M/L/ Gharote, Dr. Parimal Dvvnath, Dr. Vijay Kant Jha. The Lonavla Yoga Institute. Pune, 2002, P. 85.

8. Śrīnivāsayogi. *Haṭharatnāvalī*. Ed. Dr. M/L/ Gharote, Dr. Parimal Dvvnath, Dr. Vijay Kant Jha. The Lonavla Yoga Institute. Pune, 2002, P. 87.

9. Śrīnivāsayogi. *Haṭharatnāvalī*. Ed. Dr. M/L/ Gharote, Dr. Parimal Dvvnath, Dr. Vijay Kant Jha. The Lonavla Yoga Institute. Pune, 2002, P. 92.

10. *Śiva Saṃhitā.* Ed. Swami Maheshananda, Dr. B.R. Sharma, Shri G.S. Sahay, Shri R.K. Bodhe, Dr. B.K. Jha, Shri C. L. Bhardwaj. Kaivalyadhama S.M.Y.M. Samiti, Pune, 2009, P. 153.

## Bibliography

Swatmarama. *Yoga evaṃ Kriyā.* Yoga Publication, 1981.

*Brahmāṇḍapurāṇa*. Ed. G. V. Tagra. Delhi: MLBD, 1958.

*Brahmavaivartapurāṇa.* Ed Panchanan Tarkaratna. Calcutta (now Kolkata): Natavara Prakashani, 1827. Gheraṇḍa. *Gheraṇḍa-Saṃhitā*. Ed Swami Maharaja. Madhyapradesh: Pitambara Peeth, 2008.

Ghorakṣanath. *Gorakṣa Saṃhitā*. Ed. Janardana Pandeya. Varanasi: Sarasvati Bhavana Pustakalaya 1976.

*Kūrmapurāṇa*. Ed Nilamani Mukhopadhyay. Calcutta (now Kolkata): Vidyaratna Press,1890. Pala, Devasish. *Yogaśikṣā-ātmavodha-vikāśa*. Kolkata: Rita Publication, 2005.

Patañjali. *Pātañjala-Yogadarśana*. Ed Swami Bhargananda. Kolkata: Udbodhana office, 2004.Rao, Dharanipragada. *Sampoorna Mudra Vignan*. 2021.

Sadashiv yogishwar. *Śivayogapradīpikā*. Ed. Julia Walker. Pune.

Saraswati, Satyananda. *Āsana-prāṇāyāma-mudrā-bandha*. Bihar: Yoga Publication, 1969.

*Śiva Saṃhitā*. Ed Khemraja Srikrishnadassrishti. Srivenkateswara. 1960. *Śrīmadbhagavagītā*. Ed Swami Vasudevananda. Kolkata: Udbodhana Office, 2000. Srinivasa. *Hatharatnāvalī*. Ed. M. Venkata Reddy. 1982.

Swami Niranjanananda Saraswati. *Mudra Vijyan*. Yoga Publication Trusy. Munger, Bihar.Swatmarama, Yogi. *Haṭhayagopradīpikā*. . Bihar: Yoga Publication, 1985.

## Abbreviations

*Ś.S = Śiva Saṃhitā.*

*G.S. = Gheraṇḍa Saṃhitā.*

*H.R. = Haṭharatnāvalī*

# सिद्धान्तकौमुद्यां प्रमुखहल्सन्धिपदविमर्शः

डॉ.सुनेली देई
सहायक आचार्यः, संस्कृतविभागः
गङ्गाधरमेहेरविश्वविद्यालयः, सम्बलपुरम् , ओडिशा

**सारांशः**

सिद्धान्तकौमुद्याः हल्-सन्धिप्रकरणे सि.कौ.१११ सूत्रतः १४९ सूत्रं यावत् ऊनचत्वारिंशत्संख्याकैः (३९) सूत्रैः दशवार्त्तिकैः च हल्-सन्धिपदानां साधुत्वं प्रदर्शितमस्ति। सन्धेः नामान्तरं भवति संहिता। वर्णानामतिशयितः सन्निधिः संहितासंज्ञः स्यात्। भट्टोजिदीक्षितः स्वकीये सिद्धान्तकौमुदीग्रन्थे संहिताशब्दस्य कृते सन्धिशब्दस्य प्रयोगं करोति। तस्य मतेन सन्धिः पञ्चविधः- १.अच्-सन्धिः, २. प्रकृतिभावसन्धिः, ३. हल्-सन्धिः, ४. विसर्गसन्धिः, ५. स्वादिसन्धिः। हलां सन्धिः- हल्-सन्धिः। अष्टाध्याय्यां व्यञ्जनवर्णानां कृते हल्-प्रत्याहारसंज्ञायाः प्रयोगः क्रियते। हल्-प्रत्याहारसंज्ञापदेन ह य व र ल ञ म ङ ण न झ भ घ ढ ध ज ब ग ड द ख फ छ ठ थ च ट त क प श स ष चेति वर्णाः गृह्यन्ते। व्यञ्जनवर्णानां मध्ये यः सन्धिः विधीयते, सः सन्धिः व्यञ्जनसन्धिः हल्-सन्धिर्वा कथ्यते। शोधपत्रेऽस्मिन् हल्-सन्ध्यन्तर्गते श्चुत्वसन्धि-ष्टुत्वसन्धि-जश्त्व-चर्त्व-छत्व-अनुनासिक-अनुस्वार-परसवर्ण-पूर्वसवर्ण-ङमुडागम-तुगागमसन्धिपदानाम् अर्थनिर्देशपूर्वकं ससूत्रं साधुत्वं प्रदर्शितमस्ति।

**कूटशब्दाः –** स्तोः श्चुना श्चुः, ष्टुना ष्टुः, झलां जशोऽन्ते, खरि च, शश्छोऽटि, मोऽनुस्वारः, अनुस्वारस्य ययि परसवर्णः, यरोऽनुनासिकेऽनुनासिको वा, झयो होऽन्यतरस्याम्, छे च।

**उपक्रमः**

यथा अग्निं विना इन्धनं काष्ठं वा शुष्कमपि न ज्वलति तथैव अर्थज्ञानं विना ,केनापि जनः शब्दप्रयोगं कर्त्तुं समर्थः न भवति। तथा चोक्तं महाभाष्यकारेण-

**यदधीतमविज्ञातं निगदेनैव शब्द्यते।**

**अनग्नाविव शुष्कैधो न तज्ज्वलति कर्हिचित्।।**[1]

अपि च मन्त्रस्य अर्थं न ज्ञात्वा यः मन्त्रमुच्चारयति, सः अधमपाठकः भवतीति पाणिनीयशिक्षायां कथ्यते। तथा हि-

**गीती शीघ्री शिरः कम्पी तथा लिखितः पाठकः।**

**अनर्थज्ञोऽल्पकण्ठश्च षडेते पाठकाधमाः।।**[2]

शब्दानामर्थज्ञानं कारयति व्याकरणशास्त्रम्। तथा चोक्तं वाक्यपदी—

**अर्थप्रवृत्तितत्त्वानां शब्दां एव निबन्धनम्।**

**तत्त्वावबोधः शब्दानां नास्ति व्याकरणादृते॥**[3]

अर्थात्, यथा संसारस्य सर्वेषां पदार्थानामवबोधनार्थं शब्दानां विरचनं भवति, तथैव सर्वेषां शब्दानामर्थज्ञानार्थं व्याकरणशास्त्रस्य विरचनं भवति।

अस्माज्ज्ञायते यत् शब्दानामर्थज्ञानमत्यन्तमावश्यकम्। तस्मात् व्याकरणशास्त्रेषु निष्पन्नानां शुद्धशब्दानाम् अर्थनिरूपणरूपायाः आवश्यकतायाः परिपूरणार्थं मनसि संकल्पीकृत्य मया अयं सिद्धान्तकौमुदीसन्धिपदकोषः नाम लघुशोधप्रकल्पः मनोनीतः। अस्य सिद्धान्तकौमुदीसन्धिपदकोषः नाम लघुशोधप्रकल्पस्य प्रस्तुतार्थं बीजनिधिः (Seed Fund) आर्थिकसहायताप्रदानकरणात् तस्मै वीजनिधये अहं मम हृदयस्य गभीरतमप्रदेशात् आन्तरिककृतज्ञतां ज्ञापयामि। अपि च सिद्धान्तकौमुदीसन्धिपदकोषः इत्यस्योपरि लघुशोधप्रकल्पं कर्तुं सुयोगप्रदानकारणात् अहं गङ्गाधरमेहेरविश्वविद्यालयस्य कुलपतिभ्यः परमपूज्येभ्यः प्रफेसर् एन्.नागाराजुमहोदयेभ्यः, स्नातकोत्तरपरिषदः अध्येक्षेभ्यः प्रफेसर् ज्ञानरञ्जनस्वाइँमहोदयेभ्यः, सम्माननीयेभ्यः कुलसचिवेभ्यः श्रीमन्तः सनत्-कुमारनाएक-महोदयेभ्यः, अनुसन्धानसमितेः अध्यक्षपादेभ्यः प्रफेसर् सुशान्तकुमारदासमहोदयेभ्यः, उपकुलसचिवेभ्यः ड. उमाचरणपतिमहोदयेभ्यश्च अशेषधन्यवादं ज्ञापयामि। अस्मिन् सिद्धान्तकौमुदीसन्धिपदकोषाख्ये लघुशोधप्रकल्पे सिद्धान्तकौमुद्याः सन्धिप्रकरणे परिदृष्टानां सन्धिपदानाम् अर्थनिर्द्देशः क्रियते, येषां सन्धिपदानामर्थः अभिधानकोषेऽपि नोपलभ्यते। अर्थं

न ज्ञात्वा केवलं सन्धिपदज्ञानेन कोऽपि लाभः न भविष्यति। अतः सर्वेषां संस्कृतपदप्रयोगलिप्सूनां कृते सिद्धान्तकौमुद्याः सन्धिपदानामर्थावगत्यर्थं लघुशोधप्रकल्पोऽयं विरचितः। अस्य लघुशोधप्रकल्पस्य अन्तर्गतं भवति सिद्धान्तकौमुद्यां प्रमुखहल्सन्धि-पदविमर्शः इत्याख्यं शोधपत्रमिदम्। शोधपत्रेऽस्मिन् प्रमुखहल्सन्धिपदानाम् अर्थनिर्देशपूर्वकं ससूत्रं साधनप्रक्रिया प्रदर्श्यते।

## भट्टोजिदीक्षितस्य सिद्धान्तकौमुदीस्थं सन्धिप्रकरणम्

भट्टोजिदीक्षितेन (सप्तदशशताब्दी) विरचिता सिद्धान्तकौमुदीमहर्षिपाणिनिना (ख्री.पू.पञ्चमशतकम्) सूत्रात्मकशैल्या विरचितस्य अष्टाध्यायी नाम व्याकरणग्रन्थस्य प्रक्रियाग्रन्थोऽस्ति। अष्टाध्याय्यारुपरि विरचितेषु प्रक्रियाग्रन्थेषु सिद्धान्तकौमुदी सर्वश्रेष्ठा अस्ति। संस्कृतभाषाशिक्षाप्रदाने सिद्धान्तकौमुद्याः गुरुत्वपूर्णा भूमिका वर्त्तते। सिद्धान्तकौमुद्यां त्रयोदश प्रकरणानि सन्ति। तानि भवन्ति- १. संज्ञाप्रकरणम्, २. परिभाषाप्रकरणम्, ३. सन्धिप्रकरणम्, ४. सुबन्तप्रकरणम्, ५.अव्ययप्रकरणम्, ६.स्त्रीप्रत्ययप्रकरणम्, ७.कारकप्रकरणम्, ८. समासप्रकरणम्, ९. तद्धितप्रकरणम्, १०. तिङन्तप्रकरणम्, ११. कृदन्तप्रकरणम्, १२. वैदिकप्रकरणम्, १३. स्वरप्रकरणम्। अन्ते परिशिष्टरूपेण पाणिनीयशिक्षा, गणपाठः, धातुपाठः, लिङ्गानुशासनञ्च सन्ति। सिद्धान्तकौमुद्याः सन्धिप्रकरणं पञ्च उपप्रकरणैः विभक्तमस्ति। तानि भवन्ति- १.अच्-सन्धिप्रकरणम् २. प्रकृतिभावसन्धिप्रकरणम्, ३.हल्-सन्धिप्रकरणम्, ४. विसर्गसन्धि- प्रकरणम्, ५. स्वादिसन्धिप्रकरणम्।

## सन्धेः लक्षणं प्रयोजनञ्च

भट्टोजिदीक्षितः स्वकीये सिद्धान्तकौमुदीग्रन्थे संहिताशब्दस्य कृते सन्धिशब्दस्य प्रयोगं करोति। संहितायाः (सन्धेः) लक्षणं कृत्वा पाणिनिना उक्तम्- परः सन्निकर्षः संहिता (अ.-१.४.१०९) इति। अर्थात्, वर्णानामतिशयितः सन्निधिः संहितासंज्ञः स्यात्।[4] हलां सन्धिः- हल्-सन्धिः। अष्टाध्याय्यां व्यञ्जनवर्णानां कृते हल्-प्रत्याहारसंज्ञायाः प्रयोगः क्रियते। हल्-प्रत्याहारसंज्ञापदेन ह य व र ल ञ म ङ ण न झ भ घ ढ ध ज ब ग ड द ख फ छ ठ थ च

ट त क प श स ष चेति वर्णाः गृह्यन्ते। व्यञ्जनवर्णानां मध्ये यः सन्धिः विधीयते, सः सन्धिः व्यञ्जनसन्धिः हल्-सन्धिर्वा कथ्यते।

संस्कृतवाङ्मये सन्धेः एका प्रमुखभूमिका अस्ति। पदे वर्ण-वर्णयोः मध्ये अतिशयसामीप्यवशात् सन्धिः भवति।[5] वाक्ये पद-पदयोः मध्ये अतिशयसामीप्यवशात् सन्धिः भवति।[6]

साधारणतः त्रिषु स्थलेषु सन्धिः नित्या भवति- १. एकपदे सन्धिः नित्या भवति, २. धातूपसर्गयोः मध्ये सन्धिः नित्या भवति, ३. समासे सन्धिः नित्या भवति। परन्तु वाक्ये सन्धिः वक्तुः इच्छायाः उपरि निर्भरं करोति। वाक्ये वक्ता यदि सन्धिं कर्त्तुम् इच्छेत्, तर्हि सन्धिं करोति, यदि न इच्छेत्, तर्हि सन्धिं न करोति। तथा चोक्तं भट्टोजिदीक्षितेन –

**संहितैकपदे नित्या नित्या धातूपसर्गयोः।**
**नित्या समासे वाक्ये तु सा विवक्षामपेक्षते।।**[7]

यस्य वक्तुः वाक्ये सन्धिः पूर्णतया विद्यमानः, तस्य भाषा प्रौढा इति ज्ञायते। परन्तु अनेके विद्वांसः संस्कृतभाषायाः सुखबोधनार्थं सन्धिं न कृत्वा सरलं सरलं वाक्यं वदन्ति। यत् किमपि भवतु नाम। संस्कृतश्लोकरचनाकाले, समासे, धातूपसर्गयोः मध्ये सन्धिस्तु अनिवार्या भवति। अतः एतदर्थं सन्धिज्ञानं नितराम् आवश्यकम्।

अधः क्रमेण हल्-सन्ध्यन्तर्गते श्चुत्वसन्धि-ष्टुत्वसन्धि-जश्त्व-चर्त्व-छत्व-अनुनासिक-अनुस्वार-परसवर्ण-पूर्वसवर्ण-ङमुडागम-तुगागमसन्धिपदानाम् अर्थनिर्देशपूर्वकं ससूत्रं साधुत्वं प्रदर्शितमस्ति।

**श्चुत्वसन्धिपदानि**

सिद्धान्तकौमुदीग्रन्थे स्तोः श्चुना श्चुः (सि.कौ.-१११, अ.-८.४.४०) इति सूत्रेण हरिश्शेते रामश्चिनोति सच्चित् शार्ङ्गिञ्जयः चेति चतुर्णां श्चुत्वसन्धिपदानां साधुत्वं प्रदर्शितमस्ति। स्तोः श्चुना श्चुः (सि.कौ.-१११, अ.-८.४.४०) इति सूत्रस्य अर्थः भवति सकारतवर्गयोः शकारचवर्गाभ्यां योगे शकारचवर्गौ स्तः।

**हरिश्शेते**[8] **(हरिः शेते।)**

**हरिः शेते** इति स्थिते

**हरि स्  शेते** (विसर्जनीयस्य सः (सि.कौ.-१३८, अ.- ८.३.३४) इति सूत्रेण विसर्गस्य स्थाने स्-कारादेशः भवति।

**हरि श्  शेते** (स्तोः श्चुना श्चुः (सि.कौ.-१११, अ.-८.४.४०) इति सूत्रेण स्-कारस्य स्थाने श्-कारादेशः भवति।

= **हरिश्शेते**।

**रामश्चिनोति (रामः चिनोति)**

रामः चिनोति इति स्थिते

राम स् चिनोति (विसर्जनीयस्य सः (सि.कौ.-१३८, अ.- ८.३.३४) इति सूत्रेण विसर्गस्य स्थाने स्-कारादेशः भवति।

राम श् चिनोति (स्तोः श्चुना श्चुः (सि.कौ.-१११, अ.-८.४.४०) इति सूत्रेण स्-कारस्य स्थाने श्-कारादेशः भवति।

=रामश्चिनोति।

**सच्चित् (सत् चित् च)**

**सत् चित्** इति स्थिते

**सच् चित्** (स्तोः श्चुना श्चुः (सि.कौ.-१११, अ.-८.४.४०) इति सूत्रेण त्-कारस्य स्थाने च्-कारादेशः भवति।

= **सच्चित्**

**शार्ङ्गिञ्जय (हे शार्ङ्गिन् ! त्वं जय।)**

शार्ङ्गिन् जय इति स्थिते

शार्ङ्गि ञ् जय (स्तोः श्चुना श्चुः (सि.कौ.-१११, अ.-८.४.४०) इति सूत्रेण न्-कारस्य स्थाने ञ्-कारादेशः भवति।

= **शार्ङ्गिञ्जय**

**ष्टुत्वसन्धिपदानि**

सिद्धान्तकौमुदीग्रन्थे ष्टुना ष्टुः (सि.कौ.-११३, अ.- ८.४.४१ ) इति सूत्रेण रामषष्ठः, रामष्टीकते, पेष्टा, तट्टीका, चक्रिण्ढौकसे चैतेषां पञ्चानां ष्टुत्वसन्धिपदानां साधुत्वं

प्रदर्शितमस्ति। ष्टुना ष्टुः (सि.कौ.-११३, अ.- ८.४.४१ ) इति सूत्रस्य अर्थः भवति - स्तोः ष्टुना योगे ष्टुः स्यात्।

**रामषष्ठः (षष्ठे रामः)**

**रामः** षष्ठः इति स्थिते

**राम स्** षष्ठः (विसर्जनीयस्य सः (सि.कौ.-१३८, अ.- ८.३.३४) इति सूत्रेण विसर्गस्य स्थाने स्-कारादेशः भवति।

**राम ष्** षष्ठः (ष्टुना ष्टुः (सि.कौ.-११३, अ.- ८.४.४१ ) इति सूत्रेण स्-कारस्य स्थाने ष्-कारादेशः भवति।

= **रामष्षष्ठः**।

**रामष्टीकते (रामः टीकते (गच्छति।)**

**रामः टीकते** इति स्थिते

**राम स् टीकते** (विसर्जनीयस्य सः (सि.कौ.-१३८, अ.- ८.३.३४) इति सूत्रेण विसर्गस्य स्थाने स्-कारादेशः भवति।

**राम ष् टीकते** ( ष्टुना ष्टुः (सि.कौ.-११३, अ.- ८.४.४१ ) इति सूत्रेण स्-कारस्य स्थाने ष्-कारादेशः भवति।

= **रामष्टीकते।**

**पेष्टा (पेषणकारी)**

**पिष् तृच्** (ण्वुल्तृचौ (अ.- १.३.१३३) इति सूत्रेण पिष्-धातोः तृच्-प्रत्ययः भवति।)

**पेष् तृच्** (पुगन्तलघूपधस्य च (अ.- ७.३.८६ ) इति सूत्रेण गुणः भवति।

**पेष् तृ** ( हलन्त्यम् (अ.- १.३.३) इति सूत्रेण च्-कारस्य इत् संज्ञा भवति, तस्य लोपः (अ.- १.३.९) इति सूत्रेण च्-कारस्य लोपः भवति।

**पेष् टृ** (ष्टुना ष्टुः (सि.कौ.-११३, अ.- ८.४.४१ ) इति सूत्रेण त्-कारस्य स्थाने ट्-कारादेशः भवति।

**पेष्टृ सु** (ङ्याप्प्रातिपदिकात् (अ.- ४.१.१) इति सूत्रेण प्रातिपदिकसंज्ञा, सौजसमौट्छष्टाभ्यांभिस्ङेभ्या- म्भ्यस्ङसिभ्यांभ्यस्ङसोसाम्ङ्योस्सुप् (अ.- ४.१.२) इति सूत्रेण पेष्टृशब्दात् सुप्रत्ययः।

**पेष्ट् अनङ् सु** (ऋदुशनस्पुरुदंसोऽनेहसां च (अ.-७.१.९४) इति सूत्रेण अनङ् आदेशः भवति।

**पेष्ट् अन् सु** ( हलन्त्यम् (अ.- १.३.३) इति सूत्रेण ङ्-कारस्य इत् संज्ञा भवति, तस्य लोपः (अ.- १.३.९) इति सूत्रेण ङ्-कारस्य लोपः भवति।

**पेष्ट् आन् सु** ( अप्तृन्तृच्स्वसृनप्तृनेष्टृक्षत्तृहोतृप्रशास्तृणाम् (अ.- ६.४.११) इति सूत्रेण उपधायाः दीर्घः भवति।

**पेष्टान् स्** (उपदेशेऽजनुनासिक इत् (अ.- १.३.२) इति सूत्रेण उकारस्य इत् संज्ञा, तस्य लोपः (अ.- १.३.९) इति सूत्रेण उकारस्य लोपः।

**पेष्टान्** (अपृक्त एकाल् प्रत्ययः (अ.- १.२.४१) इति सूत्रेण स्-कारस्य अपृक्तसंज्ञा, हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल् (अ.- ६.१.६८) इति सूत्रेण स्-कारस्य लोपः।

**पेष्टा** (नलोपः प्रातिपदिकान्तस्य (अ.- ८.२.७) इति सूत्रेण न्-कारस्य लोपः।

**तट्टीका (तत् टीका)**

**तत् टीका** इति स्थिते

**तट् टीका** ष्टुना ष्टुः(सि.कौ.-११३, अ.- ८.४.४१ ) इति सूत्रेण त्-कारस्य स्थाने ट्-कारादेशः भवति।

= **तट्टीका।**

**चक्रिण्ढौकसे (हे चक्रिन् ! त्वं ढौकसे (गच्छसि)।)**

**चक्रि न् ढौकसे** इति स्थिते

**चक्रि ण् ढौकसे** (ष्टुना ष्टुः(सि.कौ.-११३, अ.- ८.४.४१ ) इति सूत्रेण न्-कारस्य स्थाने ण्-कारादेशः भवति।

= **चक्रिण्ढौकसे।**

**जश्त्वसन्धिपदानि**

सिद्धान्तकौमुदीग्रन्थे झलां जशोऽन्ते (सि.कौ.-८४, अ.- ८.२.३९ ) इति सूत्रेण अजन्तः, सुबन्तः, वागीशः, षडाननः, जगदीशः चैतेषां पञ्च जश्त्वसन्धिपदानां साधुत्वं प्रदर्शितमस्ति। झलां जशोऽन्ते (सि.कौ.-८४, अ.- ८.२.३९) इति सूत्रस्य अर्थः भवति – पदान्ते झलां जशः स्युः।

**अजन्तः ( स्वरवर्णान्तः)**

**अच् अन्तः** इति स्थिते

**अज् अन्तः**(झलां जशोऽन्ते (सि.कौ.-८४, अ.- ८.२.३९ ) इति सूत्रेण च्-कारस्य स्थाने ज्-कारादेशः भवति।

= **अजन्तः।**

**सुबन्तः (सुप् अन्ते यस्य सः - सुबन्तः)**

**सुप् अन्तः** इति स्थिते

**सुब् अन्तः** (झलां जशोऽन्ते (सि.कौ.-८४, अ.- ८.२.३९ ) इति सूत्रेण प्-कारस्य स्थाने ब्-कारादेशः भवति।

= **सुबन्तः।**

**वागीशः (वाचः ईशः)**

**वाक् ईशः** इति स्थिते

**वाग् ईशः** (झलां जशोऽन्ते (सि.कौ.-८४, अ.- ८.२.३९ ) इति सूत्रेण क्-कारस्य स्थाने ग्-कारादेशः भवति।

= **वागीशः।**

**षडाननः (कार्त्तिकेयः)**

**षट् आननः** इति स्थिते

**षड् आननः** (झलां जशोऽन्ते (सि.कौ.-८४, अ.- ८.२.३९ ) इति सूत्रेण ट्-कारस्य स्थाने ड्-कारादेशः भवति।

= **षडाननः।**

**जगदीशः (जगतः ईश्वरः (विष्णुः)**

**जगत् ईशः** इति स्थिते

**जगद् ईशः** झलां जशोऽन्ते (सि.कौ.-८४, अ.- ८.२.३९ ) इति सूत्रेण त्-कारस्य स्थाने द्-कारादेशः भवति।

= **जगदीशः।**

**चर्त्व-छत्वसन्धिपदानि**

सिद्धान्तकौमुदीग्रन्थे खरि च (सि.कौ.-१२१, अ.- ८.४.५५ ) इति सूत्रेण शश्छोऽटि[9] (सि.कौ.-१२१, अ.- ८.४.५५) इति सूत्रेण च छत्वसन्धिपदानां तच्चिवः, तच्छिवः, तत्त्वम्, भेत्तुम्, मच्छिरः, यावच्छक्यम् चैतेषां षड् चर्त्व-छत्वसन्धिपदानां साधुत्वं प्रदर्शितमस्ति। खरि च (सि.कौ.-१२१, अ.- ८.४.५५ ) इति सूत्रस्य अर्थः भवति – खरि परे झलां चरः स्युः।

**तच्चिवः, तच्छिवः ( तत् शिवः)**

**तत् शिवः** इति स्थिते

**तद् शिवः** (झलां जशोऽन्ते (सि.कौ.-८४, अ.- ८.२.३९ ) इति सूत्रेण त्-कारस्य स्थाने द्-कारादेशः भवति।

**तज् शिवः** (स्तोः श्चुना श्चुः (सि.कौ.-१११, अ.-८.४.४०) इति सूत्रेण द्-कारस्य स्थाने ज्-कारादेशः भवति।

**तच् शिवः** (खरि च (सि.कौ.-१२१, अ.- ८.४.५५) इति सूत्रेण ज्-कारस्य स्थाने च्-कारादेशः भवति।

= **तच्चिवः।**

**तच् छिवः** शश्छोऽटि[10] (सि.कौ.-१२१, अ.- ८.४.५५) इति सूत्रेण च्-कारस्य स्थाने विकल्पेन छ्-कारादेशः भवति।

= **तच्छिवः।**

**अनुनासिकसन्धिपदानि**

सिद्धान्तकौमुदीग्रन्थे यरोऽनुनासिकेऽनुनासिको वा (सि.कौ.-११६, अ.- ८.४.४५ ) इति सूत्रेण एतन्मुरारिः, एतद् मुरारिः चेत्यादीनां अनुनासिकसन्धिपदानां साधुत्वं प्रदर्शितमस्ति। यरोऽनुनासिकेऽनुनासिको वा (सि.कौ.-११६, अ.- ८.४.४५ ) इति सूत्रस्य अर्थः भवति – यरः पदान्तस्य अनुनासिके परे विकल्पेन अनुनासिकादेशः स्यात्। परन्तु प्रत्यये भाषायां नित्यम् (सि.कौ.-११६, वा.-५०१७, अ.- ८.४.४५ ) इति वार्त्तिकानुसारं यरः पदान्तस्य अनुनासिके परे नित्यम् अनुनासिकादेशः स्यात्। यथा- तन्मात्रम्, चिन्मयम्।

**एतन्मुरारिः, एतद् मुरारिः ( एषः विष्णुः)**

**एतत् मुरारिः** इति स्थिते

**एतद् मुरारिः** (झलां जशोऽन्ते (सि.कौ.-८४, अ.- ८.२.३९ ) इति सूत्रेण त्-कारस्य स्थाने द्-कारादेशः भवति।

**एतन् मुरारिः (**यरोऽनुनासिकेऽनुनासिको वा (सि.कौ.-११६, अ.- ८.४.४५ ) इति सूत्रेण द्-कारस्य स्थाने विकल्पेन न्-कारादेशः भवति।

= **एतन्मुरारिः**। विकल्पाभावे एतद् मुरारिः।

**अनुस्वारसन्धिपदानि**

सिद्धान्तकौमुदीग्रन्थे मोऽनुस्वारः (सि.कौ.-१२२, अ.- ८.३.२३) इति सूत्रेण हरिं वन्दे चेत्यादीनां अनुस्वारसन्धिपदानां साधुत्वं प्रदर्शितमस्ति। मोऽनुस्वारः (सि.कौ.-१२२, अ.- ८.३.२३ ) इति सूत्रस्य अर्थः भवति- हल्-वर्णे परे सति मान्तस्य पदस्यानुस्वारः स्यात्।

**हरिं वन्दे**

हरिम् वन्दे इति स्थिते

हरिं वन्दे (मोऽनुस्वारः (सि.कौ.-१२२, अ.- ८.३.२३) इति सूत्रेण म्-कारस्य स्थाने अनुस्वारादेशः भवति।

= हरिं वन्दे।

**परसवर्णसन्धिपदानि**

सिद्धान्तकौमुदीग्रन्थे अनुस्वारस्य ययि परसवर्णः (सि.कौ.-१२४, अ.- ८.४.५८ ) इति सूत्रेण अङ्कितः, अञ्चितः, कुण्ठितः, शान्तः, गुम्फितः चेत्यादीनां पदानां तोर्लि (सि.कौ.-११७, अ.- ८.४.६०) इति सूत्रेण तल्लयः, विद्वाँल्लिखति चेत्यादीनां परसवर्णसन्धिपदानां च साधुत्वं प्रदर्शितमस्ति। अनुस्वारस्य ययि परसवर्णः (सि.कौ.-१२४, अ.- ८.४.५८ ) इति सूत्रस्य अर्थः भवति- यय्-प्रत्याहारे परे सति अपदान्तस्य अनुस्वारस्य परसवर्णादेशः भवति। तोर्लि (सि.कौ.-११७, अ.- ८.४.६०) इति सूत्रस्य अर्थः भवति- तवर्गस्य लकारे परे परसवर्णादेशः भवति।

**अङ्कितः (चिह्नितः)**

**अकि (लक्षणे) क्त** (निष्ठा इति सूत्रेण अकिधातोः क्तप्रत्ययः।)

**अक् त** (उपदेशेऽजनुनासिक इत् (अ.- १.३.२) इति सूत्रेण इ-कारस्य इत् संज्ञा, लशक्वतद्धिते (अ.- १.३.८) इति सूत्रेण क्-कारस्य इत् संज्ञा, तस्य लोपः (अ.- १.३.९) इति सूत्रेण इकारस्य क्-कारस्य च लोपः।

**अ नुम् क् त** (इदितो नुम् धातोः (अ.- ७.१.५८) इति सूत्रेण अकिधातोः अन्त्याचः अकारात् परं नुमागमः।

**अ न् क् त** (उपदेशेऽजनुनासिक इत् (अ.- १.३.२) इति सूत्रेण उ-कारस्य इत् संज्ञा, हलन्त्यम् (अ.- १.३.३) इति सूत्रेण म्-कारस्य इत् संज्ञा, तस्य लोपः (अ.- १.३.९) इति सूत्रेण उकारस्य म्-कारस्य च लोपः।

**अं क् त** (नश्चापदान्तस्य झलि (अ.- ८.३.२४) इति सूत्रेण न्-कारस्य अनुस्वारादेशः।

**अङ् क् त (**अनुस्वारस्य ययि परसवर्णः (सि.कौ.-१२४, अ.- ८.४.५८ ) इति सूत्रेण अनुस्वारस्य परसवर्णादेशः।

**अङ् क् इट् त (**आर्धधातुकस्येड् बलादेः (सि.कौ.-१२४, अ.- ८.४.५८ ) इति सूत्रेण इडागमः।

**अङ् क् इ त (**हलन्त्यम् (अ.- १.३.३) इति सूत्रेण ट्-कारस्य इत् संज्ञा, तस्य लोपः (अ.- १.३.९) इति सूत्रेण ट्-कारस्य लोपः।

= **अङ्कितः।**

**पूर्वसवर्णसन्धिपदानि**

सिद्धान्तकौमुदीग्रन्थे झयो होऽन्यतरस्याम् (सि.कौ.-११९, अ.- ८.४.६२) इति सूत्रेण वाग्घरिः, वाग्हरिः चेत्यादीनां पूर्वसवर्णसन्धिपदानां साधुत्वं प्रदर्शितमस्ति। झयो होऽन्यतरस्याम् (सि.कौ.-११९, अ.- ८.४.६२) इति सूत्रस्य अर्थः भवति- झयः परस्य हकारस्य विकल्पेन पूर्वसवर्णादेशः भवति।

**वाग्घरिः, वाग्हरिः ( भाषणे चतुरः।)**

**वाक् हरिः** इति स्थिते

**वाग् हरिः** (झलां जशोऽन्ते (सि.कौ.-८४, अ.- ८.२.३९ ) इति सूत्रेण क्-कारस्य स्थाने ग्-कारादेशः भवति।

**वाग् घरिः** (झयो होऽन्यतरस्याम् (सि.कौ.-११९, अ.- ८.४.६२) इति सूत्रेण ह्-कारस्य स्थाने घ्-कारादेशः विकल्पेन भवति।

= **वाग्घरिः।** घ्-काराभावे **वाग्हरिः।**

**ङमुडागमसन्धिपदानि**

सिद्धान्तकौमुदीग्रन्थे ङमो ह्रस्वादचि ङमुण् नित्यम् (सि.कौ.-१३४, अ.- ८.३.३२) इति सूत्रेण प्रत्यङ्ङात्मा, सुगण्णीशः, सन्नच्युतः चेत्यादीनां ङमुडागमसन्धिपदानां साधुत्वं प्रदर्शितमस्ति। ङमो ह्रस्वादचि ङमुण् नित्यम् (सि.कौ.-१३४, अ.- ८.३.३२) इति सूत्रस्य अर्थः भवति- ह्रस्वात् परो यो ङम् तदन्तं यत्पदं तस्मात् परस्याचो नित्यं ङमुडागमः स्यात्।

**प्रत्यङ्ङात्मा (जीवात्मा)**

**प्रत्यङ् आत्मा** इति स्थिते

**प्रत्यङ् ङुट् आत्मा** (ङमो ह्रस्वादचि ङमुण् नित्यम् (सि.कौ.-१३४, अ.- ८.३.३२) इति सूत्रेण **ङुट् आगमः भवति।**

**प्रत्यङ् ङ् आत्मा** (उपदेशेऽजनुनासिक इत् (अ.- १.३.२) इति सूत्रेण उ-कारस्य इत् संज्ञा, हलन्त्यम् (अ.- १.३.३) इति सूत्रेण ट्-कारस्य इत् संज्ञा, तस्य लोपः (अ.- १.३.९) इति सूत्रेण उकारस्य ट्-कारस्य च लोपः।

= **प्रत्यङ्ङात्मा।**

**सुगण्णीशः (सुगणकानाम् ईशः)**

**सुगण् ईशः** इति स्थिते

**सुगण् णुट् ईशः** (ङमो ह्रस्वादचि ङमुण् नित्यम् (सि.कौ.-१३४, अ.- ८.३.३२) इति सूत्रेण णुट् आगमः भवति।

**सुगण् ण् ईशः** (उपदेशेऽजनुनासिक इत् (अ.- १.३.२) इति सूत्रेण उ-कारस्य इत् संज्ञा, हलन्त्यम्

(अ.- १.३.३) इति सूत्रेण ट्-कारस्य इत् संज्ञा, तस्य लोपः (अ.- १.३.९) इति सूत्रेण उकारस्य ट्-कारस्य च लोपः।

= **सुगण्णीशः।**

**सन्नच्युतः (अच्युतः सत्स्वरूपः भवति।)**

**सन् अच्युतः** इति स्थिते

**सन् नुट् अच्युतः (**ङमो ह्रस्वादचि ङमुण् नित्यम् (सि.कौ.-१३४, अ.- ८.३.३२) इति सूत्रेण नुट् आगमः भवति।

**सन् न् अच्युतः** (उपदेशेऽजनुनासिक इत् (अ.- १.३.२) इति सूत्रेण उ-कारस्य इत् संज्ञा, हलन्त्यम् (अ.- १.३.३) इति सूत्रेण ट्-कारस्य इत् संज्ञा, तस्य लोपः (अ.- १.३.९) इति सूत्रेण उकारस्य ट्-कारस्य च लोपः।

= **सन्नच्युतः।**

## तुगागमसन्धिपदानि

सिद्धान्तकौमुदीग्रन्थे छे च (सि.कौ.-१४६, अ.- ६.१.७३) इति सूत्रेण स्वच्छाया, शिवच्छाया चेत्यादीनां तुगागमसन्धिपदानां साधुत्वं प्रदर्शितमस्ति। छे च (सि.कौ.-१४६, अ.- ६.१.७३) इति सूत्रस्य अर्थः भवति- ह्रस्वस्य छे परे तुगागमः स्यात् संहितायाम्।

### स्वच्छाया (स्वस्य छाया।)

**स्व छाया** इति स्थिते

**स्व तुक् छाया** (छे च (सि.कौ.-१४६, अ.- ६.१.७३) इति सूत्रेण तुगागमः भवति।

**स्व त् छाया** (उपदेशेऽजनुनासिक इत् (अ.- १.३.२) इति सूत्रेण उकारस्य इत् संज्ञा, हलन्त्यम् (अ.- १.३.३) इति सूत्रेण क्-कारस्य इत् संज्ञा, तस्य लोपः (अ.- १.३.९) इति सूत्रेण उकारस्य क्-कारस्य च लोपः।

**स्व द् छाया** (झलां जशोऽन्ते (सि.कौ.-८४, अ.- ८.२.३९ ) इति सूत्रेण त्-कारस्य स्थाने द्-कारादेशः भवति।

**स्व ज् छाया** (स्तोः श्चुना श्चुः (सि.कौ.-१११, अ.-८.४.४०) इति सूत्रेण द्-कारस्य स्थाने ज्-कारादेशः भवति।

**स्व च् छाया** (खरि च (सि.कौ.-१२१, अ.- ८.४.५५) इति सूत्रेण ज्-कारस्य स्थाने च्-कारादेशः भवति।

= **स्वच्छाया।**

स्वच्छायावत् शिवच्छायारूपं करणीयम्।

**उपसंहारः**

शोधपत्रेऽस्मिन् सिद्धान्तकौमुद्याः स्तोः श्चुना श्चुः, ष्टुना ष्टुः, झलां जशोऽन्ते, खरि च, शश्छोऽटि, मोऽनुस्वारः, अनुस्वारस्य ययि परसवर्णः, यरोऽनुनासिकेऽनुनासिको वा, झयो होऽन्यतरस्याम्, छे च चेति दश हल्सन्धिविधायकसूत्रैः हरिश्शेते, रामश्चिनोति, सच्चित्, शार्ङ्गिञ्जयः, रामषष्ठः, रामष्टीकते, पेष्टा, तट्टीका, चक्रिण्ढौकसे, अजन्तः, सुबन्तः, वागीशः, षडाननः, जगदीशः, तच्शिवः, तच्छिवः, एतन्मुरारिः, एतद् मुरारिः, हरिं वन्दे, अङ्कितः, वाग्घरिः, वाग्हरिः, प्रत्यङ्ङात्मा, सुगण्णीशः, सन्नच्युतः, स्वच्छाया, शिवच्छाया चैतेषां दृष्टान्तरूपेण प्रदत्तां सप्तविंशतिसंख्याकानां (२७) हल्सन्धिपदानाम् अर्थनिर्देशपूर्वकं ससूत्रं साधुत्वं प्रदर्शितमस्ति। एतेषां शुद्धहल्सन्धिपदानां ज्ञानलाभं कृत्वा पाठकाः एतेषां हल्सन्धिपदानां हल्सन्धिसूत्रैः सिद्धानाम् इतरेषां हल्सन्धिपदानाञ्च यथास्थानं प्रयोगं करिष्यन्ति। यतो हि संस्कृतव्याकरणस्य प्रयोगस्थलानि भवन्ति वेद-वेदान्त-इतिहास-पुराण-दर्शन-रामायण-महाभारतमहाकाव्यनाटकादीनि सर्वाणि संस्कृतशास्त्राणि। पाणिनीयव्याकरणं न केवलं वेदाङ्गमस्ति, अपि तु सर्वेषां शास्त्राणां सर्वासां विद्यानाञ्च अङ्गं भवति। तथा चोक्तं वाक्यपदीये भर्त्तृहरिणा-

**तद्द्वारमपवर्गस्य वाङ्मलानां चिकित्सितम्।**
**पवित्रं सर्वविद्यानामधिविद्यं प्रकाशते।।**

## पादटीका

1. पस्पशा, पृ.-५२
2. पा.शि.का.-३२।
3. वाक्यपदीयम् १ - /१३
4. अ.-१.४.१०९ इति सूत्रस्योपरि सिद्धान्तकौमुदीवृत्तिः
5. वर्णाः पदं प्रयोगार्हानन्वितैकार्थबोधकाः। --- साहित्यदर्पणः - २/२
6. वाक्यं स्याद्योग्यताकाङ्क्षासत्तियुक्तः पदोच्चयः। --- साहित्यदर्पणः - २/१
7. सि.कौ.-२२३२, अ.६.३.१८ सूत्रोपरि सिद्धान्तकौमुदीकारिका।
8. स्तोः श्चुना श्चुः (१११ -,. कौ.सि, ४०.४.८.अ)
9. शश्छोऽटि – पदान्ताज्झयः परस्य शस्य छो वा स्यादटि।

10. शश्छोऽटि – पदान्ताज्झयः परस्य शस्य छो वा स्यादटि।

## सहायकग्रन्थसूची


1. आचार्यः, गोविन्दः, वैयाकरणसिद्धान्तकौमुदी (प्रथमभागः), चौखम्बा – सुरभारती-प्रकाशनम्, वाराणसी, २०२०
2. कील्हार्नसम्पादितम्, महाभाष्यम् (भागत्रयात्मकम्) पतञ्जलिप्रणीतम्, भण्डारकर ओरियेण्टाल रिसर्च इन्स्टिच्युट्, पूना, तृतीयसंस्करणम्-प्रथमभागः-१९६२, द्वितीयभागः-१९६५, तृतीयभागः-१९७२
3. झा, नरेशः,(सं.) अष्टाध्यायीसूत्रपाठः (हिन्दी-संस्कृतभाषाभ्याम् अनूदितः), चौखम्बा-सुरभारती-प्रकाशनम्, वाराणसी, २०१९
4. पाण्डेयः,गोपालदत्तः, वैयाकरणसिद्धान्तकौमुदी (प्रथमभागः), चौखम्बा-सुरभारती-प्रकाशनम्, वाराणसी, २०१३
5. मिश्रः, नारायणः, (सं.) अष्टाध्यायीसूत्रपाठः (हिन्दीभाषया अनूदितः), चौखम्बा-ओरिएण्टालिआ, वाराणसी, १९७७
6. शर्मा, आर्येन्द्रः, (सं.), काशिका (भागद्वयात्मिका), संस्कृत-अकादमी, ओसमानिआ यूनिभरसिटि, हाइदरावाद्, प्रथमभागस्य प्रथमसंस्करणम्-१९६९, द्वितीयभागस्य प्रथमसंस्करणम्-१९७०
7. शर्मा, श्रीगिरिधरः, शर्मा श्रीपरमेश्वरानन्दः, (संपादकौ) वैयाकरणसिद्धान्तकौमुदी (चतुर्भागात्मिका), बालमनोरमया तत्त्वबोधिन्या च समलङ्कृता, मोतिलालबनारसीदासः, दिल्ली, प्रथमभागः-१९८६, द्वितीयभागः-१९८२, तृतीयभागः-१९९७, चतुर्थभागः-१९८७
8. शास्त्री, शालिग्रामः, साहित्यदर्पणः, मोतीलालबलारसीदासः, वाराणसी, १९८६

# प्रबोधचन्द्रोदयनाटके अद्वैतवेदान्ततत्त्वोपस्थापनम्

डॉ. ज्ञानरञ्जनपण्डा
सहाचार्यः, साहित्यविभागः
राष्ट्रियसंस्कृतबिश्वविद्यालयः, तिरुपतिः, आन्ध्रप्रदेशः

ब्रह्मसत्यं जगन्मिथ्या जीवो ब्रह्मैव नापरः इति अद्वैतिनां वाक्। दीनोद्धारणकोद्देश्येन प्रवृत्तानां सर्वेषाम् आचार्याणां तत्तद्ग्रन्थेषु च सोपानभूतसिद्धान्तेषु अवान्तरतात्पर्यवतामपि परमतात्पर्यम् अद्वैते एव इति तत्तद्ग्रन्थावलोकनेन ज्ञायते। अद्वैततत्त्वं नान्तरीकतया द्वैतमपेक्ष्यते एव। द्वैतविज्ञानसाप्यकर्मोपासनादि बहिरन्तरङ्गसाधनसाध्यत्वात् अद्वैतसाक्षात्कारस्य। तत्तत् उपलभ्यते इदं च-

तमेतं वेदानुवचनेन ब्राह्मणाः विविदिषन्ति। यज्ञेन दानेन, तपसा, अनासक्तेन इति। तथापि अनुग्रहादेव तरुणेन्दुशिखामणेः। अद्वैतवासना पुंसाम् आविर्भवति नान्यथा इति।

ब्रह्मणः सर्वात्मकत्वम्, पुरुष एवेदं सर्वम् पुरुष एवेदं विश्वम् इत्यादि श्रुतिद्वारा अवगम्यते। ब्रह्मैव सत्यम् तद्भिन्नप्रपञ्चजातं जडं सर्वमपि परमात्मव्यतिरिक्तत्वेन परस्परपृथकत्वेन च यद् मानं तद् न तात्त्विकं किन्तु अज्ञानामूलादन्यथाभानमेव। अत एव प्रपञ्चान्द्रतत्त्वं नाम अयम् एकः अद्वैतः सिद्धान्तः। प्रपञ्चाभिसन्धस्य बन्धः सर्वानुभवसिद्धः। ब्रह्माभिसन्धस्य मोक्षश्च स्मृतिवत् अनुभवसिद्धः।

अत्र छान्दोग्यश्रुतिः “पुरुषं सोम्यतहस्तगृहीतम् आनयन्ति”, ‘अपहर्षित’, स्तेयम् अकार्षिते परषुम् अस्मै तपते ति। सा यदि तस्य कर्ता भवति तत एवं अन्तर्धः आत्मानं कुरुते। सः अन्दर्धाभिसन्धः अन्तर्धेन आत्मानम् अन्तरदर्ध्य परशुम् तप्तम् प्रतिगृह्णाति। सः दह्यते अथ हन्यते इति च कथयति। एतेदात्म्यमिदं सर्वं तत्तत् सत्यं तदात्मा तत्त्वमसि श्वेतकेतोठ इति मन्त्रेण च अनृताभिसन्धस्य बन्धं सत्याभिसन्धस्य मोक्षं च दर्शयति। अतः प्रपञ्चस्य अनृतत्वरूपम् मिध्यात्वम् ब्रह्मणः सत्यत्वं च सिद्धं भवति।

ज्ञानादेन मोक्षः इति अद्वैतिनाम् अपरा सिद्धान्तः। तमेव विद्वानमृतमिह भवति। नान्यः पन्था विद्यते अयनाय इति पुरुषसूक्तश्रुतौ स्पष्टम् उक्तं दृश्यते। इदं सर्वम् आत्मैव भवति यस्मात् द्वैतमेव रागादिना दुःखबीजादीनाम् आलम्बनं भवति। यस्मात् अज्ञानप्रभवस्य दुःखहेतोः

द्वैतभानस्य मूलस्य निवृत्तिर्भवति, यस्मात् इदं सर्वम् आत्मैव भवति तत् आत्मा भवति। तादृशेन आत्मज्ञानेन दुःखहेतोः द्वैतभानस्य समुल्लस्य निवृत्तिरेव मुक्ति। सा च रज्जौ सर्पबुद्धोः निवृत्तिवत् सर्वात्मनः अद्वितीयस्य परमात्मनः यथार्थज्ञानामात्रेणैव भवति। तस्मात् ज्ञानादेव कैवल्यम्।

तच्च ज्ञानम् ईश्वरानुग्रहादु भवति। स च ईश्वरानुग्रहा सदाचारविवेक-वैराग्यभक्तिध्यानादिना भवति। यदि बन्धः, तस्य हेतुश्च प्रपञ्चः आन्तरो न स्यात् तदाज्ञानेन बन्धनिवृत्तिर्न स्यात्। बन्धनिवृत्तिश्च मोक्षा अमृतत्त्वरूपस्य मोक्षस्य ज्ञानमेव उपायः इति श्रुतिशतानि कथयन्ति।

जडवस्तूनां सर्वेषां कल्पितत्वपरमार्थतश्च ब्रह्मव्यतिरेकेण असत्यत्वं च जीवब्रह्मणोः ऐक्यं च कथयति श्रुतिः। जीवब्रह्मणोः अभेदोऽपि अयमेका सिद्धान्तः। 'तत्त्वमसि अयमात्मा ब्रह्मा' इत्यादि महावाक्यानि अत्र प्रमाणानि। जीवा उपाधितः यद्यपि ब्रह्मभिन्नः तथापि न स्वभावतः ब्रह्मभिनः। जीवस्य मोक्षो नाम मनोग्राह्यः कश्चिद् सुखविशेषः न। तस्य आगन्तुकत्वात् अनित्यत्यम्। तस्मात् मोक्षान्यथानुपपत्त्या महावाक्यैः उपदिष्टः जीवब्रह्माभेदः इतरदर्शनप्रक्रियासु कुत्रापि अनुलिखितः अद्वैतीनां परमः सिद्धान्तः। ब्रह्मणः निर्गुणत्वम् इत्ययम् अद्वैतिनां सिद्धान्तः। 'साक्षी चेता केवलो निर्गुणश्च' इति श्रुतिः। यदि सगुणत्वमेव पारमार्थिकम् स्वरूपम् परमात्मनः स्यात् तदा परमात्मभिन्नः परमात्मवत् सत्यः कश्चन गुणसमूहः अभ्युपगन्तव्यो भवेत्। परमात्मभिन्नः एकः पदार्थः यदङ्गीक्रियेत तदा परमात्मनः पूर्णत्वं भज्येत। तस्मात् परमार्थतः ब्रह्म निर्गुणं परमार्थतः तदेव पूर्णम् तथापि परमार्थापरमार्थदृष्टिभेदेन ब्रह्मणः सगुणनिर्गुणविभागोऽपि श्रुतिसिद्ध इति अद्वैतभिः अङ्गीक्रियते।

अद्वैतिभिः जीवन्मुक्तिः अभ्युपगम्यते। अस्मिन् जन्मनि तत्त्वज्ञानेन सर्वात्मभावम् अप्राप्तस्य कर्मोपासना योगसाधनादिसहितस्य तुरीयाश्रमनिष्ठस्य अपरमार्थविदोऽपि सगुणपरमेश्वरप्राप्तिलोकः क्रममुक्तिः श्रुत्यादिषु तत्र तत्र उपवर्णिता तद्वत् निरस्तसर्वाज्ञानिनः ब्रह्मज्ञाने प्राप्तेऽपि प्रारब्धक्षयानुभावार्थं ये शरीरेण सह ब्रह्म अनुभवन्ति ते जीवन्मुक्ताः भवन्ति।

रज्जुसर्पादिमिथ्याभावपदार्थः रज्याधिष्ठानदर्शनेन अपायति एवम् अयं गिरिसमुद्रादिजाग्रत्प्रपञ्चसर्वोऽपि तदधिष्ठानभूतब्रह्मसाक्षात्कारेण अपैतीति ब्रह्मणः पारमार्थिक सत्ता अङ्गीक्रियते। एवं स्वप्नभ्रान्त्यादिरहितप्रपञ्चस्य ब्रह्मज्ञानबाध्यत्वात् व्यवहारिकी सत्ता इष्यते। शुक्तिरजतादीनाम् अध्यस्थपदार्थानां स्वाप्निकपदार्थानां च झटिति बाध्यत्वात् प्रातिभासिकसत्ता अङ्गीक्रियते। तस्माद् सत्तात्रैविध्यम अस्ति इति वेदान्तिनः कण्ठरवेण कथयन्ति।

अयम् अद्वैतसिद्धान्तः सार्वत्रिकः। भगवद्गीतायां मन्वादिस्मृतिषु पूर्वमीमांसादर्शने वाल्मीक्यादिरामायणे च श्रुतिस्मृतीनाम् अवलोकनेन अयोध्याकाण्डे ‘सूर्यस्यापि भवेत् सूर्यः अग्नेरग्निः प्रभोः प्रभुः श्रियः श्रीश्च भवेदन्याः कीर्त्याः कीर्ति क्षमा क्षमा इति सुमित्रावाक्ये 'तद्देवा ज्योतिषां ज्योतिः’, ‘श्रोत्रस्य श्रोत्रं मनसो मनः, यद् वाचो ह वायं स उ प्राणस्य प्राणः इति श्रुतौ। यस्य ज्योतिषः सान्निध्यवशात् एव श्रोत्रादिना शब्दावभासकत्वं यश्च ज्ञात्वा संसारात् धीरः विमुच्यते अमृतत्वं च प्राप्नोति तदेव अत्र सूर्यादीनां सूर्यत्वाद्यपारकत्वं प्रतिपादनेन प्रत्यभिज्ञायते। एवं सूर्यादीनाम् अपि स्वतः भानाभावस्य स्वयं प्रकाशचिद्भावनस्य च प्रतीतेः। अद्वैतसिद्धान्ते अस्मिन् वाक्ये महर्षिः वाल्मीकिना प्रस्तुतः। एवम् अक्षरं ब्रह्म सत्यं च मध्ये चान्ते च राघव। अश्रद्धेयम् इदं लोके न सत्यं प्रतिभाति। मुह्यते खलु मे भावः स्वप्नप्रयमिति में मति इत्यादयः श्लोकाः अद्वैततत्त्वं प्रतिपादयन्ति। एवमेव नश्वरं भासते च इत्यत्र विश्वमायुर्भवं नूप यथा शुक्तौ रौप्यभावः काचभूम्यां जलस्य च। निरामयं निराभासं निरवद्यं निरञ्जनं, नित्यानन्दं निराकराम् अद्वैतं तमसः परम् इत्यादयः श्लोकाः तत्तद्रामाणयणादिषु अद्वैतसिद्धान्तप्रतिपादकाः दरीदृश्यन्ते।’

**मध्याह्नार्कमरीचिकास्विव पयः पूरो यदज्ञानतः**

**खं वायुर्ध्वलनो जलं क्षितिरिति त्रैलोक्यमुन्मीलति।**

**यत्तत्त्वं विदुषां निमीलति पुनः स्रग्भोगिभोगोपमं**

**सान्द्रानन्दमुपास्महे तदमलं स्वात्मावबोधं महः।।**[1]

अयं तु दार्शनिककविः। अयं मध्याह्नार्कमरीचिकासु इव इत्यनेन एकं संसारविषयम् उदाहरणम्। 'श्रग्भोगोभोगोपमम्' इति द्वितीयेनोदाहरणेन मुक्तिविषयं च कथयति कविः। 'यतो वा इमानि भूतानि जायन्ते तेन जातानि जीवन्ति, यत्र प्रयन्त्यमभिसंविशन्ति तद् ब्रह्म' इति श्रुतिः सर्वेषां पदार्थानां ब्रह्मणः सकाशात् उत्पत्तिं ब्रह्मणि स्थितिं ब्रह्मणि लयञ्च कथयति। एवं च जगज्जन्मस्थितिलयकारणत्वं ब्रह्मणः तटस्थलक्षणम् अस्ति। अत्रापि मध्याह्नरविमरीचिकासु पयः पूर इव इति दृष्टान्तः ब्रह्मणि जगद् उन्मीलति तिष्ठति निमीलति इति कथनेन श्रुत्युक्तः पूर्वोक्तः दृष्टान्तः कथितो दृश्यते। एवं सान्द्रानन्द इत्यादिना ब्रह्मणः सच्चिदानन्दस्वरूपं यत् तटस्थलक्षणं निरूपितं दृश्यते।

तस्माद्वा आत्मन आकाशस्सम्भूतः आकाशादु वायुः, वायोरग्निः अग्नेरापः अञ्यः पृथिवी' इति सृष्टेः क्रमः उपनिषत्सु गृह्यते। तद्वत् अत्रापि कवेः '**खं वायुर्जलनोज्ज्वलं क्षितिरिति नौलोक्यम् उन्मीलति**' इति कथनद्वारा उपनिषदुक्तसृष्टिक्रमं स्ववाक्येन कथयति इति ज्ञायते। निमीलतीत्यनेन 'अविद्यास्तमयो मोक्षः स च बन्ध उदाहृतः इति अविद्यास्तमयरूपस्य मोक्षस्य-निरूपणं करोति। एवं च मङ्गलश्लोके स्पष्टः अद्वैतराद्धान्तः।'

अपि च नाटकेऽस्मिन् पञ्चमाङ्के नवमे श्लोके-

**ज्योतिः शान्तमनन्तमद्वयमजं तत्तद्गुणोन्मीलानाद्**

**ब्रह्मेत्यच्युत इत्युमापतिरिति प्रस्तूयतेऽनेकथा।**

**तैस्तैरेव सदागमैः श्रुतिमुखैर्नानापथप्रस्थितै-**

**र्गम्योऽसौ जगदीश्वरो जलनिधिर्वारां प्रवाहैरिव।।**[2]

श्लोकेऽस्मिन् अद्वैततत्वं सुष्ठु प्रतिपादितं दृश्यते। तत्र ज्योतिश्शब्देन ब्रह्म उच्यते। तच्च ज्योतिः ब्रह्मरूपं तत्तद्वैदिकपरिगृहितैः आगमैः नारदपञ्चरात्रादिभिः अनेकप्रकारम् उपास्यते। केचन हिरण्यगर्भ इति केचन अच्युत इति केचन उमापतिः इति उपास्यन्ते। एतानि पारमार्थिक नानातत्त्वानि न भवन्ति। यतो हि मायायाः त्रिगुणात्मिकायाः आध्यासिकसम्बन्धेन रजोगुणाधिक्येन ब्रह्मेति सत्वगुणाधिक्येन विष्णुरिति तमोगुणाधिक्येन उमापतिरिति च एकस्यैव ज्योतिषः गुणोपाधिका संज्ञा न वास्तवो भेदः। एतच्च ज्योतिः निर्गुणः भवति। इति

अद्वैतसिद्धान्तः। किञ्च रागद्वेषाभिनिवेशशून्यं भवति। तदेव शान्तम् इत्युच्यते। तदेव अस्मिन् श्लोके शान्तम् अनन्तम् अद्वयम् अजम् इति च कथ्यते। तादृशः जगदीश्वरः ब्रह्मरुद्रादिदेवतालम्बनैः युक्तः। शान्तमित्यादिविशेषणैः निरूपितः असौ परमात्मा एव उपास्य प्राप्यः नान्यः प्राप्तव्यो वर्तते। एवं च निरतिशयानन्दप्राप्तिरेव किल अद्वैतसिद्धान्तः तद् अत्र सम्यक् प्रतिपाद्यते।

पञ्चीकरणप्रक्रिया इति लोकसृष्टेः कारणीभूता असाधारणी प्रक्रिया अद्वैतिभिः अङ्गीकृता। सा च इत्थं पृथिव्यप्तेजवाय्वाकाशात्मकानि पञ्चभूतानि समशः विभज्य एकैकमर्थं परित्यज्य अन्यदर्थं चतुर्धाविभज्य चतुर्भागान् चतुर्षु अंशेषु निचिक्षिपे। एवं पृथिव्यादीनि पञ्चभूतानि पञ्चीकरणप्रक्रियया एव जायन्ते। इयं च प्रक्रिया 'वैशिष्ट्यातद्वाददस्तद्वादः' इति सूत्रे स्पष्टीकृतः। इयमेव पञ्चीकरणप्रक्रिया प्रबोधचन्द्रोदयनाटके पञ्चमाङ्के चतुर्दशश्लोके प्रतिपाद्यते

**भूत्वा कल्पशतायुषोऽम्बुजभवः सेन्द्राश्च देवासुरा**
**मन्वाद्या मुनयो मही जलधयो नष्टाः परं कोटयः।**
**मोहः कोऽयमहो महानुदयते लोकस्य शोकावहः**
**सिन्धोः फेनसमे गते वपुषि यत्पञ्चात्मके पञ्चताम्।।**[3]

अयं श्लोकः ब्रह्मणः अखण्डत्वम् अद्वितीयत्वं त्रिकालाबाध्यत्वं च कथयति। अखण्डभिन्नस्य प्रपञ्चस्य मिथ्यात्वं च प्रतिपादयति किं च 'एकत्वमनुपश्यतः' इत्यनेन एकत्वमनुपश्यतः जीवन्मुक्तस्य को मोहः का शोकः अत्र भवति। इति पृष्ट्वा ब्रह्मविद् ब्रह्मव भवति। ब्रह्मान्यस्य मिथ्याभूतस्य नश्वरत्वात् एकमेव पारमार्थिकं वस्तु अनुपश्यतः ब्रह्मविदः मोहोऽपि नास्ति शोकोऽपि नास्ति इति अद्वैततत्वं बहुधा बहु वर्णयति। एवमेव षष्ठाङ्के एकोनोत्रिंशत्तमे श्लोके-

**किं वाप्तं किमपोहितं किमुदितं कि वा समुत्सारितं**
**स्यूतं किं नु विलायितं न किमिदं किञ्चिन्न वा किञ्चन।**
**यस्मिन्नभ्युदिते वितर्कपदवीं नैवं समारोहति**
**त्रैलोक्यं सहजप्रकाशदलितं सोऽहं प्रबोधोदयः।।**[4]
**मोहान्धकारमवधूय विकल्पनिद्रा-**
**मुन्मथ्य कोऽप्यजनि बोधतुषाररश्मिः।**

**श्रद्धाविवेकमतिशान्तियमादिकेन**
**विश्वात्मकः स्फुरति विष्णुरहं स एषः।।**[5]

त्रिंशत् तमे श्लोके च विष्णोरहं स एषः जीवब्रह्मणोः ऐक्यं च परमतत्त्वं कविना न्यरूपि इति इदं नाटकम् सर्वथा अद्वैततत्त्वप्रतिपादनार्थमेव कविना लिखितम् इति सुधीभिर्विभावनीयम्।

## पादटीका

1. प्र.च.-1/1
2. प्र.च.-5/9 पृ.सं.205
3. प्र.च.-5/14 पृ.सं-213
4. प्र.च.-6/29 पृ.सं-274
5. प्र.च.-6-30

## सहायकग्रन्थसूची

1. रामनाथ-त्रिपाठी-शास्त्री, **प्रबोधचन्द्रोदयम्**, चौखम्बा-अमरभारतीप्रकाशनम्, वाराणसी, १९०७।
2. **छान्दोग्योपनिषद्**(शाङ्करभाष्यसहित्), गीताप्रेस, गोरखपुरम्, २०१३।
3. डॉ. आद्यापसादमिश्रः सम्पादितम्, **वेदान्तसारः**, अक्षयवट-प्रकाशनम्, इलाहाबाद्, १९९९।
4. योगेन्द्रनाथदेवशर्मा सम्पादितम्, **अद्वैतसिद्धिः**, तारा-पाब्लिकेशन्स्, वाराणसी, १९७१।

# शाङ्करवेदान्त-स्वामिनारायणवेदान्तयोस्तुलना

डॉ. श्वेतपद्मा शतपथी
सहायिका आचार्या
राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः

वेदान्तः नाम उपनिषत्प्रमाणम्। वेदेषु ब्रह्मतत्त्वविषये वा परंब्रह्मणः संसारेण सह कीदृशः सम्बन्धः इति गम्भीरतत्वविषये यत् यत् वर्णितमस्ति तादृशवर्णनस्य सारः यस्मिन् सिद्धान्ते उल्लिखितः अस्ति; सः सिद्वान्तः भवति वेदान्तः। भारतीयदर्शनपरम्परायां वेदानां वा उपनिषदां वा वादरायणविरचितस्य ब्रह्मसूत्रस्य व्याख्यानमाघारीकृत्य बहुविधानां वेदान्तानां प्रचलनमस्ति। यथा शाङ्करवेदान्तः, रामानुजवेदान्तः, माध्ववेदान्तः वाल्लभवेदान्तः, निम्बार्कवेदान्तः, श्रीचैतन्यवेदान्तः तथा स्वामिनारायणवेदान्तः।

सर्वप्रथमं भगवता जगद्गुरुणा शङ्कराचार्येण वैदिकं सिद्धान्तमाधारीकृत्य यस्य वेदान्तस्य प्रवर्त्तनं कृतम्, तादृशः वेदान्तः भवति अद्वैतवेदान्तः। तत्र जीवब्रह्मणोः ऐक्यं प्रतिपादितम्। ब्रह्मसत्यं जगन्मिथ्या इति अपि तत्त्वं संस्थापितम्। ततः परं वैदिकव्याख्यानमाधारीकृत्य भक्तितत्त्वप्रवर्त्तकेण जगद्गुरुणा श्रीरामानुजाचार्येण वादरायणब्रह्मसूत्रमाश्रित्य यस्य वेदान्तस्य प्रवर्त्तनं कृतम्, तादृशः वेदान्तः भवति विशिष्टाद्वैतवेदान्तः। ततः परं जीवब्रह्मणोः भेदमङ्गीकृत्य भगवता जग्गुरुणा मध्वाचार्येण ब्रह्मसूत्रानुसारं यस्य वेदान्तसिद्धान्तस्य प्रवर्त्तनं कृतं, तादृशः वेदान्तः भवति द्वैतवेदान्तः। ततः परं जग्गुरुणा भगवता वल्लभाचार्येण पञ्चदशशताब्द्यां उपनिषद्व्याख्यानं तथा ब्रह्मसूत्रनिर्यासमाश्रित्य यादृशस्य वेदान्तस्य प्रवर्त्तनं कृतं, सः वेदान्तः भवति शुद्धाद्वैतवेदान्तः। तथैव ततः परं हंससम्प्रदायसंस्थापकेन भगवता निम्बार्काचार्येण ब्रह्मसूत्रानुसारं यः वेदान्तः संस्थापितः, तादृशः वेदान्तः भवति द्वैताद्वैतवेदान्तः। ततः परं षोड़शशताब्द्यां भगवता श्रीचैतन्येन राधाकृष्ण-भक्तितत्त्वमाधारीकृत्य यादृशस्य वेदान्तस्य प्रवर्त्तनं कृतं, तादृशः वेदान्तः भवति अचिन्त्यभेदाभेदवेदान्तः। ततः परं एकोनविंशशताब्द्यां जगद्गुरुणा भगवता परंब्रह्मस्वरूपेण स्वामिनारायणेन ब्रह्म-परंब्रह्म- संसार-जीवादितत्त्वनि आधारीकृत्य यादृशस्य वेदान्तस्य वैदिकसिद्धान्तानुसारेण प्रवर्त्तनं कृतं, तादृशः वेदान्तः भवति अक्षरपुरुषोत्तमवेदान्तः।

स्वकीय वचनामृतग्रन्थे भगवता जगद्गुरुणा स्वामीनारायणेन परंब्रह्म-ब्रह्म-ईश्व-मायाप्रभृतीनां तत्त्वानां व्याख्यानं कृत्वा यः स्वकीयः सिद्धान्तः प्रदत्तः वा प्रवर्तितः, सः सिद्धान्तः भवति स्वामीनारायणवेदान्तः। आध्यात्मिकतत्त्वानुसन्धानप्रसङ्गे अथवा मोक्षप्राप्तिविषये आचार्यशङ्कररामानुजादिप्रवर्त्तितानां वेदान्त-सिद्धान्तानां प्रासङ्गिकता यथा विद्यते; तथैव जगद्गुरु-परब्रह्मस्वामिनारायणप्रवर्त्तितवेदान्तसिद्धान्तस्य विश्वव्यापिनी प्रासङ्गिकता विद्यते इति कथनं निष्प्रयोजनम्। अत्र उल्लेखनीयं यत् साम्प्रतिककाले अस्य स्वामिनारायण-प्रवर्त्तित-दार्शनिकसिद्धान्तस्य वेदान्तत्त्वं पुनः प्रतिपादयितुं परमपूज्येन आचार्यभद्रेशदासमहोदयेन यत् कृतं, तदेव अविस्मरणीयम्। वेदान्ततत्त्वस्य प्रतिपादनार्थं प्रायशः आचार्याः प्रस्थानत्रय्याः उपरि विश्वासं संस्थाप्य तस्याः व्याख्यानं कृत्वा स्वस्वसम्प्रदायाचार्याणां मतं वा सिद्वान्तं पुष्कलयन्ति। यथा जगद्गुरुणा आचार्यशङ्करेण वादरायणब्रह्मसूत्रस्य, श्रीमद्भगवद्गीतायाः तथा उपनिषदां व्याख्यानं कृत्वा वेदप्रवर्त्तितस्य अद्वैततत्त्वस्य पुष्टिं कृता, तथैव आचार्य्यस्वामिभदेशदासः ब्रह्मसूत्रस्य गीतायाः तथा उपनिषदां व्याखानं विधाय अक्षरपुरुषोत्तमवेदान्तस्य समृद्धिं कृतवान्। अतः परंब्रह्मस्वामिनारायणः यद्यपि अस्य वेदान्तस्य मूलप्रवर्त्तकः तथा तत् कृतः वचनामृतग्रन्थः मूलशास्त्ररूपेण अभिहितः, तथापि भारतीयदर्शनधारामनुसृत्य आचार्यभद्रेशदासमहोदयेन प्रस्थानत्रय्याः व्याख्यानं कृत्वा स्वामिनारायणवेदान्तस्य यत् संबर्धनं कृतं तत् असाधारणं विस्मयकरञ्च भवति। एतदर्थं स्वामिनारायणवेदान्तप्रवर्त्तकः वा संस्थापकः भारतीयदर्शनपरम्परायाः कृते यथा मान्यः भवति, तथा तादृशस्य वेदान्तदर्शनस्य संपोषकरूपेण भद्रेशदास तथा विश्ववन्द्यः भवति।

स्वामीनारायणः प्रथमे आश्रमे नीलकण्ठनाम्ना प्रसिद्धः। उत्तरप्रदेशे 1849 ख्रीष्टाब्दे लब्धजन्मा अयं शिशुः एकादशवर्षवयसि बालो भूत्वा गृहत्यागं विधाय समग्रं भारतवर्षं परिव्राजकरूपेण परिभ्रम्य अक्षरपुरुषोत्तमदर्शननाम्ना एकमभिनवं वेदान्तसिद्धान्तं प्रतिपादयितुं श्रीहरिसहजानन्दरूपेण स्वामिनारायणसम्प्रदायसंस्थापकोबभूव। तस्य दृष्ट्या स्वामी भवति साक्षात् मायातीय-गुणातीत-अक्षरब्रह्मस्वरूपः तथा नारायणो भवति अनन्तकोटिब्रह्माण्डपूर्णनियामकः परंब्रह्मस्वरूपः एवं व्याख्यानं वा मन्त्रम् स्वयं श्रीहरिसहजानन्दः एकस्यां सभायां स्वशिष्येभ्यः प्रदत्तवान्, इति हेतोः तस्य दर्शनस्य नाम

अक्षरपुरुषोत्तमदर्शनम् तथा तस्याऽपि परवर्ती नाम स्वामीनारायणः अपि सञ्जातम्। अतः स्वामि-नारायण-सिद्धान्तकारिकायाम् उक्तं यत्-

**श्रीहरिः सहजानन्दः स्वयमुपदिदेशयम्**

**स्वामिनारायणं मन्त्रं गर्भितं ब्रह्मविद्यया**

**अक्षरं ब्रह्म विज्ञेयं मन्त्रे स्वामीति शदितः**

**नारायणेति शब्देन तत्परः पुरुषोत्तमः॥**

परंब्रह्मस्वरूपस्य सहजानन्दस्य श्रीहरेः ब्रह्मस्वरूपाः स्वामीनारायणमन्त्रदीक्षिताः शिष्याः बभूवुः। तेषु पारम्परिकरीत्या दीक्षिताः पञ्चशिष्याः प्रमुखाः भवन्ति-

१. **गुणातीतानन्दः २. भगतजीमहाराजः ३. शास्त्रिजीमहाराजः ४. योगिजीमहाराजः ५. प्रमुखस्वामिमहाराजः।**

एतस्यां परम्परायां सम्प्रति विद्यमानाः ब्रह्मस्वरूपाः आचार्याः सन्ति महन्तमहाराजाः। सर्वे पञ्चब्रह्मस्वरूपाः आचार्याः सम्प्रति ब्रह्मलीनाः, ते तु सूक्ष्मशरीरेण स्वामिनारायणसम्प्रदायस्य पथप्रदर्शकरुपेण प्राणवन्तः सन्ति। प्रसङ्गेऽस्मिन् प्रमुखस्वामिचरणाष्टके एतेषां गुणातीतप्रभृतीनां पञ्चस्वामिनाम् उल्लेखं विदधता आचार्य हरेकृष्णशतपथिना उक्तम् यत्-

**"गुणातीतानन्दो भगतजिमहाराजचरणो**

**महाराजः शास्त्री, तदनु भुवि योगीजिपुरुषः**

**ततः श्रीब्रह्मश्रीः प्रमुखविबुधस्वामिचरणो**

**नमामस्तान् सर्वान् प्रमुखगुरुसंस्थाविजयताम्"**

एते सर्वे अक्षरस्वरूपाः ब्रह्मरुपाः आचार्याः भवन्ति; किन्तु श्रीहरिः सहजानन्दः वा स्वामीनारायणः साक्षात् परंब्रह्म पुरुषोत्तमः, अतः दर्शनस्य नाम अक्षरपुरुषोत्तमदर्शनम्। पुनः वेदान्तस्य नाम स्वामीनारायणवेदान्तः।

स्वामिनारायणवेदान्तानुसारेण पञ्चतत्त्वानि सन्ति। तानि भवन्ति-

१. परंब्रह्म, २. ब्रह्म, ३. ईश्वरः, ४. जीवः, ५. माया। अतः स्वामिनारायणदर्शने उक्तम्-

**जीवस्तथेश्वरो माया ब्रह्म परंब्रह्म च**

**नित्याः सत्याः सदैवेते मिथो भिन्नाः स्वरूपतः।**

**स्वामिनारायणेनैव पदार्थाः पञ्चकीर्तिताः**

**यज्ज्ञानात् कृत्स्नतां याति ब्रह्मविद्यापवर्गदा।।**

एवमपि जगद्गुरुणा आचार्यशङ्करेण प्रवर्त्तितः वेदान्तः। शङ्करेणप्रवर्त्तितत्वात् अयं वेदान्तः शाङ्करवेदान्तः। शङ्कराचार्यस्य जीवनयात्रा-नीलकण्ठस्य जीवनयात्रामध्ये बहु सामञ्जस्यं परिलक्ष्यते। किन्तु सिद्धान्ते तु किमपि वैषम्यमस्ति। शङ्करमतेन "एकमेवमद्वितीयं ब्रह्म"। सर्वं खल्विदं ब्रह्म। नेह नानास्ति किञ्चन। किन्तु स्वामिनारायणवेदान्तानुसारं ब्रह्मद्वयम् अस्ति। एकं ब्रह्म; अपरं परमं ब्रह्म। आचार्य भद्रेशमहाराजस्य ब्रह्मसूत्रस्योपरि व्याख्यानानुसारं यथा-

"अथातो ब्रह्मजिज्ञासा" इति सूत्रस्य व्याख्या भवति, तदा आचार्य्याः एवं व्याकुर्वन्ति यत्- अथ अतः ब्रह्मजिज्ञासा अर्थात् ब्रह्मणोः अर्थात् ब्रह्मणः एवं परंब्रह्मणः जिज्ञासा अत्र ब्रह्मसूत्रे ब्रह्मद्वयस्य विषये उल्लेखः अस्ति। यद्यपि अयं सिद्धान्तः माध्ववेदान्तस्य निकटवर्ती तथापि शाङ्करवेदान्तात् न दूरवर्ती। पुनः स्वामिनारायण सम्प्रदायेन- यदन्यत् तत्त्वत्रयं स्वीकृतं; तद्भति जीवः, ईश्वरः, माया। शङ्करेण यद्यपि एतदपि तत्त्वत्रयं अङ्गीकृतं तथापि ब्रह्म एकमेव तथा सर्वं तत्र अन्तर्भावितं भवति इति तेन प्रतिपादितम्। यद् भवतु स्वामिनारायणवेदान्तः प्रत्येकं तत्त्वम् एकैकस्वाधीनतत्त्वरूपेण अङ्गीकृत्य तन्मध्ये पारस्परिकसम्बन्धमपि स्थापयति। एतत्सर्वं विश्वस्य कल्याणाय, आध्यात्मिकतत्त्वप्रचाराय तथा आत्मनः मोक्षाय उद्दिष्टमिति कृत्वा स्वामिनारायणवेदान्तः स्वतन्त्रः सन् समग्रस्य विश्वस्य महत्कल्याणं साधयति।

## सहायकग्रन्थसूची


1. हरिकृष्णदास-गोयन्दका व्याख्याकारः, **वेदान्त-दर्शन**, गीताप्रेस, गोरखपुरम्, २००९ ।
2. डॉ. आद्यापसादमिश्रः सम्पादितम्, **वेदान्तसारः**, अक्षयवट-प्रकाशनम्, इलाहाबाद्, १९९९।
3. **श्रीमद्भगवद्गीता**, गीताप्रेस, गोरखपुरम्, २०२२ ।
4. डॉ. रमेशमहिपतरामदेवः, **स्वामिनारायण-वेदान्त-परिचयः**, स्वामिनारायण-अक्षरपीठम्, नई दिल्ली, २००४ ।
5. स्वामियोगिन्द्रानन्दः, **ब्रह्मसूत्रम् (शाङ्करभाष्यम्)**, भामतीव्याख्या, चौखम्बा-सुरभारती-प्रकाशनम्, २००५ ।

# Excellence of Similes in Karonā- kampa- Šatakam

Dr. Bipasha Das
Ex- Research Scholar
Visva- Bharati, Santiniketan

The employment of Upama or smile of poetry is famous in the Rig-Veda. Maharshi Välmīki developed it as an artistic poetic instrument in his Rāmāyaṇa. Kalidasa followed Välmīki and gave top priority to simile as a figure of speech easily understandable and enjoyable by the readers. In the modern Sanskrit literature Sanskrit poets have discover its power in describing objects in poetry. In the post-modern period the poetic ornaments in general are not accepted as the products of constant effort. As the first post-modern poet A.R. Mishra has employed similes without any effort. His smiles are spontaneous and yet effective. In the present attempt we wish to analyse his art of similes as found in his first sataka -poetry Karonā kampa Šatakam.

Besides this Śataka - Kāvya A. R. Mishra (ARM) has four more collections of post- modern Sanskrit poetry. They are Tava Jabādhara- manmaya-rekhasu(2018), Netraprānte nispandasamayah (2019), Sunye Meghagānam (2021) and Kajjala-Sürye' rdhadśyāh (2023).

Simile is well defined by the rhetoricians as-

**साम्यं वाच्यमवैधर्म्य वाक्यैक्य उपमा द्वयोः ।। (Sahityadarpaṇa, Pariccheda-X, śloka14)'.**

So we need not go into its chracteristics. We simply discuss the artistic beauty of the similes in this postmodern Šataka.

During the Carona pandemic people were mad for tablets and injections and also for the assurance of doctors. Their activity is seen by the poet like that of mad-men-

**जना उन्मत्ता इव क्रीणन्ति वटिकाः टीकाः,**
**उद्विग्न-वैद्यस्य मुखचन्द्रिकाः ।** (stnz.2)2

The mental states of worried people are compared with that of mad man.

Birth of infants is described by the poets as if they are shadows propelled by the force of wind. So, they come and go like shadows in the situation of the pandemic-

**पवनचालितच्छाया इव पुत्रा आगच्छन्ति, गच्छन्ति।**

**वक्षः स्यूतकेषु तेषां वृथा सिक्ताक्षराणां पदानि।।** (stnz.2)3

Afraid of the infliction of Corona, people who were labourers in different parts of the country started walking towards their homes in far places. But ultimately, they fell down on the road sides. Poet equates them with the leafless thorny dry plants-

**पदस्खलिता जनास्तथैव मार्गपार्श्वे पतिताः**

**यथा पत्रहीनाः शुष्ककण्टकवृक्षाः।।** (stnz.12)[4]

In order to describe the cruelty of Corona lady, the poet equates her anklets with the chain of blood streams-

**पश्य पश्य, सा देवी गच्छतिबहिर्वाटिकाद्वारे त्यक्त्वा**

**रुधिरशृङ्खलमिव तस्याः पादयोर्नूपुरम्।।** (stnz.20)[5]

Chain of blood is a very new standard of comparison.

A lady is described at her moment of death. Her body was still beautiful just as a morning is beautiful with colorful flowers. Her eyes as blue as water now look like white sky. She sleeps on the bed as if she is placed there by others-

**वर्णिलप्रभात इवासीत्तस्या देहः।**

**जलनीलनयने इदानीं दृश्येते यथा**

**शुभ्राकाशः। सा तथैव शायिता यथा**

**शयने स्थापिता।।** (stnz.21)[6]

Eyes blue like water has a beautiful image inside this simile.

The beloved friend of that lady was standing at a distance like a palm tree without any movement.

**तालवृक्ष इव दूरे दण्डायमानः**

**निर्जीवनयनः प्रेमिकः ।।** (stnz.23)[7]

Lifeless eyes is an expression that supports the simile here.

The goblin who is described as the husband of the witch Corona is also very cruel. He chews up the faith in life grown in the hearts of people like sugarcane sticks.-

**इक्षुदण्डमिव खादति पिशाचः**

**हृदयस्य पुष्पितविश्वासम् ।।** (stnz.31)[8]

The expression blossomed faith gives an artful support to the present simile.

His false words constantly dance inside his eyelids like the rain of water.

The laughter of this goblin is like the blood smeared face of a violent whale-

**हिंस्रतिमिमत्स्यस्य रुधिराक्तमुखमिव तस्य हासः ।।** (stnz.53)[9]

Here the cruelty in the laughter of the goblin is represented by an artistically sound simile.

The influence of Corona was so frightening that people, ambulance vehicles, oxygen vehicles and doctors and nurses in white dresses are running here and there like ants-

**भूतले पिपीलिका इव धावन्ति जनाः, रोगयानानि, अम्लयाननौकाः, श्वेतवस्त्रपरिहिताः जीवनरक्षकाः ।.** (stnz.35)[10]

The situation is realistically picturised by svabhāvokti hidden under the stanza.

In one place the moon is described as a broken Chinese bowl-

**भग्नचीनापात्रमिव चन्द्रोऽनुसन्धत्ते**

**पलायनेऽधिष्ठितां जीवन्मुक्तिम्** (stnz.51)[11]

Kalidasa may have brought in cīnāmśuka in Šakuntalam. But a broken Chinese bowl is a very modern upaä.

The poet compares the bank of a silent with a dead conch shell. He also compares the cruel time with the axe used for killing animals. Such standards of comparison are very new and thought-provoking-

**तत्रापि परित्यक्तो बालुकागर्भितो मृत-**

**शङ्ख इव नीरवितस्तटः।**

**पशुहन्ता कुठार इव निर्ममः समयः।** (stnz.55)[12]

Due to the aggression of Covid-19 people are sometimes afraid, sometimes hopeful of cure and some other times are extremely sad at the death of any dear one. All these feelings appear and disappear at their faces. Therefore A.R.M compares their faces with flowing water which constantly changes its shape and sound-

**चलज्जलमिव लोकानां मुखम्। तत्र कोऽपि कापालिको विसृजति कोटिशः जीवन्नरकपालान्। सम्पर्केषु ज्वलति वाडवाग्निः। विस्फोरितानामिच्छानामस्थीनि पतितानि सर्वत्र, सर्वत्र हलाहलमुत्तिष्ठति नीलधूमवेशि।।** (p.36,stnz.62)[13]

Sea-fire burning in relationship, bones of desire blasted and shattered and blue smoke of prison rising everywhere etc. adorn the atmosphere of simile.

In one place the poet describes the smoke balls floating in the air like butterflies moving around-

**अग्रे दृश्यन्ते आकाशो बहवो विभागः।**

**चित्रपतङ्गा इव डयन्ति**

**हस्तपादहीना धूमपिण्डाः।।** (stnz 70)[14]

The smoke- balls without hands and feet support the simile as the symbol of beautiful and dangerous destruction. He also compares the ill- intended touches with hot water both giving pain in the body of women-

देहस्य बन्धुरतायामुपलस्तूपाः

यत्र प्रसरन्ति तप्तजलमिव असत्स्पर्शाः ।। (p.38,stnz.78)[15]

Here the mounds of stones become an image of the feminine body, which bolsters the simile.

The re-appearance of the body is compared to that of foenix bird which re-appears after death-

शरीरं पुनराविर्भवेत् फिनिक्स्-पक्षीव। (stnz 93)[16]

The songs of wood are like the songs of misfortune which the trees used to sing at bad time. Just as a tea-serving boy in a canteen comes and goes once and again, so also does the rotating time. Hence the poet compares time with that boy-

त्यक्तपरागाणि काष्ठानि

दौर्भाग्यं गीतमिव गायन्ति।

श्मशानमल्लाः किमपि न श्रोतुमिच्छन्ति।

समयः चायपरिवेषक इव

आगच्छति, गच्छति।। (stnz. 103, pp-48-49)[17]

Singing misfortune as if a song is a poetic fancy or Utprekșä which enriches the simile appearing next.

A sea crane is compared with a body less soul. The falling leaves of a shal- tree is compared with the love letters of the past-

देहहीन आत्मा इव मराली उपविष्टाऽस्ति

पतितशालवृक्षस्य सिक्तकरतले।

अतीतस्य मदनपत्राणीव पत्राणि

अन्यमनस्कं पतन्ति तस्याः

**नष्टबोधतले, नष्टतारिकासु, नष्ट –**

**वाटिकाया भग्नचन्द्रालोकित-भूतले ।**(stnz. 111)[18]

A.R.M is very proficient in projecting 'Mālopamā or chain of similes to describe a particular situation. The beauty of this technique really charms the readers with constant provision of similes. In one place the body of the heroine is described like a colorful morning. Her eyes as blue as water looks like the white sky. She is sleeping as if placed to the state of slumber by others-

**वर्णिलप्रभात इवासीत्तस्या देहः ।**

**जलनीलनयने इदानीं दृश्येते यथा शुभ्राकाशः ।**

**सा तथैव शायिता यथा शयने स्थापिता ।**

**न श्रृणोति वर्षाकालं पक्वजम्बुफलं लितश्वानम् ।।** (stnz.21)[19]

Here similes supported by poetic fancy generate a rare poetic delight.

In another place, the Hero is being described as a strong and fragrant sandal tree. He is grave and generous like an ocean. He was like a floating cloud and enters into the heart of the heroine like an attractive picture-

**सा एकदा सलज्जं सूचितवती माम् -"त्वं चन्दनवृक्ष इव बलिष्ठः सुवासितः समुद्र इव गम्भीर उदारश्च । धावन्मेघ इव त्वं चलसि चित्रमिव च हृदये प्रविशसि ।"** (Stnz.91) [20]

The rain of beautiful and fresh similes here really pleases the heart of readers.

Life is compared with Yama and with the sober past and with a silent flower-

**गृहे निरीहमत्स्यानां निःश्वासगतिः**

**परिवर्त्तिता । शवाधारयानं**

**मार्गभ्रष्टम् । जीवनं यद्**

**यम इव प्रतिभाति स्म, अद्यानुभूयते**

**यथा निरहङ्कारमतीतम्, भाषाहीनं पुष्पम्।।** (Stnz.102) [21]

Here Yama is a part of simile. It is enriched by two fancies-past and flower that describe life.

A.R. Mishra is felt by readers as a post-modern poet who has extremely impressive and pleasing themes, expressions and figures of speech. By taking the examples of similes from his Karonākampaśatakam. We find that he has a rare ability of choosing un-traditional standards of comparison.

## References:


1. Sahityadarpana, X paricched, sloka 14.

2.Karonākampaśatakam, Aruna Ranjan Mishra, Sashibhusan Mishra (Ed.), The Banaras

Mercantile Co. (Pub.), 2023(1SE edn.) p.17.

3. ibid, p.17

4. ibid, p.20.

5. ibid., p.23.

6. ibid, pp.23-24,

7. ibid, p.24.

8. ibid.p.26.

9. ibid, p.34.

10. ibid, p.27.

11. ibid, p.33.

12. Ibid., p.34.

13. ibid, p.36.

14. ibid, p.38.

15. ibid, p.41.

6. ibid, p.45.

17. ibid, pp.48-49.

18. ibid, p.51.

19. ibid, pp.23-24.

20. ibid, p.45.

21. ibid, p.48.

## Bibliography

1.Mishra, Aruna Ranjana, Tava Jabadharamanmayarekhasu, Kolkata, The Benaras Mercantile Co., 2018, (1st Edn,)

2.Mishra, Aruna Ranjana, Netraprante Nispandasamah, Kolkata, The Benaras Mercantile Co., 2019, (1 Edn.)

3. Mishra, Aruna Ranjana, Sunye Meghaganam, Delhi Pankaj Pustak Mandir, 2021(1st Edn.).

4. Mishra, Aruna Ranjana, Karona-kampa-śatakam, Kolkata, Benaras Mercantile Co.,2023. (1st Edn.).

5. Mishra, Aruna Ranjana, Contemporary Sanskrit Writings in Orissa, Delhi: Pratibha Prakashan, 2006.

6. Mishra, Sashibhusan, (Ed.). Post-Modern Poet: A. R. Mishra, Kolkata: The Banaras Mercantile co., 2021.

# श्रीमद्भगवद्गीतायां पुरुषोत्तमयोगः

डॉ. राजश्रीदाशः
श्रीजगन्नाथसंस्कृतविश्वविद्यालयः
श्रीविहारः, पुरी

श्रीमद्भभगवद्गीता स्वयं पद्मनाभस्य मुखनिःसृतवाणी तथा सर्वोपनिषदां सारभूतोऽयं ग्रन्थः। समग्रेऽस्मिन्विश्वसाहित्ये श्रीमद्भगवद्गीतायाः स्थानमतीव महत्त्वपूर्णम् अद्वितीयं वन्दनीयं च वर्तते। यतो हि इयं साक्षात् भगवता श्रीमुखारविन्दात् परमरहस्यमयी अमृतवाणी अस्ति। नन्दनन्दन-गोपालनन्दन-गोलकाधीश्वर-राधाहृदयवल्लभ-श्रीकृष्णचन्द्रः अर्जुनं निमित्तं कृत्वा संसारेऽस्मिन् जायमानेषु विविधेषु क्षेत्रेषु जीवानां निरन्तरकल्याणप्राप्तये उपदेशं प्रददौ। ग्रन्थेऽस्मिन् तादृशाः विलक्षणभावाः सन्निवेशिताः सन्ति यस्यान्तः एतावत्पर्यन्तं कोऽपि न प्राप्तवान्। अतः गीता न केवलम् उपनिषदामेव अपि तु समग्रस्यापि वाङ्मयस्य सारोऽत्र दरीदृश्यते। यथोच्यते –

**सर्वोपनिषदो गावो दोग्धा गोपालनन्दनः।**
**पार्थो वत्सः सुधीर्भोक्ता दुग्धं गीतामृतं महत्।।**[1]

श्रीमद्भगवद्गीताशास्त्रं न केवलं आध्यात्मिकं शास्त्रम्, अपि तु उपनिषद्ब्रह्मसूत्रादित्रिषु प्रस्थानग्रन्थेषु अत्यन्तमहत्त्वपूर्णग्रन्थोऽयं वर्तते। यतो हि उपनिषद्-ब्रह्मसूत्राणां सारतत्त्वानि अत्रान्तर्भुक्तानि। सकलोपनिषदग्रन्थाणां सारं गीतातत्त्वम् उपनिषदग्रन्थेष्वपि गुरुत्वपूर्णं विद्यते। यथा कार्ये कारणस्यापेक्षया गुणः निहितोऽस्ति। सर्वेऽपि दार्शनिकग्रन्थाः गीतायाम् अन्तर्भुक्ताः सन्ति किन्तु गीता कस्याऽपि दर्शनस्यान्तर्भुक्तं न भवति। दर्शनशास्त्रं जीव-जगद्ब्रह्मसम्बन्धे प्रशिक्षयति किन्तु गीता केवलं तं न प्रशिक्षयति अपि तु अनुभवं कारयति। गीता जीवानां कल्याणपक्षस्य समर्थनं करोति। गीतायां भगवान् साधकं समग्रपरमात्मनं प्रति अग्रसरं कारयति परमेश्वरं प्रति अग्रसारयति अतः शरणागतिः गीतायाः प्रारम्भः अन्तिमश्च।

गीतायाः भाषाशैली मनोरमा, प्रसादगुणोपेता च भवति। अस्याः अध्ययनेन मानवः समस्तमर्थम् अवगन्तुं शक्नोति। समग्रे संसारे सर्वशास्त्रमयी गीता एकमेव शास्त्रं देवकीपुत्रगीतम् इत्यादिवचनैः प्रमाण्यते यद् गीतायां सकलशास्त्राणां तत्त्वानि उपलभ्यन्ते। सा एव श्रीमद्भगवतगीता भारतीयसंस्कृतेः आधारभूता सारभूता च। इयं गीता सर्वेषां मुक्तिपथं प्रदर्शयति। यथोक्तम् –

**एकं शास्त्रं देवकीपुत्रगीतमेको देवो देवकीपुत्र एव।**
**एको मन्त्रस्तस्य नामानि यानि कर्माप्येकं तस्य देवस्य सेवा।।**[2]

संसारोऽयं कश्चित् अश्वत्थवृक्षसमो वर्तते। यस्य मूलं श्रीपुरुषोत्तमः यत् ऊर्ध्वस्थितं विद्यते। कार्योपाधयः हिरण्यगर्भादयः तस्य शाखाः अधः वर्तन्ते। तस्य पात्राणि वेदाः सन्ति। एतादृशः अश्वत्थवृक्षः नश्वरोऽपि प्रवाहवत् अनश्वरः अपि च तदेवं यः सम्यक् वेत्ति स वेदार्थज्ञानी भवति। इत्युक्तं भगवता –

**ऊर्ध्वमूलमधःशाखमश्वत्थं प्राहुरव्ययम्।**
**छन्दांसि यस्य पर्णानि यस्तं वेद स वेदवित्।।**[3]

अत्र 'ऊर्ध्वमूलम्' इति पदेन परंब्रह्म 'अधः शाखम्' इति पदेन सकलजीवानां प्रतिनिधिस्वरूपः ब्रह्मदेवः तथा च 'अश्वत्थम्' इत्यनेन पदेन 'समग्रसंसारश्च' सूच्यन्ते। संसाररूपक-अश्वत्थवृक्षस्य मूलं सर्वशक्तिमन्तं भगवन्तं यथार्थरूपेण यः ज्ञातवान् स एव 'वेदवित्' अस्तीति भगवता निगदितम्। सामान्यतः 'अश्वत्थम्' इति पदस्य द्वौ अर्थौ भवतः। यथा- 'श्वः' पर्यन्तं न तिष्ठतीति अश्वत्थः। 'श्वस्' अव्ययपदम् अग्रीमदिवसस्य सूचकः अर्थात् यत् आगामिदिवसपर्यन्तं सुस्थिरं भवति तत् 'श्वत्थम्' एवमत्र यत् अग्रीमदिवसपर्यन्तं सुस्थिरं न भवति तत् 'अश्वत्थम्' इत्युच्यते।'अव्ययम्' संसारवृक्षोऽयम् अव्ययपदवाच्यः अर्थात् क्षणभङ्गुर- अनित्यसंसारस्य आद्यन्तं न ज्ञायते, किन्तु निरन्तर-प्रवाहात् तथा तस्य मूलं सर्वशक्तिमान् परमेश्वरः नित्यमविनाशी सकाशात् तत् 'अव्ययम्' इति कथ्यते। यद्यपि संसारोऽयं निरन्तरं परिवर्त्तते तथापि तस्य तत्र किञ्चदपि व्ययं न भवति अर्थात् समाप्तं न भवति।

यथा समुद्रे असंख्यलहर्य्यः भूत्वा अपि तत्र जलस्य परिमाणः सर्वदा समान एव तिष्ठति तथैव संसारेऽस्मिन् निरन्तरं परिवर्तनं दृश्यते तथापि तत् अव्ययम् इति।

अश्वत्थवृक्षस्यास्य हिरण्यगर्भादयः याः शाखाः पल्लवाः ऊर्ध्वमधश्च व्याप्ताः सन्ति। अधश्च कर्मानुसारिणः जीवाः अवान्तरमूलानि यानि वृक्षस्य उपरि अधश्च विमुखं प्ररूढानि, अस्य अश्वत्थवृक्षस्य ऊर्ध्वमूलत्वादिकं यत्स्वरूपं पूर्वमुक्तं तत् केनापि ज्ञातुं न शक्यते तथास्य आदिमध्यान्तश्च ज्ञातुं न शक्यते। तादृशमेनम् अनिष्टफलजनकम् अश्वत्थवृक्षं जगद्वृक्षं वा वैराग्ययुक्तशस्त्रेण ज्ञानासिना छित्वा ततः पुरुषाः तं परमपुरुषं ध्यायन्तः तादृशं स्थानं शोधयेयुः यत्स्थानं संप्राप्ताः पुनः न संसारं प्राप्नुवन्ति, यस्मादेव च अयमनादिः संसारः सम्पन्नो वर्तते।

**अधश्चोर्ध्वं प्रसृतास्तस्य शाखा गुणप्रवृद्धा विषयप्रवालाः।**
**अधश्च मूलान्यनुसन्ततानि कर्मानुबन्धीनि मनुष्यलोके।।**
**न रूपमस्येह तथोपलभ्यते नान्तो न चादिर्न च सम्प्रतिष्ठा।**
**अश्वत्थमेनं सुविरूढमूलमसङ्गशस्त्रेण दृढेन छित्त्वा।।**
**ततः पदं तत्परिमार्गितव्यं यस्मिन्गता न निवर्तन्ति भूयः।**
**तमेव चाद्यं पुरुषं प्रपद्ये यतः प्रवृत्तिः प्रसृता पुराणी।।**[4]

अत्र 'विषयप्रवाला' इति पदस्य तात्पर्यं सामान्यतः विषयचिन्तनशीलः मनुष्यः अस्मात्संसारसागरात् सम्बन्धविच्छेदः सम्भवः न भवति इति भावः। अपि च अन्तकाले मनुष्यः यं यं भावं चिन्तयित्वा शरीरं त्यजति स तादृशं भावानुसारं शरीरं प्राप्नोति इति।[5] वस्तुतः कोमलपत्रसदृशं विषयजालमपि अत्यन्तं सुन्दरं दृश्यते फलतः मनुष्यः तस्याकर्षणेन आकर्षितः भवति। यदि मनुष्यः स्वविवेकेन तस्य परिणामं दुःखं नाशवत्वम् इत्यादि विचिन्त्य त्यजति[6] तदा माया तस्य स्पर्शं न करोतीति भावः। एवमेव दोषेष्वपि विषयदोषः कृष्णसर्पविषदोषादपि तीव्रतरोऽस्ति। यतो हि विषं केवलं विषभक्षकं जनं नाशयति किन्तु दर्शनशीलं जनं विषयः न त्यजति यथोच्यते विवेकचूडामणौ –

**दोषेण तीव्रो विषयः कृष्णसर्पविषादपि।**

**विषं निहन्ति भोक्तारं द्रष्टारं चक्षुषाप्ययम्।।**[7]

प्रथमे श्लोके प्रयुक्तम् 'ऊर्ध्वमूलम्' इति पदं संसारस्य रचनाकारं तथा च तस्य मूलाधारं परमात्मानं सूचयति, किन्त्वत्र द्वितीये श्लोके 'मूलानि' इति पदं संसारेऽस्मिन् मनुष्यं यत् ममताकामनासक्तमेव सूचयति। अतः साधकः ममता-कामनारूपकमूलस्य छेदनं कृत्वैव ऊर्ध्वमूलं परमात्मानं आश्रयेदिति भावः।

'असङ्गशस्त्रेण दृढेन छित्वा' अस्मिन् पदे छित्वा इति पदं छेदनार्थे विनाशार्थे वा प्रयुक्तम्। अपि संसारं प्रति योऽनुरागो विद्यते तस्य सम्पूर्णमूलोत्पाटनं सम्बन्धविच्छेदः कारणम् इति भावः। वस्तुतः संसारस्य सत्ता बन्धनकारकः न किन्त्वत्र रागपूर्वकस्थितसम्बन्धः बन्धनकारकः अस्तीति। संसारोऽयं नित्यनिवृत्तः अतः तं त्यजेत् 'असङ्गशस्त्रेण दृढेन छित्वा' एवमेव भगवान् नित्यप्राप्तः तदर्थं सः अन्वेषणीयः 'ततः पदं तत्परिमार्गतव्यम्' इति। भगवान् नित्यप्राप्तः स्वतःसिद्धः न निर्मीयते अपि तु न अन्वेषणं क्रियते। अपरश्च त्यागशब्दस्यार्थः यस्य महत्त्वं सत्तादयः न स्वीक्रियन्ते अथवा शीघ्रतापूर्वकं सम्बन्धस्थापनं न करणीयम्। अत एव संसारस्य त्यागे भगवतः परमात्मनः अन्वषणं निहितम्। तदर्थं भगवता साक्षात् भणितं 'मद्भक्ति लभते पराम्'।[8] अर्थात् संसारात् विच्छेदात्परं परमात्मनः अन्वेषणं कृत्वा तस्य शरणापन्नं भवितव्यमिति।

ये मोहाभिमानविवर्जिताः, येषु विषयासक्तिरूपं कश्मलं नास्ति, ये सर्वदा आत्मध्याने निरताः, येषां विषयेषु मोह-तृष्णाः नष्टाः, ये सुखदुःखयोः मानापमानयोश्च निर्विकाराः सन्ति तादृशाः विवेकवन्त-धीर-मनुष्याः इमम् अश्वत्थवृक्षं विनाश्य तदव्ययं पदं प्राप्तुम् अर्हन्ति।

**निर्मानमोहा जितसङ्गदोषा अध्यात्मनित्या विनिवृत्तकामाः।**

**द्वन्द्वैर्विमुक्ताः सुखदुःखसञ्ज्ञैर्गच्छन्त्यमूढाः पदमव्ययं तत्।।**[9]

जितसङ्गदोषाः इत्यस्य पदस्य सामान्यतः ये जनाः आसक्त्युपरि विजयिनः सन्ति अत्र किं नाम प्रेम भगवन्तं प्रति आकर्षणं प्रेमपदवाच्यम्। एवञ्च आसक्तिः संसारं प्रत्याकर्षणं तथा आसक्तिकारणात्स्पृहा- आशेत्यादयः अत्यधिक यद्दोषाः समुत्पद्यते तदेव आशक्तिः उच्यते। भगवत्परायणानां भक्तानां सांसारिकभोगं प्रति आसक्तिः न भवेदिति।

यत् पदं न आदिदेवः सूर्यः प्रकाशयितुं शक्नोति, न चन्द्रः, नापि अग्निः यत्प्राप्तश्च पुरुषः पुनः न संसारक्लेशमनुभवति तदेव मम परमं धाम वर्तते। यथा-

**न तद्भासयते सूर्यो न शशाङ्को न पावकः।**

**यद्गत्वा न निवर्तन्ते तद्धाम परमं मम।।**[10]

विषयेऽस्मिन् कठादिविभिन्नोपनिषद्ग्रन्थेष्वपि प्रतिपादितमस्ति –

**न तत्र सूर्यो भाति चन्द्रतारकं नेमा विद्युतो भान्ति कुतोऽयमग्निः।**

**तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति।।**[11]

इत्यतिरिच्य श्रीमद्भगवद्गीतायां त्रिषु स्थानेषु भगवान् श्रीकृष्णः साक्षात् उक्तवान् -

1. **यं प्राप्य न निर्वत्तन्ते तद्धाम परमं मम।**[12]
2. **ततः पदं तत् परिमार्गितव्यं यस्मिन् गता न निवर्तन्ति भूयः।**[13]
3. **यद् गत्वा न निवर्त्तन्ते तद्धाम परमं मम।**[14]

योऽयं संसारः तत्र जीवः ममैव चिरन्तन कश्चित् अवयवः। यद्यपि सुप्तौ प्रलये च तस्य मयि लयो वर्तते तथापि मायाशालित्वात् सगुणे एव मयि लयः, न तु माया सम्बन्धराहित्यात् निर्विशेषे ब्रह्मणि ततश्च सुषुप्तौ प्रलये वा समाप्ते पुनः संसाराय निर्गच्छन् सः कर्मवशात् शरीरं प्राप्नुवन् भोगार्थं मनः प्रधानानि सर्वाण्यपि इन्द्रियाणि प्राप्नोति।

यथा–

**ममैवांशो जीवलोके जीवभूतः सनातनः।**

**मनःषष्ठानीन्द्रियाणि प्रकृतिस्थानि कर्षति।।**[15]

सुषुप्तौ प्रलये वा समाप्ते सविशेषे ब्रह्मणि लीनः जीवः पूर्वस्मात् शरीरात् निर्गत्य स्वकर्मवशात् शरीरान्तरं यदा प्राप्नोति तदा वायुः पुष्पात् गन्धमिव पूर्वस्मात् शरीरात् सर्वाण्यपि इन्द्रियाणि गृहीत्वैव शरीरान्तरं प्रविशति। ततश्च सविशेषे ब्रह्मणि लीनस्येव संसारं प्रति पुनरागमनम्, न पुनः उपाधिभूतस्य शरीरस्य अनाशात् निर्विशेषे ब्रह्मणि लीनस्य इति मन्तव्यम्।

**शरीरं यदवाप्नोति यच्चाप्युत्क्रामतीश्वरः।**

**गृहीत्वैतानि संयाति वायुर्गन्धानिवाशयात्।।**[16]

शरीरान्तरं प्रविष्टोऽयं जीवः श्रवणं नेत्रं त्वचं जिह्वां नासिकां चित्तं कर्मेन्द्रियाणि च आश्रित्यैव शब्दादीन् अनुभवति।

**श्रोत्रं चक्षुः स्पर्शनं च रसनं घ्राणमेव च।**

**अधिष्ठाय मनश्चायं विषयानुपसेवते।।**[17]

पूर्वं शरीरं विहाय शरीरान्तरं गच्छन्तं तच्छरीरे तिष्ठन्तम् इन्द्रियैः विषयान् अनुभवन्तं वा एनं जीवं मूढाः अविवेकिनः वा न कदापि ज्ञातुं शक्नुवन्ति। ज्ञाननेत्राः तं पुनः अवश्यं ज्ञातुं शक्नुवन्ति।

**उत्क्रामन्तं स्थितं वापि भुञ्जानं वा गुणान्वितम्।**

**विमूढा नानुपश्यन्ति पश्यन्ति ज्ञानचक्षुषः।।**[18]

ध्यानादिभिः सतत-समाहितचित्ताः ज्ञानिनः देहे वर्तमानमिमं द्रष्टुं शक्नुवन्ति। किन्तु शास्त्रादिभिः प्रयतमाना अपि कश्मलचित्ताः देहे वर्तमानमपि इमं द्रष्टुं न शक्नुवन्ति।

**यतन्तो योगिनश्चैनं पश्यन्त्यात्मन्यवस्थितम्।**

**यतन्तोऽप्यकृतात्मानो नैनं पश्यन्त्यचेतसः।**[19]

सूर्ये चन्द्रे अग्नौ च वर्तमानं यत् तेजः जगत् भासयते तन्मम तेजः इति जानीहि।

**यदादित्यगतं तेजो जगद्भासयतेऽखिलम्।**

**यच्चन्द्रमसि यच्चाग्नौ तत्तेजो विद्धि मामकम्।।**[20]

अहं धूलिराशितुल्याम् इमां पृथिवीं दृढीकुर्वन् स्वशक्त्या चराचरयुक्तानि भूतानि धारयामि। अन्यथा सिकताराशिवत् इयं पृथिवीं विच्छिद्येत। एवमेव अहं रसस्वरूपः चन्द्रः सन् पृथिव्याम् अत्र जायमानानि सर्वाण्यपि व्रीहिमाषमुद्गादीनि संवर्धयामि इति।

**गामाविश्य च भूतानि घारयाम्यहमोजसा।**

**पुष्णामि चौषधीः सर्वाः सोमो भूत्वा रसात्मकः।।**[21]

चेतनाः यदन्नं खादन्ति तद् भक्ष्यं भोज्यं लेह्यं चोष्यं चेति चतुर्विधं वर्तते। तत्र अपूपादि भक्ष्यम्, पायसादि भोज्यं, गुडादि लेह्यम्, इक्षुदण्डादि च चोष्यमिति। चेतनानाम् इदं चतुर्विधम् अन्नम् अहं जठराग्निः भूत्वा प्राणवायुं अपानवायुमवलम्ब्य सम्यक् जीर्णीकरोमि। वस्तुतः प्रकारभेदेषु प्राण-अपान-समान–उदान-व्यान-नाग-कूर्म-कृकर-देवदत्त-धनञ्जयप्रभृतयः दशप्रकाराः वायवः भवन्ति। (1) एतेषु प्राणवायुः हृदि निवसति। एतस्य मुख्यकार्यं शरीरात् नासिकाद्वारा श्वासस्य बहिर्निर्गमनं तथा भक्षणद्रव्यं जीर्णादि कार्याणि।(2) द्वितीयम्– अपानवायुम्, एतस्य स्थानं गुह्यद्वारम्, एतेन वायुम् अभ्यन्तरं गच्छति, अपि च एतस्मात् कारणात् मल-मूत्रं बहिर्निगच्छति, गर्भविमोचनं भवति।(3) तृतीयम्– समानवायुम्, अस्य निवासस्थानं शरीरस्य नाभिदेशे कार्यस्यास्य जीर्णद्रव्यस्य सारांशः रसश्च शरीरस्य प्रत्येकऽस्मिन्

भागे स्थापनीयमिति। येन शरीरमिदं स्वस्थः सम्यक् संचालितं भवति।(4) उदानवायुम्– निवासस्थानस्यास्य कण्ठप्रदेशे एतस्य कार्यं भोजनकाले एतस्मात् कारणात् कठिनतरलपदार्थयोः पृथक् भवति। सूक्ष्मशरीरं स्थूलशरीरात् भिन्नं कृत्वा अन्य लोकं नीत्वा भिन्नशरीरं प्रददाति। (5) व्यानवायुम्- इदं शरीरस्य सर्वस्मिन् स्थाने निवसति एतस्मात् सकाशात् शरीरस्यावयवानि संकोचितं प्रसारितं भवति।(6) नागवायुम्- एतस्मात् कारणात् अम्लढकारं शरीरात् निर्गच्छति। (7) कूर्मवायुः– चक्षुसमुद्रघाटनं निर्वापणम् तस्य कारणात् क्रियते। (8) कृकरवायुः– अस्य सकाशात् क्षुवणं भवति। (9) देवदत्तवायुः– अस्य कारणात् जृम्भा भवति। (10) धनञ्जयवायुः– इदं शरीरस्य मृत्युपरमपि शरीरे तिष्ठति तस्मात् मृतशरीरस्य भारमत्यधिकं भवति। वस्तुतः एक एव प्राणवायुः तस्य विभिन्नानि कार्याणि भवन्ति।

अत्र भगवदा निगदितं जीवानाम् उदरे जठराग्निरूपे व्यवस्थितं भूत्वा तेषां भक्ष्य पदार्थं जीर्णं करोमि। अर्थात् शरीरे भक्ष्यपदार्थानां जीर्णता मम शक्त्या भवति। परन्तु मनुष्यः सर्वम् अहं करोमीति वृथाभिमानं करोति।

**अहं वैश्वानरो भूत्वा प्राणिनां देहमाश्रितः।**

**प्राणापानसमायुक्तः पचाम्यन्नं चतुर्विधम्।**[22]

अहं समेषां हृदये तिष्ठामि। मत्तः एव स्मृतिः ज्ञानम् अपोहनं च भवति। सकलैः वेदैः च अहम् एव ज्ञेय-तत्त्वम्। वेदतत्त्वनिर्णायकः, वेदान्तकृत् वेदवित् चास्मि। वस्तुतः हृदयं शरीरस्य मुख्याङ्गं वर्तते। समस्तप्रकाराः भावाः तत्र एव उदिताः भवन्ति। अपि च प्रत्येकस्मिन् कार्ये भावस्य प्राधान्यं स्यात्। सकलानि कार्याणि भावशुद्ध्याशुद्ध्यानि भवन्ति। अतः वस्तु-क्रियाऽपेक्षया भावस्य महत्त्वमधिकं भवति, भावोऽयं हृदि प्राकाशितं भवेत् तदर्थं हृदयस्य महत्त्वमधिकमस्ति एवं हृदयं सत्त्वगुणस्य कार्यं विद्यते अतः भगवता साक्षात् निगदितं “सर्वस्य चाहं हृदि सन्निविष्टः” इति। विषयेऽस्मिन् मुण्डकोपनिषद् कथयति – जीवात्मा परमात्मा परस्परं सखायौ समौ सर्वदा एकस्मिन् स्थाने द्वौ विहगसदृशौ निवसतः। अर्थादत्र शरीरं माध्यमं

कृत्वा वसतः। अनयोर्मध्ये जीवात्मा उक्तवृक्षस्य कर्मफलस्य स्वादग्रहणं कृत्वा उपभोगं करोति अपरश्च (परमात्मा) तं सर्वम् उपभोगं न कृत्वा केवलं द्रष्टा एव पश्यति। यथा –

**द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते।**

**तयोरन्यः पिप्पलं स्वाद्वत्यनश्नन्नन्यो अभिचाकशीति।** [23]

**सर्वस्य चाहं हृदि सन्निविष्टो मत्तः स्मृतिर्ज्ञानमपोहनं च।**

**वेदैश्च सर्वैरहमेव वेद्यो वेदान्तकृद्वेदविदेव चाहम्।।**[24]

अस्मिन् संसारे क्षरः अक्षरः चेति द्वौ पुरुषौ स्तः। अत्र क्षरः पुरुषो नाम महदादि भूतान्तः सर्वोऽपि कार्यरूपः राशिः। स च शरीरादिः विनाशशीलः। एवमेव अक्षरः पुरुषः चेतनः स्वरूपः जीवात्मा भवतीति। लोकेऽस्मिन् द्वौ विभागौ वर्तेते। एवमस्ति प्रत्यक्ष-दृश्यमानं शरीरम् अपरश्च तस्मिन् शरीरे विद्यमानो जीवात्मा। तत्र जीवात्मनो सकाशात् शरीरं सञ्चाल्यते। अस्य अध्यायस्य तृतीये श्लोके चतुर्थ पादे “असङ्गशस्त्रेण दृढेन छित्वा” यत् साक्षात् भगवता प्रतिपादितम् अत्र क्षरपदेन तदेव वर्णितमस्ति अपि च सप्तमश्लोके “ममैवांशो जीवलोके जीवभूतः सनातनः” यत् जीवात्मासम्बन्धे निगदितं तत् क्षरपदेन उच्यते। सुतरां क्षरः नाम संसारः वृक्षः यत् “वैराग्य” नाम अस्त्रेण छेत्तुं भगवता अभिप्रेरितम्।

श्लोकेऽस्मिन् “भूतानि” इति पदमस्ति तस्याशयो जीवानां स्थूल-सूक्ष्म–कारणप्रभृतिभिः त्रिप्रकारमिति ज्ञातव्यम्। स्थूलं नाम पृथ्वी-तेज-जल-वायु-आकाश-प्रभृति-पञ्चतत्त्वसमन्वितैः यच्छरीरं निर्मीयते प्रत्यक्षं परिलक्षितं स्यात् तदेव उच्यते। सूक्ष्मशरीरम्– दशेन्द्रिय- पञ्चप्राण-मनो-बुद्धिसहितैः सप्तदशावयवयुक्तैः समष्टिजगतसाकमेकत्वं वर्तते तदेव उच्यते। एवमेव कारणशरीरम्- (स्वभाव- कर्म- संस्कारादि) कारणसमष्टिगतसहितम् (मूलप्रकृतिः) एकत्वमस्तीति कथ्यते।

**द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च।**

**क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते।।**[25]

पूर्वस्मिन् श्लोके क्षराक्षरौ यदुच्यते आभ्याम् उभाभ्यामपि कश्चित् भिन्नः विलक्षणः पुरुषो वर्तते। सः उत्तमः पुरुषः। स एव परमात्मा यः त्रीन् अपि लोकान् व्याप्य विभर्ति। एवं कार्यभूतः पदार्थः महदादिः क्षरः, कारणीभूता प्रकृतिः अक्षरः ताभ्यां व्यतिरिच्य उत्तमः पदार्थः परमात्मेति भागत्रयम्।

**उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः।**

**यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वरः।।**[26]

अत्र भगवान् श्रीकृष्णः स्वयं कथयति अहं नित्यमुक्तत्वात् क्षरपुरुषम् अतिक्रान्तः इति पुरुषोऽस्मि। नियामकत्वात् अक्षरपुरुषात् उत्तमः इति उत्तमोऽप्यस्मि। एतदेवं पुरुषश्च इत्यस्मात् हेतोः अहं लोके वेदे च पुरुषोत्तमः इति प्रसिद्धिं गतोऽस्मि। वस्तुतः क्षराक्षरयोः स्वतन्त्रसत्ता नास्ति। परमात्मनः स्वतन्त्रसत्ता विद्यते। अपि च क्षराक्षरे द्वे परमात्मनः निकषा सान्निध्ये च तिष्ठतः। परन्तु अक्षरं जीवो वा क्षरेण साकं सम्बन्धं सस्थाप्य तस्याधीनं भवति।

यथोक्तम् –

**अपरेयमितस्त्वन्यां प्रकृतिं विद्धि मे पराम्।**

**जीवभूतां महाबाहो ययेदं धार्यते जगत्।।**[27]

**यस्मात्क्षरमतीतोऽहमक्षरादपि चोत्तमः।**

**अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः।।**[28]

जीवः परमात्मनः शाश्वतांशः एवं यस्य प्रज्ञा स्थिराः। यः विवेकी सन् मां पुरुषोत्तम इति जानाति स मनुष्यः सर्वज्ञः। स सर्वप्रकारेण मामेव सेवते। एवमेव यदा मनुष्यः क्षरात् अतीत इति तथा तस्य मनः क्षर- संसारात् अनुरागनिवृत्तं भूत्वा भगवतः चरणे स्थिरं भवति। एवं यदा

सः भगवन्तं अक्षरात् उत्तममिति जानाति तदा तस्य बुद्धिः श्रद्धापूर्वकं भगवतः चरणारविन्दे तिष्ठति, फलस्वरूपं तस्य प्रत्येकं कार्यं क्रिया वा भगवतः भजन-कीर्तने सर्वतोभावेन गच्छति। भक्तिमार्गस्योपासकः अव्यभिचारिणी भक्तिः अर्थात् सः परमः भवति। तदनन्तरं सः सर्ववित् अर्थात् लौकिक- अलौकिकतत्त्वं विजानाति सर्वज्ञश्च भवति।

**यो मामेवमसम्मूढो जानाति पुरुषोत्तमम्।**

**स सर्वविद्भजति मां सर्वभावेन भारत।।**[29]

इत्थं गीताकारेण भगवता श्रीकृष्णेन निगदितं यत् हे निष्पाप अर्जुन! इदं मया अत्यन्तं गुह्यात् गुह्यतमं शास्त्रं त्वां निकषा प्रतिपादितम्। भारत! शास्त्रं ज्ञात्वा विवेकिनः सद्ज्ञानाधिकारिणः कृतार्थाश्च नूनं भविष्यन्ति। सम्पूर्णेऽस्मिन् अध्याये भगवान् संसारस्य सारतत्त्वविषये यद् वास्तविकस्वरूपविषये प्रकटितवान् जीवात्मनः स्वरूपं, स्वस्य नितान्तं गोपनीयतत्त्वं यद् ज्ञात्वा मनुष्यः अन्यत् किमपि ज्ञातव्यविषयं ज्ञातुं न इच्छति, तस्य मूढत्वं नष्टं याति तत्सर्वं श्लोकेऽस्मिन् वर्ण्यते। केवलं लौकिकविद्या- भाषा- कलाकौशलादिभिः ज्ञात्वा तस्य मूढत्वं न गच्छति। यतो हि लौकिकविद्यायाः आद्यन्तोऽस्ति अतः स अपूर्णः एवञ्च तत्सर्वं परमात्मना प्रकटितम् तदर्थं परमात्मनं कथं प्रकाशितं करिष्यति अपि च यः कोऽपि लौकिकविद्या न ज्ञात्वा केवलम् लौकिकभगवत्तत्त्वं परमात्मानं पुरुषोत्तमं ज्ञातवान् वस्तुतः सः मनुष्यः वास्तविकः ज्ञानवान् सर्ववित् च भवतीति श्लोकस्य सारांशः।

**इति गुह्यतमं शास्त्रमिदमुक्तं मयानघ।**

**एतद्बुद्ध्वा बुद्धिमान्स्यात्कृतकृत्यश्च भारत।।**[30]

अध्यायेऽस्मिन् मुख्यतया त्रयोदशविभूतयः वर्णिताः सन्ति, यथा 1. सूर्यस्य स्थितं तेजः 2. चन्द्रस्य स्थितं तेजः 3. अग्निस्थितं तेजः 4. पृथिव्याः धारणशक्तिः 5. चन्द्रस्य पोषणशक्तिः 6. वैश्वानरः 7. हृदयस्थः अन्तर्यामी, 8. स्मृतिः, 9. ज्ञानम् 10. अपोहनम् 11. वेदात् ज्ञातव्यविषयः, 12. वेदान्तस्य कर्ता, 13. सकलवेदस्य कर्ता ज्ञाता च।

एवमेव प्रथमे श्लोके तत्त्वदृष्ट्या संसारस्य ज्ञानम् , चतुर्थे संसारं प्रति स्थितायाः आसक्तौ छिन्नं कृत्वा भगवतः चरणारविन्दे सम्पूर्णं समर्पणम्। एकादशे श्लोके ध्यानादिभिः सततं प्रयतमाना एव ज्ञानिनः स्वदेहे परमात्मानं वर्तमानमिमं द्रष्टुं शक्नुवन्ति। पञ्चदशश्लोके वेदाध्ययनद्वारा तत्त्वानुसन्धानम् अर्थात् वेदोदितफलस्य प्रदाता। एकोनविंशतितमश्लोके यः मानवः विवेकी सन् भगवन्तं पुरुषोत्तमं वेत्ति सः सर्वज्ञः सर्वप्रकारेण मां सेवते। विंशतितमे श्लोके सम्पूर्णाध्यायस्य सारतत्त्वानि विद्यन्ते।

## पादटीका

1. श्रीमद्भगवद्गीता माहात्म्यम्
2. श्रीमद्भगवद्गीता माहात्म्यम्
3. पुरुषोत्तमयोगः 15.1
4. श्रीमद्भगवद्गीता 15/ 2,3,4
5. श्रीमद्भगवद्गीता 8.6
6. श्रीमद्भगवद्गीता
7. 5.22विवेकचूडामणौ 79
8. श्रीमद्भगवद्गीता 18.54
9. श्रीमद्भगवद्गीता 15.5
10. श्रीमद्भगवद्गीता 15.6
11. कठोपनिषद् 2.2.5
12.श्रीमद्भगवद्गीता 8.21
13. श्रीमद्भगवद्गीता 15.21
14. श्रीमद्भगवद्गीता 15.6
15.श्रीमद्भगवद्गीता 15.7
16. श्रीमद्भगवद्गीता 15.8
17. श्रीमद्भगवद्गीता 15.9
18.श्रीमद्भगवद्गीता 15.10
19. श्रीमद्भगवद्गीता 15.11
20. श्रीमद्भगवद्गीता 15.12
21. श्रीमद्भगवद्गीता 15.13
22. श्रीमद्भगवद्गीता 15.14
23. मुण्डकोपनिषदि
24. श्रीमद्भगवद्गीता 15.15
25. श्रीमद्भगवद्गीता 15.16
26. श्रीमद्भगवद्गीता 15.17
27. श्रीमद्भगवद्गीता 7.5
28. श्रीमद्भगवद्गीता 15.18
29. श्रीमद्भगवद्गीता 15.19
30.श्रीमद्भगवद्गीता 15.20

## सहायकग्रन्थसूची

1. **श्रीमद्भगवद्गीता**, गीताप्रेस, गोरखपुरम्, २०२२।
2. **विवेक-चूडामणी**, गीताप्रेस, गोरखपुरम्।
3. **कठोपनिषद्**, गीताप्रेस, गोरखपुरम्।
4. **मुण्डकोपनिषद्**, गीताप्रेस, गोरखपुरम्।

# रूपके वृत्तिप्रवृत्तिविमर्शः

डॉ.बुद्धेश्वरषडङ्गी
अध्यक्षः
श्री राधामाधवादर्शसंस्कृतमहाविद्यालयः
मणिपुरम्

**“काव्येषु नाटकं रम्यम्”** इत्यादि पूर्वाचार्याणां वाक्यामृतात् नाटकतत्त्वान्वेषणाय प्रतिपित्सा जायत एव। नाट्यशास्त्रस्य प्रणेतुर्भरतमुनेर्वचनानुसारेण नाट्यस्य सर्वाणि तत्त्वानि वेत्तुं न कोऽपि समर्थः ।[1] अतः पितामहात् नाट्यवेदस्य यानि तत्त्वानि मुनिना भरतेन लब्धानि, तान्येव नाट्यशास्त्रे विमृष्टानि। तेषामेव परिशीलनमद्य विद्वद्भिः क्रियते। तत्र षष्ठाध्याये प्रोक्तेषु नाट्यतत्त्वेषु अन्यतमे स्तः वृत्तिः प्रवृत्तिश्च। वृत्तिस्तु नेतृव्यापारस्वभावः। प्रवृत्तिस्तु देशकालभाषाचेष्टाश्रितो नायकव्यवहारः- इति धनञ्जयस्य विचारः। वृत्तिः प्रवृत्तिश्च अभिनयस्य परिपोषिके भवतः। तासां भेदाभेदज्ञानेन नाट्यात्मभूतस्य रसस्य सम्यग्बोधस्यादिति धिया शोधनिबन्धस्यास्य रचनायामस्माकं प्रवृत्तिः।

अत्रैव शोधनिबन्धे इमे कूञ्चीशब्दाः भविष्यन्ति यथा- रसः, वृत्तिः, भारती, सात्त्वती. आरभटी, आवन्ती, भागधी, मध्यमा।

षष्ठाध्याये भरतमुनिः नाट्यसङ्ग्रहकथनावसरे[2] वृत्तीनां चतूरो भदान् आविष्करोति यथा –

भरती सात्त्वती चैव कौशिक्यारभटी तथा।
चतस्रो वृत्तयो ज्ञेया यासु नाट्यं प्रतिष्ठितम्।।(६/२४)

नाट्यस्य प्रतिष्ठा चतसृषु वृत्तिषु एव सम्प्राप्यते। ताश्चतस्रो वृत्तयो यथा – भारती, सात्त्वती, कैशिकी, आरभटी।

इमाः वृत्तयः अभिनेतव्यवस्तूनामुपकारिण्यः सन्तीति भरतस्य अन्तर्दृष्टिरभिनवभारत्यां स्पष्टीकृता।[3] अतएव अभिनयकाले इमाः वृत्तीः आश्रित्य अभिनेतारः नाट्यवस्तु प्रदर्शयेयुः।

रसाधारेणाऽपि वृत्तिप्रयोगस्य कश्चनभेदो काव्यशास्त्रिभिः स्वीकृतः। यथा– शृङ्गाररसे कैशिकी, वीररसे सात्त्वती, रौद्ररसे तथा वीभत्सरसे आरभटी विशेषतया उपकारिण्यः सन्ति।[4] भारती वृत्तिस्तु सर्वेषां रसानां सामान्यतः उपकारिणी भवति। अत्र प्रकृतिरसानां कृते वृत्तिविमर्शात् तेषां विकृतिषु अपि ताः उपकरिण्यस्युरिति नास्ति सन्देहः। अतः चतूर्णामेव रसानां कृते वृत्तयः स्थिरीकृताः, अन्येषां कृते कथं न कृता इति शङ्का न करणीया। अपरत्र गुणानां रसोपकारकविमर्शकाले ध्वनिकृताऽपि प्रायशो धारेयं समाश्रिता।[5] विशेषतः ये यत्र उपकारकास्तेषामेव स्वतन्त्रताकथनं समीचीनम्। अन्यत्र सामान्यधर्मेण ते एव उपकारका इति स्वीकर्त्तव्यम्।

पञ्चमीं वृत्तिम् उद्भट्टादयः काव्यशास्त्रिणः स्वीकुर्वन्ति। सा पञ्चमीवृत्तिः **अर्थवृत्तिरि**ति तेषां स्वीकृतिः। टीकाकाराः तत्र अरुचिं प्रकटयन्तो वदन्ति- लक्ष्यभूते नाटके कदापि अस्याः वृत्तेः दर्शनं न कृतम्। यतः अन्ये विकृतिरूपाः हास्य-करुण-भयानक-अद्भुतरसाः चतुसृषु वृत्तिषु एव अन्तर्भवन्ति। ताभिश्चतसृभिरेव रसानां परिपुष्टिर्भवतीति स्वतन्त्रतया अर्थवृत्तिरिति पञ्चमी वृत्तिः न ग्रहणीया।[6]

तत्रापि चतसृषु वृत्तिषु कैशिकी -सात्त्वती-आरभटीवृत्तयः अर्थव्यापरानुकूलवृत्तयः। ताः साक्षात् रसस्य उपकारिण्यो भवन्ति। भारतीवृत्तिस्तु शब्दव्यापारपरा, अपि च आमुखस्य कश्चन भेदोऽस्ति। अतः परम्परया रसस्योपकारिणीति सूक्ष्मविमर्शः कश्चित् धनञ्जयेन दशरूपके कृतः – चतुर्थी भारती सापि वाच्या नाटकलक्षणे।।भारती तु शब्दवृत्तिरामुखाङ्गत्वात् तत्रैव वाच्या।[7]

आसां वृत्तीनामपि प्रभेदास्सन्ति। तेषां सलक्षमत्र विचारः करिष्यते। तत्र कैशिकीलक्षणं यथा– **गीतनृत्यविलासकामोपभोगाद्युपलक्ष्यमाणो मृदुः शृङ्गारी कामफलावच्छन्नो व्यापारः कैशिकी।**

अस्याः आदौ चत्वारः भेदाः –

१. नर्म

२. नर्मस्फिञ्जः

३. नर्मस्फोटः

४. नर्मगर्भः

नर्म अर्थात् प्रियायाः प्रीत्यर्थं रत्यभिमुखीकरणार्थं च अश्लीलवर्जितं वैदग्धेन परिहासवचनम्। तस्य एव नर्मवचनस्य वाग्वेषचेष्टाभेदेन आदौ शुद्धनर्मभेदास्त्रयः। ततः आत्मोपक्षेक - सम्भोग-मानाख्योपभेदैस्त्रैविध्यम्। ततः सश्रृङ्गारहास्यनर्म इति द्वितीयो भेदः कल्पितः। यस्य नव भेदाः स्युः। पुनश्च सभयहास्यनर्मेति तृतीयभेदस्य शुद्ध-सान्तराङ्गप्रभेदेन षड्भेदाः कल्पिताः। सर्वमाहत्य अष्टादशभेदाः नर्मवचनाख्यायाः कैशिकीवृतेस्स्युः।

**नर्मस्फिञ्जस्य** लक्षणं कुर्वता आह -यत्र श्रृङ्गारस्य प्रारम्भे सुखलाभः, किन्तु अन्तिमे भयो जायते। नूतनतया श्रृङ्गारे लिप्तानां दशेयं दृश्यते।[8] मालविकाग्निमित्रस्य उदाहरणमेकं यथा –

विसृज सुन्दरी सङ्गमसाध्वसं ननु चिरात्प्रभृति प्रणयोन्मुखे ।

परिगृहाण गते सहकारतां त्वमतिमुक्तलताचरितं मयि।। (४.१३)

ततः मालविका वदति – भर्त्तः। देव्या भयेन आत्मनोऽपि प्रियं कर्तुं न पारयामि।

अत्र प्रारम्भे प्रणयसुखं ततः भयस्य वर्णनम्।

**नर्मस्फोटः** –यत्र सात्त्विकादिभावानां स्वल्पतया सूचना भवति , तत्र श्रृङ्गाररसस्य किञ्चिन्मात्रस्फूरणात् नर्मस्फोटः।[9]

भरतमुनिरपि लक्षणेन तदेव स्पष्टीकरोति[10] यथा –

विविधानां भावानां लवैर्लवैर्भूषितो बहुविशेषः।

असमग्राक्षिप्तरसो नर्मस्फोटस्तु विज्ञेयः ।।

**नर्मगर्भः** – प्रयोजनसिद्धये नायकस्य गुप्तरूपेण प्रवेशः ।[11] उदाहरणं यथा –

प्रियदर्शिकायां गर्भाङ्के वत्सराजवेषधारिसुसङ्गतास्थाने साक्षात् वत्सराजस्य प्रवेशः ।

अत्रायं सारो ध्येयो यत् शृङ्गारस्य परिपोषणाय प्रथमपर्याये क्रियमाणानि नायकनायिकयोः रत्युद्बोधकानि वचनानि एव कैशिकीवृत्तेः भेदोपभेदत्वेन कल्पितानि।

तथैव सात्त्वतीवृत्तिरपि चतुर्धा विभज्यते यथा –

१. संलापकः २. उत्थापकः ३. साङ्घात्यः ४. परिवर्त्तकः ।

सत्त्वं नाम मनः। मनसः प्रभवो भावः सात्त्वती। मनसः भावमभिव्यञ्जनाय कठोरवचनस्य प्रयोगः **संलापकः।** युद्धाय आह्वानप्रदानं **उत्थापकः।** मन्त्रोषधिदैवशक्तिप्रयोगेन युद्धवर्णनम्- **साङ्घात्यः**, आदौ यदुच्यते तस्य परिवर्तनं यदि अन्तिमे क्रियते तत्र **परिवर्त्तकः।**

**आरभटी-** यत्र माया-इन्द्रजाल-संग्राम-क्रोध-उद्भ्रान्तादिचेष्टया कार्यं सम्पाद्यते। तत्र उद्भ्रान्त नाम अधैर्येण यथातथा कार्यसम्पादनम्।

उक्तं च विश्वनाथेन-

मायेन्द्रजालसंग्रामक्रोधोद्भ्रान्तादिचेष्टितैः ।

संयुक्ता वधबन्ध्याद्यैरुद्धतारभटी मता ।। (सा.द.-६/१३२)

अस्या अपि चत्वारो भेदा यथा- १) सङ्क्षिप्तिका २)सम्फेटः ३)वस्तूत्थानम् ४)अवपातः ।

**१. संक्षिप्तिका**–

विभिन्नशिल्पयोगात् वस्तु निर्माय मञ्चे उपास्थापनम्। शिल्पयोगस्यार्थः मृत्तिका-वंश-चर्मप्रभृतिभिः प्रतिकृतिनिर्माणम्। उदाहरणं यथा- उदयनचरिते किलिञ्ज(चटाई इति भाषायाम्)निर्मितहस्तिप्रयोगेण नेतुः निरोधः।

केचित् नायकस्य निवृत्त्या अन्यनायकस्य उपस्थितिम् ,अवस्थापरिवर्त्तनं वा संक्षिप्तिकात्वेन वर्णयन्ति। यथा बलिनृपतेः गमनात् सुग्रीवस्य उदयः – अन्यनायकोपस्थितिभेदात्मिका संक्षिप्तिका। रामेण परशुरामस्य तेजोपहरणानन्तरं औद्धत्यानावृत्त्या शान्तावस्था अपि संक्षिप्तिका।अस्याः लक्षणं दशरूपके यथा-

संक्षिप्तवस्तुरचना संक्षिप्तिः शिल्पयोगतः। पूर्वनेतृनिवृत्त्याऽन्ये नेत्रन्तरपरिग्रहः।।(२/५७)

२. **संफेटः**–

सम्फेटाख्यारभटीवृत्तिस्तत्र स्यात् यत्र क्रोधाविष्टयोः जनयोः शस्त्रादिप्रहरणं भवति। उक्तं यथा दशरूपके-

संफेटस्तु समाघातः क्रुद्धसंरब्धयोर्द्वयोः।। (२/५८)

अस्य उदाहरणम् -

१)यथा माधवाघोरघण्टयोः शस्त्राघातः– मालतीमाधवे।

२) इन्द्रजिल्लक्ष्मणयोश्च शस्त्रपेरहारः रामायणप्रतिबद्धवस्तुषु।

**३. वस्तूत्थापनम्**–

लक्षणम्–

मायाद्युत्थापितं वस्तु वस्तूत्थापनमिष्यते।। (२/५९)

यत्र मायेन्द्राजालद्वारा प्रकटितकथावस्तु, युद्धदीनाञ्चोपस्थापनम्।

उदाहरणं यथा उदात्तराघवे–

जीयन्ते जयिनोऽपि सान्द्रतिमिरव्रातैर्वियद्व्यापिभि-

र्भास्वन्तः सकला रवेरपि रुचः कस्मादकस्मादमी।

एताश्चोग्रकबन्धकण्ठरुधिरैराघ्मायमानोदरा-

मुञ्चन्त्याननकन्दरानलमुचस्तीव्राऽऽरवाः फेरवः ।। इत्यादि ।

४. **अवपातः-**

अवपातस्तु निष्क्रामप्रवेशत्रासविद्रवैः ।।(२/५९)

यत्र भयवशात् पलायनम्, गृहाभ्यन्तरप्रवेशः,अतिमात्रभयात् पलायनम्, तत्र अवपातस्य आशयः ।

यथा रत्नावल्याम् –

कण्ठे कृत्ताऽवशेषं कनकमयमधः शृङ्खलादाम कर्षन्

क्रान्त्वा द्वाराणि हेलाचलचरणवलत्किङ्किणीचक्रवालः ।

दत्तातङ्को गजानामनुसृतसरणिः सम्भ्रमादश्वपालैः

प्रभ्रष्टोऽयं प्लवङ्गः प्रविशति नृपतेर्मन्दिरं मन्दुरातः ।। (रत्ना-२/२)

अत्र अश्वशालातः निर्गतं कमपि वानरमनु अश्वरक्षकानां गमनवर्णनं तथा च तस्माद्भीतानाम् इतस्ततः पलायनवर्णनम् अवपाताख्या आरभटीवृत्तिः ।

अपरमुदाहरणं प्रियदर्शिकानाटिकायाः प्रथमाङ्कात्-

नष्टं वर्षवरैर्मनुष्यगणनाभावादकृत्वा त्रपा –

मन्तः कञ्चुकिकञ्चुकस्य विशति त्रासदयं वामनः ।

पर्यन्ताश्रयिभिर्निजस्य सदृशं नाम्न किरातैः कृतं

कुब्जा नीचतयैव यान्ति शनकैरात्मेक्षणाशङ्किनः ।।

अत्र नपुंसकानां पलायनम्, वामनस्य कञ्चुकिकञ्चुके गोपनवर्णनम्, किरातानां वहिर्गमनम्, कुब्जानां शङ्कया वामनाकारगात्रेण शनैः प्रस्थानम्।

एवं विभिन्नाभिनयद्वारा चतसृणां वृत्तिनां प्रयोगः दृश्यकाव्ये क्रियत एव।

**प्रवृत्तिविमर्शः** –

दृश्यकाव्ये प्रवृत्तेरपि महद्वैशिष्ट्यं वर्त्तते। पूर्ववर्णितानां चतसृणां वृत्तीनां देशवैशिष्ट्येन एव प्रदर्शनं नाट्यशास्त्रिभिः स्वीकृतम्।

तदेव लक्षणे आह-

देशभेदात् नायकप्रभृतिपात्राणां वेषग्रहणे भिन्नता, भाषाप्रयोगे भिन्नता, कार्यसम्पादनरीतेः भिन्नता च। अतः देशभेदेन नायकादिव्यापारः प्रवृत्तिरुच्यते । तदेव लक्षणे दशरूपककृता उच्यते –

देशभाषाक्रियावेषलक्षणाः स्युः प्रवृत्तयः।
लोकादेवागम्येत यथौचित्यं प्रयोजयेत्।। (२/६३)

अत्र लक्षणवाक्ये लोकव्यवहारपदं गुरुत्वपूर्णम्। अभिनेतारः स्वाभिनयकरणात् पूर्वं कथावस्त्वाधारेण नायकादिपात्राणां निवासस्थानं सम्यक् जानीयुः। तत्र यथा जनानां वेष-वाग्व्यवहार-कार्यशैलीत्यादयःसन्ति तथैव नाटके भाषा- वस्त्र-कार्यशैलीप्रभृतयः करणीयाः। यथा पञ्जावदेशस्य कथावस्तुनः अभिनयकाले तत्रस्थाः वेष-भाषा-रीतयः प्रयोक्तव्याः। तथा बङ्गीय-उत्कलीय-तेलुगु-तामित-केरल-झारखण्ड-बिहारादिदेशाधारेण अभिनयः करणीयः। वैदेशिकानां गौराङ्ग-यवन-ख्रीष्टियानादीनामपि तथा करणीयः।

**मुनिना भरतेनापि देशाधारेण पञ्च प्रवृत्तयः स्वीकृताः यथा**–

**१. आवन्ती। मध्यप्रदेशस्य उज्जयिनी,**

२. **दाक्षिणात्या। दक्षिणभारतीयराज्यानि।**

३. **ओद्रमागधी। ओडिशाबिहारप्रभृतिपूर्वभारतीयराज्यानि**

४. **पाञ्चाली- पञ्जावरहरियाणाप्रभृति-उत्तरक्षेत्रीयराज्यानि।**

५. **मध्यमा। पश्चिमभारतीयराज्यानि।**

विभिन्नक्षेत्रस्य वेषभाषाक्रियानुसारेण अभिनयः प्रयोक्तव्य इति भरतमुनेः स्वीकृतिरत्र विचारणीयः।

अभिनेतृणां वाग्व्यवहारे केचिन्नियमाः स्वीकृताः यथा- कुलीनमहात्मनां तपस्विनां पट्टमहिषीणां मन्त्रिपुत्रीणां वेश्यानां च भाषा संस्कृतं स्यात्। स्त्रीणां प्राकृतभाषा प्रशस्ता।(प्राकृतम्- प्रकृतं- संस्कृतम्। ततः जाता तद्भव-तत्सम-देशीयभाषा)। नीचपुरुषपात्राणां कृते सौरसेनी, पिशाचानां कृते पैशाची, नीचवर्गस्य चाण्डालादीनां कृते मागधीभाषा च व्यवहर्त्तव्याः।तत्तदेशप्रचलितप्राकृतभाषां लोकव्यवहारात् ज्ञात्वा व्यवहर्त्तव्या। कथावस्त्वनुसारेण क्वचित् उत्तम-मध्यम-अधमपात्राणां भाषायां व्युत्क्रमो भवेदिति दशरूपककृता निर्दिष्टम्।[12]

प्रवृत्तेरङ्गत्वेन गुरुलघुजनेषु सम्वोधनपदविषये नाट्यकोविदैः कश्चन विचारः कृतः। तत्र निम्नोक्ता सारणी समाम्नाता।

१. उत्तमजनाः विद्वासं देवर्षिं सन्यासिनं प्रति **भगवन्**-इति व्यवहरेयुः।

२. उत्तमजनाः विप्र-अमात्य-ज्येष्ठभ्रातृन् प्रति **आर्य्रा**- इति व्यवहरेयुः।

३. नटीसूत्रधारयोः परस्परव्यवहारे **आर्या**-इति पदस्य प्रयोगः।

४. सारथी स्वरथाधिपं प्रति **आयुष्मन्**- इति व्यवहरेत्।

५. पूज्यजनः शिष्य-पुत्र-अनुजान् प्रति **वत्स**- **तात**-इति व्यवहरेत्।

६. शिष्यपुत्रादिकनिष्ठाः गुरुजनान् **तात,सुगृहीतनामा**-इति व्यवहरेयुः।

७. पारिपार्श्वकः सूत्रधारं **भाव**-इति वदेत्।

८. सूत्रधारः परिपार्श्वकं **मार्ष**-इति वदेत्।

९. सेवकाः स्वामिनं **देव-स्वामिन्** इति व्यवहरेयुः।

१०.अधमपात्रं राजादिकं **भट**-इति वदेत्।

११.स्त्रियः उत्तमजनान् **पतिवत्** व्यवहरेयुः।

१२.सखीजनाः परस्परं **हला**-इति वदेयुः।

१३.महिलाभृत्याः परस्परं **हञ्जे**-इति वदेयुः।

१४.कुट्टनी-पुज्य-वृद्धास्त्रियः प्रति **अम्ब** इति व्यवहारः।

१५.विदूषकः राज्ञीं तथा चेटीं **भवती**-इति व्यवहरेत्।

लोकव्यवहारात् जनानां चेष्टा-गुण-वाग्व्यवहारादिकं ज्ञात्वा अभिनयः सर्वदा अपेक्ष्यते। तेन सहृदयानां हृदये विभावानुभावादीनां अनुभवे किमपि विघ्नं न भवेत्। वृत्तीनामुपरि नाटकस्य प्रतिष्ठा विद्यते इति कथनमेव रससिद्धये तासां वैशिष्ट्यं प्रमाणीभवति। ताश्य लेकाधारेण स्वतन्त्रास्स्युरिति प्रवृत्तिः सूचयति।

## पादटीका

1. न शक्यमस्य नाट्यस्य गन्तुमन्तं कथञ्चन।

   कस्माद्बहुत्वाज्ज्ञानानां शिल्पानां वाप्यनन्ततः।।6/6

2. रसाभावा ह्यभिनया धर्मी वृत्तिप्रवृत्तयः।

   सिद्धि स्वरास्तथाऽतोद्यं गानं रङ्गश्च सङ्ग्रहः।। ना.शा.6/10

3. न चाभिनयोऽभिनेतव्यमन्तरेणास्तीति दशरूपकयोगहारेण च तदुपकारिण्यो वृत्तयः।

4. शृङ्गारे कैशिकी वीरे सात्त्वत्यरभटी पुनः।

   रसे रौद्रे च बीभत्से वृत्ति सर्वत्र भारती।। दशरूपके – 2/62

5 .शृङ्गारे विप्रलम्भाख्ये करुणे च प्रकर्षवत्।

   माधुर्यमाद्रतां याति यतस्तत्राधिकं मनः।। ध्वन्यालोकः-3/8

रौद्रादयो रसा दीप्त्या लक्ष्यन्ते काव्यवर्त्तिनः।

तद्व्यक्तिहेतू शब्दार्थावाश्रित्यौजो व्यवस्थितम्।। ध्वन्यालोकः- 3/9

6. वह पञ्चमी वृत्ति लक्ष्मग्रन्थ में कभी भी दिखायी नही दैती...... दशरूपके द्वितीप्रकाशे – 61कारिकाव्याख्यायाम्। अपि च – सा तु लक्ष्ये क्वचिदपि न दृश्यते, न चोपपद्यते रसेषु, हास्यादीनां भरत्यात्मकत्वात्। नीरसस्य च काव्यार्थस्याभावात्। तत्रैव 60 कारिकायाः वृत्तिः।

7. तत्रैव – 2/60 वृत्तिभागे।

8. नर्मस्फिञ्जः सुखारम्भो भयान्तो नवसङ्गमे। 2/51

9. नर्मस्फोटस्तु भावानां सूचितोऽल्परसो लवैः। 2/51

10. नाट्यशास्त्रम् – 23/52

11. छन्ननेतृप्रतीचारो नर्मगर्भोऽर्थहेतवे ।।दशरूपके – 2/52

12- कार्यतश्चोत्तमादीनां कार्यो भाषाव्यतिक्रमः।.2/66

## सहायकग्रन्थसूची

1. दशरूपकम्- रविकान्तमणिसम्पादितम्- प्रकाशकः-राष्ट्रियसंस्कृतसाहित्यकेन्द्रम्,जयपुरम्-वर्षम्-2021

2. नाट्यशास्त्रम्,सुधारस्तोगीसम्पादितम्, प्रकाशकः- कृष्णदास अकादमी,वाराणसी, कालः-1989

3. साहित्यदर्पणः,सत्यव्रतसिंहसम्पादितः, प्रकाशकः- चौखम्वा विद्याभवन,वाराणसी, कालः-1986,

4. ध्वन्यालोकः, आचार्यजगन्नाथपाठकसम्पादितः, प्रकाशकः- चौखम्वाविद्याभवन,वाराणसी, कालः2009

5. रसगङ्गाधरः, आचार्यसूर्यमणिरथसम्पादितः, प्रकाशकः-ओडिशासाहित्यएकाडेमी, भुवनेश्वर,कालः-2012

# Writer's World


1. Acharya Soumyaranjan, Ph.D. Research Scholar, Maharaja Sriram Chandra Bhanja Deo University, Odisha, Pin-757003.

2. Acharya Subhalaxmi, Assistant Professor, SVM Autonomous College, Jagatsinghpur, Odisha, Pin- 754103. Ph.- 9776120044 Email– Subhalaxmiacharya12@gmail.com.

3. Banerjee Abhilash, Ph.D. research scholar, Department of Sanskrit, Pali & Prakrit Visva-Bharati, Santiniketan-731235, Email- abhilashtutul@gmail.com.

4. Bisoi Muni, Sanskrit Teacher, Bhrahmapuram,

5. Das Bipasha Ex- Research Scholar Visva- Bharati, Santiniketan Email: bipashadas0@gtmail.com.

6. Das Rajashree, Shree Jagannath Sanskrit University, Department of Sahitya, Shree Vihar, Puri, Pin- 752003, Email- rajashree8das@gmail.com.

7. Dash Jyotiprasad, Assistant Professor, Central Sanskrit University, Shri Sadashiv Campus, Puri, Odisha, Pin- 752001.

8. Dei Suneli, Assistant Professor, Department of Sanskrit, Gangadhar Meher Sanskrit University, Sambalpur, Odisha, Pin- 768004, Ph.- 9583052516, Email- drsunelidei@gmail.com

9. Jha Niranjan Kumar, Research Scholar, Department of Sahitya, National Sanskrit University, Tirupati, Guide- Prof. Satyanarayan Acharya, National Sanskrit University, Tirupati Pin- 517507, Ph.- 6200499269, Email- niranjankumarjha82@gmail.com.

10. Mishra Supriya, Govt. Women's College Sambalpur, Odisha, Pin- 768001.

11. Panda Gyanranjan, Associate Professor, Department of Sahitya, National Sanskrit University, Tirupati, Pin- 517507, Ph.- 9703436596, Email- gyanarsvp@gmail.com.

12. Panda Indira, Assistant Professor, Samanta Chandra Sekhar Autonomous College, Puri, Pin- 752001, Ph- 7978672323.

13. Sarangi Buddheswar, Principal I/C, Radha Madhav Adarsha Sanskrit Mahavidyalaya, Nambol, Manipur, Pin-795134, Email- sarangibuddheswar@gmail.com, Ph- 7003415810.

14. Satapathy Swetapadma, Assistant Professor, Department of Sahitya, National Sanskrit University, Tirupati, Pin- 517507, Ph.- 9000605354, Email- 1987swetapadma@gmail.com.

15. Vachasapati Dhruva, Research Scholar, National Sanskrit University, Tirupati, Andra Pradesh, Pin- 517507, Email- dhruvvachasapati22@gmail.com.